३/२०

इति छांदोग्योपनिषद्भाष्यं समाप्तं

Itichhandogyopunishdraashyasumaptam

१५९

884

१५१

छांदोग्योपनिषद्भाष्यप्रारंभः क्रियते

श्रीगणेशाय नमः ॥ ॐ ॥ ॐ इत्येतदक्षरमित्याद्यष्टाध्यायी छांदोग्योपनिषत् तस्याः संक्षेपतोऽर्थजिज्ञासुभ्य ऋजुविवर १
णमल्पग्रंथमिदमारभ्यते । तत्र संबंधः समस्तं कर्माधिगतं प्राणादिदेवताविज्ञानसहितमर्चिरादिमार्गेण ब्रह्मप्रतिपत्तिका
रणं । केवलं च धूमादिमार्गेण चंद्रलोकप्रतिपत्तिकारणं । स्वभावप्रवृत्तानां च मार्गद्वयपरिभ्रष्टानां कष्टाऽधोगति
रुक्ता । न चोभयोर्मार्गयोरन्यतरस्मिन्नपि मार्गे आत्यंतिकी पुरुषार्थसिद्धिरिति । अतः कर्मनिरपेक्षमद्वैतात्मविज्ञानं सं
सारगतित्रयहेतूपमर्देन वक्तव्यमित्युपनिषदारभ्यते । न चाद्वैतात्मविज्ञानादन्यत्रात्यंतिकी निःश्रेयसप्राप्तिः । वक्ष्य
ति ह्यथ येऽन्यथातो विदुरन्यराजानस्ते क्षय्यलोका भवंति । विपर्यये च स स्वराड्भवति । तथा द्वैतविषयोऽनृताभिसंधस्य
बंधनं तस्करस्येव तप्तपरशुग्रहणे दाहादिः संसारदुःखप्राप्तिश्चेत्युक्त्वा अद्वैतात्मसत्याभिसंधस्य तस्करस्येव तप्तप
रशुग्रहणे बंधदाहाद्यभावः संसारदुःखनिवृत्तिर्मोक्षश्चेत्यत एव न कर्मसहितत्वमद्वैतात्मज्ञानं । क्रियाकारकफल
भेदोपमर्देन सदेकमेवाद्वितीयमात्मैवेदं सर्वमित्येवमादिवाक्यजनितस्य बाधकप्रत्ययानुपपत्तेः । कर्मविधिप्रत्यय इ
ति चेन्न कर्तृभोक्तृस्वभावविज्ञानवतः तज्जनितकर्मफलरागद्वेषादिदोषवतश्च कर्मविधानात् । अधिगतसकलवे
दार्थस्य कर्मविधानादद्वैतज्ञानवतोऽपि कर्मेति चेन्न कर्माधिकृतविषयस्य कर्तृभोक्त्रादिज्ञानस्य स्वाभाविकस्य
तः सदेकमेवाद्वितीयमात्मैवेदं सर्वमित्यनेनोपमर्दितत्वात् । तस्मादविद्यादिदोषवत एव कर्माणि विधीयंते नाद्वैतज्ञानवतः ।
अत एव वक्ष्यति सर्व एते पुण्यलोका भवंति ब्रह्मसंस्थोऽमृतत्वमेतीति । तत्रैतस्मिन्नद्वैतविद्याप्रकरणेऽभ्युदयसाधना
न्युपासनान्युच्यंते । कैवल्यसंनिकृष्टफलानि चाद्वैतादीषद्विकृतब्रह्मविषयाणि मनोमयः प्राणशरीर इत्याद
नि कर्मसमृद्धिफलानि च कर्मांगसंबंधीनि रहस्यत्वसामान्यान्मनोवृत्तिसामान्याच्च । यथाऽद्वैतज्ञानं मनोवृत्तिमा ॥१८
त्रं तथान्यान्यप्युपासनानां च विशेष उच्यते । स्वाभाविकस्यात्मन्यक्रिये अध्यारोपितस्य कर्त्रादिकारकक्रियाफल
भेदविज्ञानस्य निवर्तकमद्वैतविज्ञानं रज्ज्वादाविव सर्पाद्यध्यारोपलक्षणज्ञानस्य रज्ज्वादिस्वरूपनिश्चयः प्रकाश।

१ निमनोवृत्तिरूपाण्यस्ति हि सामान्यं कस्तर्हि अद्वैतज्ञानस्योपासना २
शीयणीत्य १

आ । त्रै । पै २

निमित्तं नोपासनं तु यथाशास्त्रसमर्पितं किंचिदालंबनमुपादाय तस्मिन्समानचित्तवृत्तिसंतानकरणं तद्वि
लक्षणप्रत्ययानंतरितमिति विशिषंत्यन्यतस्त्युपासनानि सत्त्वशुद्धिकरत्वेन वस्तुतत्वावभासकत्वादद्वैतज्ञानो
पकारकाण्यालंबनविषयत्वात्सुखसाध्यानि चेति पूर्वमुपन्यस्यंते तत्र कर्मांगत्वाभ्यासस्य दृढीकृतत्वात्कर्मपरित्या
गेनोपासनस्य दुःखवेतः समर्पणाकर्त्तुमिति कर्मांगविषयमेव तावदादावुपासनमुपन्यस्यते ॥ ओमित्ये
तदक्षरमुद्गीथमुपासीत। ओमित्येतदक्षरं परमात्मनोऽभिधानं नेदिष्ठं तस्मिन्हि प्रयुज्यमाने स प्रसीदति प्रिय
नामग्रहणादिव लोकस्तदिहेतिपरं प्रयुक्तमभिधायकत्वाद्व्यावर्तितं शब्दस्वरूपमात्रं प्रतीयते। तथा चार्चादिव
त्परस्यात्मनः प्रतीकं संपद्यते। एवं नामत्वेन प्रतीकत्वेन च परमात्मोपासनसाधनं श्रेष्ठमिति सर्ववेदांतेष्ववगम्यते
जपकर्मस्वाध्यायाद्यंतेषु च बहुशः प्रयोगात्प्रसिद्धमस्य श्रैष्ठ्यं अतस्तदेतदक्षरं वर्णात्मकमुद्गीथभक्त्य
१८ वयवत्वादुद्गीथशब्दवाच्यमुपासीत कर्मांगावयवभूते ॐकारे परमात्मप्रतीके दृढामैकाग्र्यलक्षणां मतिं सं
तनुयात्तमुपासीत स्वयमेव श्रुतिरोंकारस्योद्गीथशब्दवाच्यत्वे हेतुमाह। ओमिति ह्युद्गायति ओमित्या
रभ्य हि यस्मादुद्गायति अत उद्गीथ ॐकार इत्यर्थः। तस्योपव्याख्यानं तस्याक्षरस्योपव्याख्यानमेवमुपासन
मेवंविभूत्येवंफल एषां भूतानां पृथिवी रसो गतिः परायणमवष्टंभः पृथिव्या आपो रसः अप्सु ह्योतप्रोता च पृथिवी अतस्ताः र
सः पृथिव्याः अपामोषधयो रसः अप्परिणामत्वादोषधीनां तासां पुरुषो रसोऽन्नपरिणामत्वात्पुरुषस्य तस्यापि
पुरुषस्य वाग्रसः पुरुषावयवानां हि वाक्सारिष्ठा अतो वाक्पुरुषस्य रस उच्यते। तस्या अपि वाच ऋग्रसः सार
तरा ऋचः साम रसः सारतरं तस्यापि साम्न उद्गीथः प्रकृतत्वादोंकारः सारतरः एवं स एष उद्गीथाख्य ॐकारो
भूतादीनामुत्तरोत्तररसानामतिशयेन रसतमः परमः परमात्मप्रतीकत्वात् परार्ध्योऽर्ध्यः स्थानं

[illegible] प्रवर्तत इति वाक्य [illegible] ५

परं वतस्वर्दृष्टिवपरार्ध्यं तदर्हतीति परार्ध्यः परमात्मस्थानार्हः । परमात्मवदुपास्यत्वादित्यभिप्रायः ॥ ष्टमः इति
स व्याद्धिरसंख्यायां 'यदुद्गीथोऽष्टम उद्गीथः । कावत्र प्रश्न इत्युक्तं 'कतमा सा ऋक् कतमत्तत्साम 'कतमो वा स उद्गीथः । क
तमा कात्र तमेति वीप्सादरार्था 'ननु बह्वूनां जातिपरिप्रश्ने डतमच् 'नक्षत्रगं जातिबहुत्वं 'कथं डतमच्प्रयोगो 'नैष
दोषो जातौ परिप्रश्ने जातिपरिप्रश्न इत्येवं विग्रहे जातानां व्यक्तीनां बहुत्वोपपत्तेर्न जातेः परिप्रश्न इति विग्रहस्य
ते 'ननु जातेः परिप्रश्न इत्यस्मिन्हि विग्रहे कतमः कठ इत्यादावेकस्यैवोदाहरणमुपपन्नं तत्रापि कठादिजातावेकत्व्य न
क्तिबहुत्वाभिप्रायेण परिप्रश्न इत्यदोषो 'यदि जातेः परिप्रश्नः स्यात्कतमा कतमर्गित्यादावुपसंख्यानं कर्तव्यं
स्याद्विमृष्टं भवति विमर्शः कृतो भवति । विमर्शो हि कृते सति प्रतिवचनोक्तिरुपपन्ना ॥ वागेवर्क्प्राणः साम । वाग् णार
पि वोरेकत्वेनाष्टमत्वव्याघातः 'पूर्वस्माद्वाक्यात्तरस्याद्दृष्टिगुणसिध्यर्थं वाक्प्राणयोर्ऋक्सामयोनी इति वागेवर्क्प्राणः
सामेत्युच्यते यथाक्रमं ऋक्सामयोन्योर्वाक्प्राणयोर्ग्रहणे हि सर्वासामृचां सर्वेषां च साम्नामवरोधः कृतः स्या
४ त्तदवरोधेन च सर्वकामा अवरुद्धाः स्युरित्येतदक्षरमुद्गीथ इति [illegible] कानि वर्त्यते । तदेतदिति मिथु वे
नं निर्दिश्यते । किं तन्मिथुनमित्याह । यच्च । वाक्च प्राणश्च सर्वर्क्सामकारणभूतौ मिथुनं । ऋक्च साम चेति
ऋक्सामकारणा । एतदुक्तं ऋक्सामशब्दोक्तावित्यर्थः । न तु स्वतन्त्रे ऋक्साम च मिथुनमन्यथा हि वाक्प्राणश्चैवं
मिथुनमृक्साम वापरं मिथुनमिति द्वे मिथुने स्यातां । तथा च 'तदेतन्मिथुनमित्येकवचनानिर्देशो नोपप
न्नस्यां तस्माद्वाक्प्राणयोरेव मिथुनत्वं 'तदेतदेवंलक्षणं मिथुनमोमित्येतस्मिन्नक्षरे संसृज्य ॥२॥
ते 'एवं सर्वकामाप्तिगुणविशिष्टं मिथुनमोंकारे संसृष्टं विद्यत इत्योंकारस्य सर्वकामाप्तिगुणविशिष्टत्वं सिद्धं ।
वाङ्मयत्वं ओंकारस्य प्राणनिष्पाद्यत्वं च मिथुनेन संसृष्टत्वं 'मिथुनस्य कामापयितृत्वं प्रसिद्धमित्येतदि
+ सर्वर्क्सामावरोधे च ऋक्सामसाध्यानां कर्मणामवरोधः कृतः स्यात् २

द्वां तदुच्यते। यथा लोके मिथुनौ मिथुनावयवौ स्त्रीपुंसौ यदा समागच्छतो ग्राम्यधर्मतया संयुज्येयातां। तदापयतः आप
यतः अन्योन्यस्येतरेतरस्य तौ कामं। तथा स्वात्मानुप्रविष्टेन मिथुनेन सर्वकामाप्तिगुणवत्त्वमोंकारस्य सिद्धमित्यभि
प्रायः। तदुपासकोप्युद्गाता तद्धर्मा भवतीत्याह। आपयिता ह वै कामानां यजमानस्य भवति। य एतदक्षरमेवमाप्तिगुणव
दुद्गीथमुपास्ते। तस्यैतद्यथोक्तं फलमित्याद्यर्थः। तं यथा यथोपासते तदेव भवतीति श्रुतेः। समृद्धिगुणवांश्चोंका
रः कथं। तद्वा एतत्प्रकृतमनुज्ञाक्षरमनुज्ञा च साक्षरं च तदनुज्ञाक्षरमोंकार इत्यर्थः। कथमनुज्ञेत्याह श्रुतिः
2 एव। यद्धि किंच यत्किंच लोके ज्ञानं धनं वानुजानाति विद्वान्धनी वा तत्रानुमतिं कुर्वन् ओमित्येव तदाह। तथा च वेदे
त्रयस्त्रिंशदित्योमिति होवाचेत्यादि। तथा लोकेपि तवेदं धनं गृह्णामीत्युक्ते ओमित्याह। अत एषा उ एव समृ यथा
द्धिर्यदनुज्ञा। या अनुज्ञा सा समृद्धिस्तन्मूलत्वादनुज्ञायाः। समृद्धो ह्योमिति अनुज्ञां ददाति। तस्मात्समृद्धिगुणवा तं
नोंकार इत्यर्थः। समृद्धिगुणोपासकत्वात्तद्धर्मा सन्समर्धयिता ह वै कामानां यजमानस्य भवति। य एतदेवं विद्वा
नक्षरमुद्गीथमुपास्त इत्यादि पूर्ववत्। अथेदानीमक्षरं स्तौत्युपास्यत्वात्प्ररोचनार्थं। कथं। तेनाक्षरेण प्र
कृतेनेयमृग्वेदादिलक्षणा त्रयीविद्या। त्रयीविद्याविहितं कर्मेत्यर्थः। न हि त्रयीविद्यैवाश्रावणादिभिर्वर्तते। कर्म तु तथा लि
प्रवर्तत इति प्रसिद्धं। कथं। ओमित्याश्रावयत्योमिति शंसत्योमित्युद्गायतीति। लिंगाच्च सोमयाग इति गम्यते। तच्च कर्म
तस्यैवाक्षरस्यापचित्यै पूजार्थं। परमात्मप्रतीकं हि तत्तदपचितिः परमात्मन एव सा। स्वकर्मणा तमभ्यर्च्य सिद्धिं विं
दति मानव इति स्मृतेः। महिम्ना रसेन। किं च तस्यैवाक्षरस्य महिम्ना महत्त्वेन ऋत्विग्यजमानादिप्राणैरित्यर्थः। तथा
तस्यैवाक्षरस्य रसेन व्रीहियवादिनिर्वृत्तेन हविषेत्यर्थः। यागहोमाद्यक्षरेण क्रियते। तच्चादित्यमुपतिष्ठते।
ततो वृष्ट्यादिक्रमेण प्राणोन्नं च जायते। प्राणैरन्नेन च यज्ञस्तायते। अत उच्यते अक्षरस्य महिम्ना रसेनेति। तत्राक्षरवि
ज्ञानवतः कर्म कर्तव्यमिति स्थितमाक्षिपति। तेनाक्षरेणोभौ यश्चैतदक्षरमेवं व्याख्यातं वेद यश्च कर्ममात्रविदक्षर

श्रीः

याथात्म्यं वेद न वेद । तावुभौ कुरुतः कर्म । तत्रार्थात्कर्मसामर्थ्यादेव फलं स्यात् । किं तत्राक्षरयाथात्म्यविज्ञानेनेति । दृष्टं हि
लोके हरीतकीं भक्षयतो रसज्ञस्याज्ञस्य च विरेचनं । नैवं यस्मान्नाना तु विद्या चाविद्या च । भिन्ने हि विद्यावि
द्ये । तु शब्दः पक्षव्यावृत्त्यर्थः । नोङ्कारस्य कर्माङ्गत्वमात्रविज्ञानमृद्धिमात्रविषयमुपासनादि विज्ञानमेव रस
तमाप्तिसमृद्धिगुणवद्विज्ञानं किं तर्हि ततोऽभ्यधिकं । तस्मात्तद्योगाधिकफलत्वं युक्तमित्यभिप्रायो । दृष्टं हि
लोके वणिक्शबरयोः पद्मरागादिमणिविक्रये वणिजो विज्ञानात्फलाधिक्यं । तस्माद्यदेव विद्यया विज्ञानेन
युक्तः सन् करोति श्रद्धया कर्म श्रद्दधानः सन्नुपनिषदा योगेन युक्तः सन्नित्यर्थः । तदेव कर्म वीर्यवत्तरं स्वं गो
मविद्वत्कर्मणोऽधिकफलं भवतीति । विद्वत्कर्म वीर्यवत्तरमिति वचनादविदुषोऽपि कर्म वीर्यवदेव भवतीत्यभिप्रायः ।
न न चाविदुषः कर्मण्यनधिकारः । औषस्त्ये काण्डेऽविदुषामप्यार्त्विज्यदर्शनात् । रसतमाप्तिसमृद्धिगुणवदक्षरमित्ये
कमुपासनमध्यात्मयत्नान्तरादर्शनादनेकैर्हि विशेषणैरनेकधोपास्यत्वात् । एवमेतस्यैव प्रकृतस्योद्गीथाख्य
स्याक्षरस्योपव्याख्यानं भवति ॥ ॥ प्रथमः खण्डः ॥ देवासुरा देवाश्चासुराश्च । देवा दीव्यतेर्द्योतनार्थस्य शास्त्रो
द्भासिता इन्द्रियवृत्तयो देवाश्चासुराश्चैव तद्विपरीताः स्वेष्वेवासुषु विषयविषयासु प्राणनक्रियासु रमणात् स्वा
भाविकतमोत्मिका इन्द्रियवृत्तय एव । ह वै इत्यतीतवृत्तोद्भासिको निपातो । यत्र यस्मिन्निमित्ते इतरेतरविष
यापहारलक्षणे संयेतिरे सं पूर्वस्य यततेः संग्रामार्थत्वमिति संग्रामं कृतवन्त इत्यर्थः । शास्त्रीयप्रकाशवृत्त्यभि
भवनाय प्रवृत्ताः स्वाभाविकतमोरूपा इन्द्रियवृत्तयोऽसुरास्तथा तद्विपरीताः शास्त्रार्थविषयविवेकज्योतिरात्म ॥३॥
नो देवाः स्वाभाविकतमोरूपासुराभिभवनाय प्रवृत्ताः । इत्यन्योऽन्याभिभवोद्भवरूपः संग्राम इव सर्वप्राणिषु प्रतिदेहं
देवासुरसंग्रामोऽनादिकालप्रवृत्त इत्यभिप्रायः । स इह श्रुत्याख्यायिकारूपेण धर्माधर्मोत्पत्तिविवेकविज्ञानाय क

ॐ

स्यते घ्राणविशुद्धिविज्ञानविधिपरतया। उभयेऽपि देवासुराः प्रजापतेरपत्यानि प्राजापत्याः। प्रजापतिः कर्मज्ञाना
धिकृतः पुरुषः पुरुष एवोक्थमयमेव महान्प्रजापतिरिति श्रुत्यंतरात्तस्य हि शास्त्रीयाः स्वाभाविकश्च
करणवृत्तयो विरुद्धा अपत्यानीव तदुद्भवत्वात्तत्र उत्कर्षापकर्षणे लक्षणनिमित्ते ह देवा उद्गीथमुद्गीथ
भक्त्युपलक्षितमौद्गात्रं कर्माजह्रुराहृतवंतः। तस्यापि केवलस्याहरणासंभवात् ज्योतिष्टोमाद्याहृतवंत इत्यभि
प्रायः। तत्किमर्थमाजह्रुरित्युच्यते। अनेन कर्मणैनानसुरानभिभविष्याम इत्येवमभिप्रायाः संतः यदा च तदु त
द्गीथं कर्माजिहीर्षवस्तदा ते ह देवा नासिक्यं नासिकायां भवं तं प्राणं प्राणं चेतनावंतमुद्गीथकर्तारमुद्गा
तारं उद्गीथभक्त्योपासांचक्रिरे कृतवंत इत्यर्थः। नासिक्यप्राणदृष्ट्या उद्गीथाख्यमक्षरमोंकारमुपासांचक्रि
रे इत्यर्थः। एवं हि प्रकृतार्थपरित्यागोऽप्रकृतार्थोपादानं च न कृतं स्यात्। खल्वेतस्यैवाक्षरस्येत्योंकारो ह्युपास्यतया प्रकृतो ननूद्गी
थोपलक्षितं कर्माहृतवंत इत्यवोचस्त्वं। इदानीमेव कथं नासिक्यप्राणदृष्ट्योंकारमुपासांचक्रिर इत्यात्थ। नैष दोषः उद्गीथक
र्मण्येव हि तत्कर्तृप्राणदेवतादृष्ट्या उद्गीथभक्त्यवयवश्चोंकार उपास्यत्वेन विवक्षितो न स्वतंत्रः। तस्मात्तादर्थ्येन कर्माहृतवं
त इत्युक्तमेवोक्तं। तमेवं देवैर्वृतमुद्गातारं ह असुराः स्वाभाविकतमआत्मानो ज्योतीरूपं नासिक्यं प्राणं देवं स्वीयेन पाप्म
नाधर्मासंगरूपेण विविधुर्विद्धवंतः संसर्गं कृतवंत इत्यर्थः। स हि नासिक्यः प्राणः कल्याणगंधग्रहणाभिमानासंगाभिभू
तविवेकविज्ञानो बभूव। स तेन दोषेण पाप्मसंसर्गी बभूव। तदिदमुक्तमसुराः पाप्मना विविधुरिति। यस्मादासुरेण पाप्म
ना विद्धः। तस्मात्तेन पाप्मना प्रेरितो घ्राणः प्राणः उभयं जिघ्रत्यासुरः प्राणिमतस्तेनोभयं जिघ्रति लोकः सुरभि च दुर्गंधि च पा
प्मना ह्येष यस्माद्विद्धः उभयग्रहणमविवक्षितं यस्मात्सुरभिरात्रिमार्जितीति यदेव यदेवेदमप्रतिरूपं जिघ्रति
इति समानप्रकरणात् मुख्यप्राणस्योपास्यत्वाय तद्विशुद्धित्वात् तु पृथक्त्वार्थोऽयं विचारः क्रियतेऽवर्त्तितो। ततस्तत्रासुरादिदे प्र२
वताः क्रमेण विचार्यासुरेण पाप्मना विद्धा इत्यपोह्यंते समानमन्यत्। अथ ह वाचं चक्षुः श्रोत्रं मन इत्याद्यनुक्तौ अप

न्यास्त्वगसनादिदेवताः स्पृष्ट्वा। एवमु खल्वेता देवताः पाप्मभिर्लिप्ता इति शेषः। तदासुरविद्धत्वात्। घ्राणादिदेवताअ
पोह्याथानंतरं यएवायं प्रसिद्धो मुखे स्थितो मुख्यः प्राणस्तं हृदीथमुपासांचक्रिरे। तं हासुराः पूर्ववद्धत्वा प्राप्य विदध्व
सुर्विरे नष्टा अस्मिप्राय मात्रेण अकृत्वा किं विद्दपि प्राप्यास्य। कथं विनष्टा इत्यत्र दृष्टांतमाह। यथा लोके ऽश्मानमाखणं
नष्टा कर्तुं तेर खनितुं कुद्दालादिभिरपि लेष्टुं नशक्यो ऽखणएवाखणः। तमश्मानं सामर्थ्याद्दृष्टो लोष्टः पांसुपिंडः ऋत्वंतरा ऽ
नूमनिक्षिप्तो ऽस्मलेदनादिप्रायेनैण। तस्यास्मन्तु किं विदध्वस्त्वा स्वयं विध्वंसेत विदीर्येत एवं विदध्वस्त इत्यर्थः। एवं विसुरो ऽ
सुरैरर्पितत्वात् घ्राण इत्येवं विदः प्राणश्च स्तस्य फलमाह। यथा अश्मानमित्येषएव दृष्टांतः एवं हैव सविध्वंसते विनश्यति।
को ऽसौ इत्याह। यएवं विदि यथोक्तप्राणविदि पापं तदनर्थ्यर्हं कर्तुं कामयते इच्छति। यश्चाप्येनमभिदासति हिनस्ति
प्राणविदं प्रत्याक्रोशताडनादि प्रयुंक्ते सोप्येवमेव विध्वंसत इत्यर्थः। यस्मात्स एष प्राणवित् प्राणस्तस्मादश्मा खणः
वाऽश्माखणो ऽखणो ऽधर्षणीय इत्यर्थः। ननु नासिको ऽपि प्राणो वायुरेवाय था मुख्यः। तत्र नासिक्यः प्राणः पाप्मना ऽ
मु विध्वः प्राणस्त्वसन्नो मुख्यः कथं नैष दोषो नासिकास्थस्थानकरणवैगुण्यादि दोषवाच्यत्वात्मापि सन्मुख्यः स्थानदे
वां वता बलीयस्त्वा स्वान्नविद्ध इति युक्तं। यथा ऽश्मादयः त्रिधा वसुरूपास्त्रयाः कार्यं विध्वंसे कुर्वंति नान्यत्र स्थगतास्तद
दोषवत्घ्राणसविवत्वाद्धाविद्धा घ्राणादेवता नमुख्यो यस्मान्नमुविद्धोऽसुरैर्मुख्यस्तस्मान्नैवैतेन सुरूरस्ति दुर्गंधि चि
वा विजानाति घ्राणेनैव तदुभयं विजानाति लोकः। को ऽसौ तत्त्वपापमकार्यादर्शनादपहतपाप्मापहतो विनाशितोपनीतः
पाप्मा यस्मात्सो ऽयमपहतपाप्मा लेपाविशुद्ध इत्यर्थः। यस्माच्चासंसर्गी परिपाः कल्याणघ्रासंगवत्वाद्घ्राणादयो नत
था तस्मान्मुख्यः किं तर्हि सर्वार्थः। कथमित्युच्यते नमुख्येन यदश्नाति यत्पिबति लोकस्तेन नाश्नाति न पीतेन वेतरा
न्घ्राणादीनवति पालयति। तेन हि तेषां स्थितिर्भवतीत्यर्थः। अतः सर्वस्तरिः प्राणो ऽतो विरुद्धुद्धः। कथं पुनर्मुख्या ॥४॥
शितपीताभ्यां स्थितिरेषां गम्यत इति उच्यते एतं मुख्यं प्राणं मुख्यस्य प्राणस्य वृत्तिमान्नपाने इत्यर्थो ततस्तों तेम
रणाकाणे ऽक्ले ऽबिला ऽस्मादुत्क्रामति। घ्राणादिप्राणः समुदाय इत्यर्थः। अप्राणोऽपि नन्नाक्रोऽत्यन्तं पातुं वा।

गा१

तेनोऽक्रांतिप्रसिद्धा ग्रौ दिकत्वाय स्य ... यते ह्यक्रांतौ। प्राणस्या न्नि त्रिवातो ध्याद दास्येवा स्यविदारणं करोतीत्यर्थः
तद्देनाना लासेऽक्रांतस्य लिंगं तं हांगिरा ॥ तं मुख्यं प्राणं हस्तांगिरा इत्येवं गुणामुद्गीथमुपासांचक्रे उपासनं कृतवान्॥
वकोदाल्भ्य इति वक्ष्यमाणेन संबध्यते। तथा बृहस्पतिरित्यायास्य इति चोपासांचक्रे बक इत्येवं संबंधं कृतवंतः केचिदे
तं मुपोर एवांगिरसं बृहस्पतिमायास्यं प्राणं मन्यंते न्यंत इति वदन्तो न्नाद्भवत्येवं यथाकृताऽसंलवे संलवति कुप
थाऽकृतमृषिविवादनायामपि। अन्यंतरं वा। तस्मात् ... लावत्कृते। एतमेव संतमृषिमपि तथा माध्या... लिमाग
समदो विश्वामित्रो मित्रो वामदेवो त्रिरित्यादि ऋषीनेव प्राणमापादयति श्रुतिः। तथैतानप्यृषीन् प्राणोपासनेनांगिरो बृहस्पतिरा का२
ति। आयास्यान्प्राणान् करोत्यतेद विज्ञानाय 'प्राणो ह पिता प्राणो माता' इत्यादिवत् तस्मादृषिरंगिरा नाम प्राण एव सन्नं
आनमंगिरसं प्राणमुद्गीथमुपासांचक्रे इत्येतद् यस्मात् सोंऽगानां प्राणः सन्रसः तेनासावांगिरसस्तथा वाचो बृहत्या
पतिस्तेनासौ बृहस्पतिस्तमैथायाय यस्मादास्यादयते निर्गच्छति तेनायास्य ऋषिः प्राण एव सन्नित्यर्थः। तस्मात्
मुपासक आत्मानमेवांगिरसादिगुणं प्राणमुद्गीथमुपासीतेत्यर्थो न केवलमंगिरःप्रभृतय एव उपासांचक्रिरे।
ब तं ह बको नाम दाल्भ्यः पतंदाल्भ्यो विदांचकार। यथा दर्शितं प्राणं विज्ञातवान्। विदित्वा च स ह नैमिषीयानां सत्रिणां
उद्गाता बभूव। स च प्राणविज्ञानसामर्थ्यादेभ्यो नैमिषीयेभ्यः कामानागायति स्म ह। आगीतवान् किलेत्यर्थः। तथान्योऽप्यु
द्गाता आगाता ह वै कामानां भवति। य एवं विद्वान् यथोक्तगुणं प्राणमक्षरमुद्गीथमुपास्ते तस्यैतद् दृष्टं फलमुक्तं
प्राणात्मभावस्त्वदृष्टं देवो भूत्वा देवानप्येतीति श्रुत्यंतरात्सिद्धमिदं भवतीति प्रायः इत्यध्यात्ममेतदेवं उद्गीथात्मविषयमुद्गीथो
पासनमित्युक्तोपसंहारो विदेवतोद्गीथोपासनेवक्ष्यमाणे बुद्धिसमाधानार्थः ॥२॥ अथाधिदैवतं देवताविषय
षयमुद्गीथोपासनं प्रस्तुतमित्यर्थः। अनेकधोपास्यत्वादुद्गीथस्य य एवासावादित्यस्तपति तमुद्गीथमुपासीतादि
त्यदृष्ट्योद्गीथमुपासीतेत्यर्थः। तमुद्गीर्थमित्युद्गीथशब्दवाच्योऽक्षरवाचीसन् कथमादित्यवर्तितः उच्यते उद्यन् ... छा
दा१

स्य२

न्येष प्रजाभ्यः प्रजार्थं उद्गायति प्रजानामन्नोत्पत्त्यर्थं। न ह्यनुद्यति तस्मिन्व्रीह्यादेः पक्तिः स्यादत उद्गायन्निवोद्गायतीति यथै
वोद्गातान्नार्थं मत उद्गीथः सवितेत्यर्थः। किं चोद्यन्नैशं तमस्तज्जं च भयं प्राणिनामपहंति। तमेवं गुणं सवितारं यो वेद।
सोपहंता नाशयिता ह वै भयस्य जन्ममरणादिलक्षणस्यात्मनस्तमसश्च तत्कारणस्याज्ञानलक्षणस्य भवति। यद्यपि
स्थानभेदात्प्राणादित्यौ भिन्नाविव लक्ष्येते तथापि न स्वतत्त्वभेदस्तयोः। कथं समान उ एव तुल्य एव प्राणः सवित्रा गुणतः।
सविता च प्राणेन यस्मादुष्णोयं प्राणः उष्णश्चासौ सविता। किं च स्वर इतीमं प्राणमाचक्षते कथयंति। तथा स्वर इति प्रत्यास्व
र इति चामुं सवितारं यस्मात्प्राणः स्वरत्येव न पुनर्मृतः प्रत्यागच्छति सविता त्वस्तमित्वा पुनरप्यहन्यहनि प्रत्यागच्छत्यतः
प्रत्यास्वरोयस्मादेवं गुणतो नामतश्च समानावितरेतरं प्राणादित्यावतः सतत्त्वाभेदादेतं प्राणमिमममुं चादित्यमुद्गी म०
थमुपासीत। अथ खलु इति प्रकारांतरेणोपासनमुद्गीथस्योच्यते। व्यानमेव वक्ष्यमाणलक्षणं प्राणस्यैव वृत्तिवि
शेषमुद्गीथमुपासीत। अधुना तस्य तत्त्वं निरूप्यते। यद्वै पुरुषः प्राणिति मुखनासिकाभ्यां वायुं बहिर्निःसारयति स प्रा
णाख्यो वायोर्वृत्तिविशेषः यदपानित्यपश्वसिति। ताभ्यामेवांतराकर्षति वायुं। सोपानोपानाख्या वृत्तिः। ततः कि
मित्युच्यते। अथ य उक्तलक्षणयोः प्राणापानयोः संधिस्तयोरंतरा वृत्तिविशेषः स व्यानो यः सांख्यादिशास्त्रप्र
सिद्धः श्रुत्या विशेषनिरूपणान्नासौ व्यान इत्यभिप्रायः। कस्मात्पुनः प्राणापानौ हित्वा महता यासेन व्यानस्यैवोपास
नमुच्यते वीर्यवत्कर्महेतुत्वात्। कथं वीर्यवत्कर्महेतुत्वमित्याह। यो व्यानः सा वाक् व्यानकार्यत्वाद्वाचः। यस्माद्व्याननिर्व
र्त्या वाक् तस्मादप्राणन्ननपानन्प्राणापानव्यापारावकुर्वन्वाचमभिव्याहरत्युच्चारयति। लोकस्तथा वाग्विशेषमृचमृ
क्संस्थं साम सामावयवं चोद्गीथमप्राणन्ननपानन्व्यानेनैव निर्वर्तयतीत्यभिप्रायः। न केवलं वागाद्यभिव्याहर ॥५॥
णमेवातोस्मादन्यान्यपि यानि वीर्यवंति कर्माणि प्रयत्नाधिक्यनिर्वर्त्यानि यथाग्नेर्मथनमाजेर्मर्यादायाः सरणं धा
वनं दृढस्य धनुष आयमनमाकर्षणमप्राणन्ननपानंस्तानि करोत्यतो विशिष्टो व्यानः प्राणादिवृत्तिभ्यो विशि

र्थं ५

दृष्ट्योपासनं न्याय्यं। फलवत्वात्प्राणोपासनवत्। एतस्य हेतोरेतस्मात्कारणाद्ध्यानमेवोद्गीथमुपासीत ना
न्यद्धत्वं तद्। कर्मवीर्यवत्तरत्वफलमथाधुनाखलूद्गीथाक्षराण्युपासीतेत्यक्षराणि मा भूवन्नित्यतो विशिनष्टि उद्
गीथ इत्युद्गीथ नामाक्षराणि। अथ नामाक्षरोपासनेपि नामवत एवोपासनं कृतं स्यादमुकमिश्रा इतियद्वत्। प्राण
एवोदित्यस्मिन्नक्षरे प्राणदृष्टिः। कथं प्राणस्योत्त्वमित्याह। प्राणेन ह्युत्तिष्ठति सर्वो प्राणस्यावसाददर्शनात्। अतोस्त्यु
दः प्राणस्य च सामान्यं। वाग्गीर्वाचो ह गिर इत्याचक्षते शिष्टाः। तथान्नं थमन्ने हीदं सर्वं स्थितमतोस्त्यन्नस्य थकार
मा स्य च सामान्यं। त्रयाणां श्रुत्युक्तानि सामान्यानि। तानीतराणि तेनानुरूपेण योज्येष्वपि द्रष्टव्यानि। द्यौरेवोदुच्चैःस्थानादन्तरिक्षं
गीर्गिरणाल्लोकानां। पृथिवी थं प्राणिस्थानात्। आदित्य एवोदूर्ध्वत्वात्। वायुर्गीरग्न्यादीनां गिरणात्। अग्निस्थं याज्ञी
यकर्मावस्थानात्। सामवेद एवोत् स्वर्गसंस्तुतत्वात्। यजुर्वेदो गीर्यजुषा प्रत्तस्य हविषो देवतानां गिरणात्। ऋग्वेदस्थं मृच्य
ध्यूढत्वात्साम्नः। उद्गीथाक्षरोपासनस्य फलमधुनोच्यते। दुग्धे दोग्ध्यस्मै साधकाय। कासौ वाक्। दोहं। कोसौ दोह इत्या
ह। यो वाचो दोहः ऋग्वेदादिशब्दसाध्यं फलमित्यभिप्रायस्तद्वाचो दोहस्तं स्वयमेव वाग्दोग्ध्यात्मानमेव दोग्धि। किं चान्नवा
न्प्रभूतान्नोन्नादो दीप्ताग्निश्च भवति। य एतानि यथोक्तान्येवं यथोक्तगुणान्युद्गीथाक्षराणि विद्वान्सन्नुपास्त उद्गी
थ इत्यथ खल्विदानीमाशीः समृद्धिराशिषः कामस्य समृद्धिर्यथा भवेत्तदुच्यत इति वाक्यशेषः। उपसरणान्युप
सर्तव्यान्युपगन्तव्यानि ध्येयानीत्यर्थः। कथमित्युपासीतैवमुपासीत। येन साम्ना येन साम्नविशेषेण स्तोष्यन् स्तुति मा
करिष्यन्स्यादुद्गाता तत्सामोपधावेदुपसरेच्चिन्तयेदुत्पत्त्यादिभिः। यस्यां ऋचि तत्साम तां चर्चमुपधावेद्देवतादिभिः
यदार्षेयं साम तमृषिं यां देवतामभिष्टोष्यन्स्यात्तां देवतामुपधावेत्। येन छन्दसा गायत्र्यादिना स्तोष्यन्स्यात्तच्छन्द के ३
उपधावेत्। येन स्तोमेन स्तोष्यमाणः स्यात्। स्तोमांगफलस्य कर्तृगामित्वादात्मनेपदं स्तोष्यमाण इति। तं स्तोममुपधावेत्
यां दिशमभिष्टोष्यन्स्यात्तां दिशमुपधावेदधिष्ठात्रादिभिः। आत्मानमुपजातः स्वं रूपं गोत्रनामादिभिः सामादीन्क्रमेण स्वं

त्रा: त्रै

द्विरुक्तिः समाप्त्यर्था २

द्वि॰ २

वात्मानमंततो न्तउपसृत्य स्तुकामं ध्यायन्नप्रमत्तः स्वरोष्मव्यंजनादिभ्यः प्रमादमकुर्वन्स्ततोऽभ्याशः क्षिप्रमेवह यद्य
दे त्रास्मा एवंविदे स कामः समृध्येत समृद्धिं गच्छेत् कोसौ यत्कामो यः कामोस्य सोयं यत्कामः सन् स्तुवीतेति॥२॥ ओमित्येतदि
त्यादिप्रकृतस्याक्षरस्य पुनरुपादानमुद्गीथाद्यक्षरोपासनांतरितत्वादन्यत्र प्रसंगो मा भूदित्येवमर्थं प्रकृतस्यैवाक्षरस्या
मृताभयगुणविशिष्टस्योपासनं विधातव्यमित्यारंभः। ओमित्यादि व्याख्यातं। देवा वै मृत्योर्मारकाद्बिभ्यतः किं कृतवंत
इत्युच्यते त्रयीं विद्यां त्रयीविहितं कर्म प्राविशन् प्रविष्टवंतः वैदिकं कर्म प्रारब्धवंत इत्यर्थः। तन्मृत्योस्त्राणं मन्यमानाः।
किंच ते कर्मण्यविनियुक्तैश्छंदोभिर्मंत्रैः जपहोमादि कुर्वंत आत्मानं कर्मांतरेष्वच्छादयंश्छादितवंतः। यद्यस्मादेभिर्मंत्रैरच्छा
तां॰ दितवंतः तत्तस्माच्छंदसां मंत्राणां छादनाच्छंदस्त्वं प्रसिद्धमेव। तांस्तत्र देवान् कर्मपरान्मृत्युः यथा लोके मत्स्यघातको
मत्स्यमुदके नातिगंभीरे परिपश्येद्बडिशोदकस्रावोपायसाध्यं मन्यमानः एवं पर्यपश्यत् दृष्टवान्मृत्युः कर्मक्षयोपा
ऽर्थ॰ येन साध्यान् देवान्मेने इत्यर्थः। क्वासौ देवान् ददर्शेत्युच्यते ऋचि साम्नि यजुषि ऋग्यजुःसामसंबद्धे कर्मणीत्यर्थः। ते
देवा वैदिकेन कर्मणा संस्कृताः शुद्धात्मानः संतो मृत्योश्चिकीर्षितं विदितवंतो विदित्वा च ते ऊर्ध्वा व्यावृत्ताः कर्मभ्यः ऋचः
साम्नो यजुषः। ऋग्यजुःसामसंबद्धात्कर्मणोऽभ्युत्थायेत्यर्थः। तेन कर्मणा मृत्युभयापगमं प्रति निराशास्तदपास्या
स्वर६ मृताभयगुणमक्षरं स्वरं स्वरशब्दितं प्राविशन्नेव प्रविष्टवंतः ॐकारोपासनपराः स्तदुपासनपराः संवृत्ता इत्यर्थः। न ११
अप५ एवशब्दोऽवधारणार्थः समुच्चयप्रतिषेधार्थः। कथं पुनः स्वरशब्दवाच्यत्वमक्षरस्येत्युच्यते यदा वा ऋचमाप्नोत्योमित्ये ॥६॥
वातिस्वरत्येवं सामैवं यजुः एष उ स्वरः कोसौ यदेतदक्षरमेतदमृतमभयं तत्प्रविश्य यथागुणमेवामृता अभयाश्चा
न्द३ भवन्देवाः। स य एतदेवं विद्वानक्षरं प्रणौति स्तौति। उपासनमेवात्र स्तुतिरभिप्रेता। स
तथैवैतदेवाक्षरं स्वरममृतमभयं प्रविशति। तत्प्रविश्य च राजकुलं प्रविष्टानामिव राज्ञोऽन्तरंगबहिरंगतावत् न पर
स्य ब्रह्मणोऽन्तरंगबहिरंगताविशेषः। किं तर्हि यदमृता देवा येनामृतत्वेनामृता अभवन् तेनैवामृतत्वेन विशिष्टः

सन्द५

१ + खलु य उद्गीथः स प्रणवो बहवो वा नामऋ प्रणव क्तेपासस्य वक्षो दोषेय उद्गीथ ह्युक्तवानसि २

स्तदमृतोऽभवति । न त्वकृतत्वं नाप्यधिकत्वं अर्थितेमृतत्व इत्यर्थः ॥४॥ प्राणादित्य दृष्टि विशिष्टस्योद्गीथस्योपा
सनमुक्तमेवानूद्य प्रणवोद्गीथयोरेकत्वं कृत्वा तस्मिन्नापरस्मिन्सद्गुणविशिष्ट दृष्ट्यान्तरस्योपासनमेवं
कपुत्रफलदमिदानीं वक्तव्यमित्यारभ्यते । अथ खलु य उद्गीथ इत्यादि । असौ वा आदित्य उद्गीथ एष प्रणवः प्रणवत्वाद्वाच्यो
यिसस्य उ बहवानां नानात्व उद्गीथ आदित्यः कथमुद्गीथस्याक्षरमो मित्येतदेष ह्यादित्यस्स्वयं ननुच्चारयन्नु अनेक
र्थत्वाद्धातूनां मथवा स्वरन्गच्छन्नेति अतो सा उद्गीथः स वैतमेवमु एवाहमभ्यगासिषमालिमुख्येन
गीतवानस्म्यादित्यरश्मयस्तेन व्याख्यानं कृतवानस्मीत्यर्थः । तेन तस्मात्कारणान्मम त्वमेकोऽसि कौषीतकि पुत्र इ
ति ह कौषीतकिः कुषीतकस्यापत्यं कौषीतकिः पुत्रमुवाचोक्तवान् । रश्मीनादित्यं च भेदेन त्वं पर्यावर्त्तयात्
पर्यावर्त्तयेदित्यर्थः । तंयोगादेवं बहवो वै ते तव पुत्रा भविष्यन्तीत्यधिदैवतम् । अथाधानंतरमध्यात्ममुच्यते । य
वायं मुख्यः प्राणस्तमुद्गीथमुपासीतेत्यादि पूर्ववदोमिति ह्येष प्राणोऽपि स्वरन्नेत्योमिति ह्यनुज्ञां कुर्वन्निव वागा
दिप्रवृत्त्यर्थमेतीत्यर्थः । न हि मरणकाले मुमूर्षोः समीपस्थाः प्राणस्योंकरणं शृण्वन्ति । एतत्सामान्यादादि
त्येऽप्योंकरणमनुज्ञामात्रं द्रष्टव्यम् । एतमुएवाहमभ्यगासिषमित्यादि पूर्ववदतो वागादीन्मुख्यं च प्राणं भेदगुण
विशिष्टमुद्गीथं पश्यन्भूमानं मनसाभिगायताद् पूर्ववदावर्त्तयेत्यर्थः । बहवो वै मे मम पुत्रा भविष्यन्तीत्येवम
भिप्रायः सन्नित्यर्थः । प्राणादित्यैकत्वोद्गीथदृष्टेरेकपुत्रत्वफलदोषेणापोदितत्वाद् रश्मिप्राणभेददृष्टेः कर्तव्य
तावा द्युतेस्मिन्खण्डे बहुपुत्रफलार्थमथ खलु य उद्गीथ इत्यादि प्रणवोद्गीथैकत्वदर्शनमुक्तं । तस्यैतत्फलं
मुच्यते । होतृषदनाद्धोता यत्रस्थः शंसति । तत्स्थानं होतृषदनं हौत्रात्कर्मणः सम्यक्प्रयुक्तादित्यर्थः । न हि देश
मात्रात्फलमाहर्तुं शक्यं । किं तद्धैवापि दुरुद्गीथं तदुद्गीथं दुष्टमुद्गीतमुद्गात्रा स्वकर्मणि क्षते कृतमित्यर्थः ।
तदनुसमाहरति अनुसंधत्त इत्यर्थः । चिकित्सयेव धातुवैषम्यसमीकरणमिति ॥५॥ अथेदानीं सर्वफलस
पत्त्यर्थमुद्गीथस्योपासनान्तरं विधित्स्यत इयमेवर्क् पृथिवी ऋग्दृष्टिः कार्या तथाग्निः साम साम दृष्टिः क
थं पृथिव्यग्न्योर्ऋक्सामत्वमित्युच्यते तदेतदग्न्याख्यं सामैतस्यामृचि पृथिव्यामध्यूढमधिगतमुपरिभावेन

नी२

स्थितमित्यर्थः । ऋचीव साम तस्मादत एव कारणादृच्यध्यूढमेव साम गीयत इदानीमपि सामगैः । यथा वत्र
क्सामे नात्यंतं भिन्ने न्योन्यं तथैतौ पृथिव्यग्नी कथमियमेव पृथिवी सा सामशब्दार्द्धं तु द्वयोश्चा । इतरा
र्द्धो द्वितीयो ऽयोग्निरमः । तदेतत्पृथिव्यग्निद्वयं सामैकशब्दाभिधेयत्वमापन्नं साम तस्मान्नान्योन्यं भि
नी४ न्नं पृथिव्यग्निद्वयं नित्यसंश्लिष्टमृक्सामे इव । तस्माच्च पृथिव्यग्न्योर्ऋक्सामत्वमित्यर्थः । सामाक्षरयोः पृ
थिव्यग्निदृष्टिविधानार्थमियमेव साग्निरम इति केचित् । अंतरिक्षमेवर्ग्वायुः सामेत्यादि पूर्ववदेव नक्षत्राणा
मधिपतिश्चंद्रमा । ऽतऽ स साम । अथ यदेतदादित्यस्य शुक्लं भाः शुक्ला दीप्तिः सैवर्क् । अथ यदादित्ये नी
लं परः कृष्णं परातिशयेन कार्ष्ण्यं तत्साम तदेकांतसमाहितदृष्टेर्दृश्यते । त एवैते भासौ शुक्लकृष्णत्वे सा
ऽमश्च साम । अथ य एषोंतरादित्ये आदित्यस्यांतर्मध्ये हिरण्मयो हिरण्मय इव हिरण्मयो न हि सुवर्णवि
कारत्वं देवस्य संभवति । ऋक्सामगेष्णत्वापहतपाप्मत्वासंभवात् । न हि सौवर्णे ऽचेतने पाप्मादिप्राप्ति
रस्ति येन प्रतिषिध्येत । चाक्षुषे चाग्रहणात् । अतो लुप्तोपम एव हिरण्मयशब्दो ज्योतिर्मय इत्यर्थः । उ
त्तरेष्वपि समाना योजना । पुरुषः पुरि शयनात् पूरयति वा स्वेनात्मना जगदिति । दृश्यते निवृत्तचक्षु
र्भिः समाहितचेतोभिर्ब्रह्मचर्यादिसाधनापेक्षैः । तेजस्विनोपि श्मश्रुकेशादयः कृष्णाः स्युरित्यतो
विशिनष्टि हिरण्यश्मश्रुर्हिरण्यकेश इति । ज्योतिर्मया एवास्य श्मश्रवः केशाश्चेत्यर्थः । आप्रणखात्
प्रणखो नखाग्रं नखाग्रेण सह सर्वः सुवर्ण इव भारूप इत्यर्थः । तस्यैवं सर्वतः सुवर्णवर्णस्याप्यक्ष्णो ५७॥
र्विशेषः । कथं तस्य यथा कपेर्मर्कटस्यासः कप्यासः । आसेरुपवेशनार्थस्य करणे घञ् कपिपृष्ठांतो ना
येनोपविशति कप्यास इव पुंडरीकमत्यंततेजस्वि एवमस्य देवस्याक्षिणी उपमितोपमत्वान्न हीनोप
मा । तस्यैवं गुणविशिष्टस्य गौणमिदं नामोदिति । कथं गौणत्वं स एष एदेयः सर्वेभ्यः पाप्मभ्य उत्पाप्मना

स इतत्कार्यैस्त्यक्त इत्यर्थो य आत्मापहतपाप्मेत्यादि वक्ष्यति। उदित उद्गत इत उद्गत इत्यर्थः। सोऽसावुन्नामा तमेवं गु
णसंपन्नमुन्नामानं यथोक्तेन प्रकारेण यो वेद सोऽप्येवमेवोदेत्युद्गच्छति सर्वेभ्यः पाप्मभ्यो ह वा इत्यवधार
णार्थौ निपातौ उदेत्येवेत्यर्थः। तस्योद्गीथत्वं देवस्यादित्यादीनामिव विवक्षितत्वादाह। तस्य ऋक् च साम च गेष्णौ
पृथिव्याद्युक्तलक्षणे पर्वणी सर्वात्मा हि देवः परापरलोककामेशितृत्वाद्युपपद्यते पृथिव्यग्न्याद्यृक्सामे
गेष्णत्वं सर्वयोनित्वाच्च। यत एवमुन्नामा चासावृक्सामगेष्णश्च तस्मादृक्सामगेष्णत्वप्राप्त्यै उद्गीथत्वमुच्यते परो
क्षेण परोक्षप्रियत्वाद्देवस्य तस्मादुद्गीथ इति। तस्मादेव हेतोरुद्गायतीत्युद्गाता यस्माद्ध्येतस्य यथोक्तस्य उ
न्नाम्नो गाता सोऽतोऽयुक्त उद्गातेति नामप्रसिद्धिरुद्गातुः। स एष देव उन्नामा ये चामुष्मादादित्यात्पराञ्चः पर्वे लो
कं च नः ऊर्ध्वा लोकास्तेषां लोकानां चेष्टे। न केवलमीशितृत्वमेव चक्षुषोऽध्यात्मस्य पतिवा स दाधार पृथिवीं द्यामुतेमा
मित्यादिमन्त्रवर्णात्। किं च देवकामानामीष्टे इत्येतदधिदैवतं देवताविषयं देवस्योद्गीथस्य स्वरूपमुक्तं ॥ ६ ॥
अथाधुनाध्यात्ममुच्यते। वागेवर्क् प्राणः सामाधरोपरिस्थानत्वसामान्यात्प्राणो घ्राणमुच्यते। सह वायुना। वा
गेव साम प्राणोऽमेत्यादि पूर्ववच्चक्षुरेवर्गात्मा सामात्मेति छायात्मा तत्स्थं चा साम श्रोत्रमेवर्क् मनः साम श्रोत्रस्याधि
ष्ठातृत्वान्मनसः सामत्वम्। अथ यदेतदक्ष्णः शुक्लं भाः सैवर्गथ यन्नीलं परः कृष्णमादित्य इव दृक्शक्त्यधिष्ठानं त
त्साम। अथ य एषोऽन्तरक्षिणि पुरुषो दृश्यते पूर्ववत्सैवर्गध्यात्मं वागाद्या पृथिव्याद्या चाधिदैवतं। प्रसिद्धा च पादब
द्धाक्षरात्मिका। तथा साम उक्थं स्तोत्रं साम उक्थं शस्त्रमृग्भ्योऽन्यत्तथा यजुः स्वाहा स्वधा वष
डादि सर्वमेव वाग्यजुः स एव सर्वात्मकत्वात्सर्वयोनित्वाच्चेति ह्यवोचाम। ऋगादिप्रकरणात्तद्ब्रह्मेति त्रयो वेदा
स्तस्यैतस्य चाक्षुषस्य पुरुषस्य तदेव रूपमतिदिश्यते। किं तद्यदमुष्यादित्यपुरुषस्य तदेव रूपं हिरण्मय इत्या
दि यदधिदैवतमुक्तं। यावमुष्य गेष्णौ पर्वणी। ताविह चाक्षुषस्य गेष्णौ। यच्चामुष्य नामोदिति। उद्गीथ इति च तदेवास्य

नामरूपवानीनस्येश्वरादाकूपनांमांगुणनामा हैं इति देवादीनिर्दिष्टत्वविषयस्तेद्व्यपदेशाच्चादित्यचाक्षुषयोर्भेदश्रुतिवेन्नोभयोर्मुन्नो
अनेकानैवैयेकस्योल्पयत्मत्राद्यानुपपत्ते हिंचालावोनोपपद्यतइतिवेन्नवक्ष्यति हिसएकधास्तवतित्रिधासवतीत्यादिना
नामवितनस्यैकस्यनिरवयवत्वात् द्विधासीं भावानुपपन्नेस्तस्मादस्याःमाधिदैवतयोरेकत्वमेव यत्नुरूपाद्यतिदंगो
सेदः कारणमवीवो ननुइदावगमाय। किंतु हिंस्थानभेदाद्रूपद्रुत्वांकामान्तरित्येवमर्थस्य एवैष चाक्षुषःपुरुषः। येचैत
तस्मादाध्यात्मिकादस्मनोवांचोर्वांकनालोकास्तेषांचेष्टेमनुष्यसंबंधिनांचकामानां। तत्तस्मादुइमेवीणायांगायं
तिगायकाएतस्तएवैतमेवगायंति यस्मादीश्वरंगायंति तस्मात्तेधनंसनयोधनलाभयुक्ताधनवंतइत्यर्थः। अथयएत
देवंविद्वान्यथोक्तंदेवमुद्गीथं विद्वान्सामगायति उभौसगायति चाक्षुषमादित्यंच तस्यैवंविदःफलमुच्यते। सोमुनैवा
दित्येनसएषयेचामुष्मात्पराञ्चोलोकास्तांश्चाप्नोति आदित्यांतर्गतदेवोभूत्वेत्यर्थो देवकामांश्चाथानेनैवचाक्षु
षेणैवयेचैतस्माद्र्वाञ्चोलोकास्तांश्चाप्नोतिमनुष्यकामांश्चचाक्षुषोभूत्वेत्यर्थः। तस्मादुहैवंविदुद्गाताब्रूयाद्यजमानंकिं
तेकामंआगायानीत्येष हि यस्मादुद्गाताकामगानस्येष्टे अनेनकामंसंपादयितुमीष्टेसमर्थइत्यर्थः। कोसौ। यएवं
विद्वान्सामगायति सामगायति द्विरुक्तिरुपासनसमाप्त्यर्था। ॥७॥ अनेकधोपास्यत्वादक्षरस्यप्रकारांतरेणपरो
वरीयस्त्वगुणफलमुपासनांतरमानिनायेतिहासः। सुखावबोधनार्थस्त्रयस्त्रिसंख्याकाः ह इति ऐतिह्यार्थः।
उद्गीथेउद्गीथज्ञानंप्रतिकुशलाबभूवुः निपुणाबभूवुः। किस्मिंश्चिद्देशेकालेचनिमित्तेचासमेतानामित्यभिप्रायोन
हिसर्वस्मिन्जगतित्रयाणामेवकौशलमुद्गीथादिविज्ञानेश्रूयंते ह्युषस्तिजानश्रुतिकैकेयप्रभृतयःसर्वज्ञकल्पाः
त्रि॰ २ केतेत्रयइत्याह। शिलकोनामतःशालावत्यस्यापत्यंशालावत्यः चैकितायनस्यापत्यंचैकितायनोदाल्भ्योगोत्रेणदाल्भ्यो ॥८॥
द्व्यामुष्यायणोवा प्रवाहणोनामतो जीवलस्यापत्यंजैवलिरित्येतेत्रयस्तेहोचुरन्योन्यमुद्गीथेवैकुशलानिपुणाः स्म
इतिप्रसिद्धाःस्मोऽतोहंतयद्यनुमतिर्भवतामुद्गीथेउद्गीथज्ञाननिमित्तांकथांविचारणांपक्षप्रतिपक्षोपन्यासे

+ कागतिरितिप्राण इति होवाच प्राणनिष्पाद्यो हि स्वरस्तस्मात्स्वरस्य ८

नवदामोवादंकुर्मइत्यर्थः। तथाचसत्य। द्विषसंवादे विपरीतग्रहणनाशोऽपूर्वविज्ञानोपजनः संशयनिवृत्तिश्चेत्यतस्त
द्विषसंवादे विपरीतग्रहणेनाशोऽपूर्वविज्ञानोपज योगः कर्त्तव्यइतिचेतिहासप्रयोजनं। दृश्यते हि शिलकादीनां
तथेत्युक्त्वातेसमुपविविशुरुपविष्टवंतः किल। तत्रराजाः प्रागल्भ्यमुपपत्तेः सहप्रवाहणोजैवलिरुवाचेतरौ भगवंतौ
पूज्यावंतौ। अग्रेपूर्वंवदतां ब्राह्मणयोरितिलिंगाद्राजाऽसौ। युवयोर्ब्राह्मणयोर्वदतोर्वाचं श्रोष्यामीत्यर्थरहितामित्य
र्वाचमिति विशेषणादुक्तयोः। सह शिलकः शालावत्यश्चैकितायनं दाल्भ्यमुवाच। हंत त्वा पृच्छानीत्युक्तवानीत्यपृच्छेति
नासुक्ते इतरः पृच्छेतिहोवाच। लब्धानुमतिराह। कासाम्नः प्रकृतत्वादुद्गीथस्योद्गीथो ह्यत्रप्रकृतः। परोवरीयां
सम्भुद्गीथमितिचवक्ष्यति। गतिराश्रयः परायणमित्येतदेवं पृष्टो दाल्भ्य उवाच। स्वरइति। स्वरात्मकत्वात्साम्नो योय
दात्मकः सतद्गतिस्तदाश्रयश्चभवतीति युक्तं। मृदाश्रयइवघटादिः। स्वरस्यप्राणोगतिः। प्राणस्यकागतिरित्यन्न
मितिहोवाचान्नावष्टंभोहिप्राणः शुष्यति वै प्राणो ऋतेऽन्नादिति श्रुतेः अन्नं दामेति च। अन्नस्य कागतिरित्याप इति
होवाचाप्संभवत्वादन्नस्य। अपां कागतिरित्यसौ लोक इति होवाचामुष्माद्धि लोकाद्वृष्टिः संभवति। अमुष्य लोकस्य कागति
अ ९ ५ रितिपृष्टो दाल्भ्य उवाच। स्वर्गममुं लोकमतीत्याश्रयांतरं परं साम न नयेत् कश्चिदिति होवाच। अतो वयमपि स्वर्गं लो
लोकं सामाभिसंस्थापयामः। स्वर्गलोकप्रतिष्ठं साम जानीम इत्यर्थः। स्वर्गसंस्तावं स्वर्गत्वेन संस्तवनं संस्तावो यस्य तत्साम
स्वर्गसंस्तावं हियस्मात्स्वर्गोवैलोकः सामवेद इति हि श्रुतिः। तमितरः शिलकः शालावत्यश्चैकितायनं दाल्भ्यमुवाच
प्रतिष्ठितमसंस्थितं परोवरीयस्त्वेनासमाप्तगति साम हे दाल्भ्य वै किलेत्यागमं स्मारयति। किलेति च। दाल्भ्य ते तव साम यस्त्व
सहिष्णुः सामविदेतर्हि तस्मिन्काले ब्रूयात्कश्चिद्विपरीतविज्ञानमप्रतिष्ठितं साम प्रतिष्ठितमित्येवं मुक्तस्यापराधिन
स्तथैवतद्विपतेत्तसंज्ञायां नत्वहं ब्रवीमीत्यभिप्रायो। ननु मूर्द्धपाताईश्चेदपराधं कृतवानतः परेणानुक्तस्यापि तत्पते

+ बादापराधिनं मूर्द्धा शिरस्ते विपतिष्यतीति विस्पष्टं पतिष्यतीत्येव २

न्मूर्धा न वेद पराङ्मुखस्यापि नैव पतत्यन्यथा अकृताभ्यागमः कृतनाशश्च स्यातां नैष दोषः कृतस्य कर्मणः शुभा
शुभस्य फलप्राप्तेर्देशकालनिमित्तापेक्षत्वात् तत्रैवं सति मूर्धपाते निमित्तस्याप्यज्ञानस्य पराभिव्याहारनिमित्ता
पेक्षत्वमित्येवमुक्तो दाल्भ्य आह हंताहमेतद्भगवत्तो वेदानीयत्प्रतिष्ठं साम मे सुक्तः प्रत्युवाच शालावत्यो विद्धी
ति होवाचामुष्य लोकस्य का गतिरिति पृष्टो दाल्भ्येन शालावत्योऽयं लोक इति होवाचायं हि लोको यागदानहो यं४
मादिभिरमुं लोकं पुष्यतीत्यतः प्रदानं देवा उपजीवंतीति हि श्रुतयः प्रत्यक्षं हि सर्वभूतानां धरिणी प्रतिष्ठेत्यतः
साम्नोऽप्ययं लोकः प्रतिष्ठैवेति युक्तं अस्य लोकस्य का गतिरित्युक्त आह शालावत्यो न प्रतिष्ठां इमं लोकमतीत्य
नयेत्साम कश्चिदतो वयं प्रतिष्ठां लोकं सामाभिसंस्थापयामो यस्मात्प्रतिष्ठासंस्तावं हि प्रतिष्ठात्वेन संस्तुतं सामेत्य
र्थः । इयं वै रथंतरमिति च श्रुतिः स्तोत्रमेवमुक्तवंतं ह प्रवाहणो जैवलिरुवाचांतवद्वै किल ते शालावत्य सामेत्यादि
र्ववत् ततः शालावत्य आह । हंताहमेतद्भगवत्तो वेदानीति [illegible] विद्धीति होवाचेत्यनुज्ञात आह ।८।। अस्य लोकस्य
का गतिरित्याकाश इति होवाच प्रवाहण आकाश इति च पर आत्मा आकाशो वै नामेति श्रुतेः । तस्य हि कर्म सर्वभूतो
जोध त्पादकत्वं तस्मिन्नेव हि भूतप्रलयः । तत्तेजोऽसृजत तेजः परस्यां देवतायामिति हि वक्ष्यति सर्वाणि [illegible] ह वा इमानि स्था
वरजंगमानि भूतान्याकाशादेव समुत्पद्यंते तेजोऽबन्नादिक्रमेण सामर्थ्यात् आकाशं प्रत्यस्तं यंति प्रलयका
ले विपरीतेनैव क्रमेण हि यस्मादाकाश एवैभ्यः सर्वेभ्यो भूतेभ्यो ज्यायान्महत्त[illegible]रोऽयतः सर्वेषां भूतानां
परमयनं परायणं प्रतिष्ठा त्रिष्वपि कालेष्वित्यर्थो यस्मात्परंपरं [illegible] वरीयः वरीयसोऽप्येष परश्च [illegible] वरीयांश्च परोवरी ॥१॥
यानुद्गीथः परमात्मा संपन्न इत्यर्थः अत एव स एषोऽनंतोऽविद्यमानांतस्तमेतं परोवरीयांसं परमात्म[illegible]भूतम
नंतमेवं विद्वान्परोवरीयांसमुद्गीथमुपास्ते तस्यैतत्फलमाह । परोवरीयः परंपरं विशिष्टतरं जीवनं हास्य विदु
प
वरीयश्च [illegible]

ध

षासवत्ति द्दष्टफलंमाह द्दष्टं च परोवरीयस उत्तरोत्तरविशिष्टतरौ नेव ... ह्लाकाम्यां ता ल्लोकाञ्जयति य एवं तद्देवं विद्वानु दानु।
द्गीथमुपास्ते। किंच तमेतमुद्गीथं विद्वान तिधन्वानामतः। स्तुनकस्यापत्यं शौनक उदरशांडिल्याय शिष्यायेत
द्गीथदर्शनमुक्त्वोवाच। यावत्तेत व प्रजायां प्रजासंतता विद्यर्थः उद्गीथं त्वसंततिजा वेदिष्यंते ज्ञास्यंतीति तावंतं कालं परो
वरीयो हास्य। प्रसिद्धेभ्यो लौकिकजीवनेभ्य उत्तरोत्तरविशिष्टतरं जीवनं तेभ्यो भविष्यतीति तथाऽदृष्टेपि परलोकेऽमुष्मि
न्परोवरीयांल्लोको भविष्यती स उक्तवान् शांडिल्याय। अतिधन्वा शौनकः स्यादेतत्फलं एकं वैषां महात्म्यानां नेदंयुगीनाना
मित्याशंकायां कथनिवृत्तये आह। स यः कश्चिदेतदेवं विद्वानुद्गीथमेतदुपास्ते। तस्याप्येवमेव परोवरीय एव ह्यस्या
स्मिंल्लोके जीवनं भवति। तथामुष्मिंल्लोके लोक इति लोके लोक इति। उद्गीथोपासनप्रसंगेन प्रस्तावप्रतिहारवि
तु षयमप्युपासनं कर्त्तव्यमिती दमारभ्यते॥ आख्यायिका सुखावबोधार्था मटचीहतेषु मटच्योऽशनयस्ताभि
र्हतेषु नाशितेषु कुरुषु कुरुसस्येष्वित्यर्थः ततो दुर्भिक्षे जाते आटिक्या सह पजातपयोधरादिस्त्रीव्यंजनया सह
जायया उषस्तिर्ह नाम। ततः चक्रस्यापत्यं चाक्रायणः इभ्यो हस्ती तमर्हती तीभ्य ईश्वरो हस्त्यारोहो वा तस्य ग्राम इभ्यग्रामः
तस्मिन्प्रद्राणकोऽन्नालाभात् कुत्सितां गतिं गतोऽवस्थां प्राप्त इत्यर्थः। उवास। [illegible] षितवान्। कस्यचि
दगृहमाश्रित्य [illegible] सो [illegible] अन्नार्थमटन्निभ्यं कुल्माषान्कुत्सितान्माषान्खादंतं तस्य यदृच्छयोपलभ्य बिभिक्षे या
चितवान्। तमुषस्तिं ह उवाच इभ्यो नेतोऽस्मान्मया भक्ष्यमाणादुच्छिष्टराशेः कुल्माषा अन्ये न विद्यंते यच्च ये राशौ इमे मम
उपनिहिताः प्रक्षिप्ता भाजने किं करोमीत्युक्तः प्रत्युवाचोषस्तिः। एतेषां मे तानीत्यर्थः। मे मह्यं देहीति। तानु ह
उ३ स्मै प्रददौ प्रदत्तवान्। अनुपानीयं समीपस्थमुदकं हंत गृहाणानुपास्येनमित्युक्तेवं तं प्रत्युवाच तरः किं
न स्विदेति कुल्माषा अप्युच्छिष्टा इत्युक्त आहोषस्तिर्न वै अजीविष्यं न जीविष्यामीमान्कुल्माषानखादन्नलक्षय न
न्निति होवाच। कामो म उदपानं लभ्यत इत्यर्थः तच्चेतामवस्थां प्राप्तस्य विद्या यशस्यतोऽविवयंतः स्यात्मप

हा३

+: प्रत्युवाचोच्छिष्टं वै मे मम पीदं स्यात् [illegible] स्या
मीत्युक्तवंतं ३

श्री २

शेपकारसमर्थस्यैतदपि कर्म कुर्वतो नागः स्पृशतीत्यभिप्रायः। तस्यापि जीवितप्रयत्नस्युपायांतरे सति जुगुप्सित
मेतत्कर्म दोषाय ज्ञानावलेपेन कुर्वतो नरकपात स्यादेवेत्यभिप्रायः। प्रद्राण कस्य श्रवणात्ताश्च सखादित्यु
ऽतिदोषान्। अतिनिकृष्टाऽजायायैकारुण्यादाजहार। साटिक्य गर्हणे वकुल्माषप्राप्तेः सुभिक्षानरोसन लि
दाल्भ्यान्नाद्यत्वेतत्र बलवस्रूत्वा। तथापि स्त्री स्वाला व्याहनवज्ञायतो कुल्माषान्प्रत्युद्धृत्यातप्रतिगृह्य नि
नर दधौ निचिक्षेपवती सतस्याः कर्मज्ञा प्रातरुषः काल्ये संजिहानः शयनं निद्रां वा परित्यजन्नुवाच पत्न्याः शृण्वंत्याः
यद्यदिबतेति खिद्यमानोऽन्नस्य स्तोकं लभेमहि। तदश्नन्कालं समर्थो गत्वा लभेमहि धनमात्रां धनस्यालं तत्तो
स्माकं लभेमहि। तदश्नन्कालं समर्थो गत्वा लभेमहि धनमात्रां लब्धोऽसौ न स्या जीवनं नविष्यति। धनलाभकारणमा
हा राजासौ नस्ति तिदूरस्था न यह्यते यज्ञमान। त्यात्तस्या मनेपदं। स च राजा मां पात्रमुपलभ्य सर्वैरार्त्विज्ये
त्विक्कर्मभिः आर्त्विक्कर्म प्रयोजनायैत्युर्थो वृणीतेत्येवमुक्तवंतं जायो वाच। हंत गच्छ। क्षणं हे पत इमे एव ये मह्यं दत्ते वि
निक्षिप्तास्त्वया कुल्माषा इति। तान्खादित्वा मुं यज्ञं प्रराज्ञो विततं विस्तारितं ततः चिक्रिस्तिरेयाय। तत्र यज्ञ गत्वा ज्ञातृ
नुज्ञान्पुरुषानागत्य स्तकंस्य स्मिन्निति आस्तावस्ते स्मिन्नास्तावे स्तोष्यमाणान्नु पोपविवेशस्सामीपं उपविष्टस्तेषामि
त्यर्थः। उपविश्य सह प्रस्तोतारमुवाच। हे प्रस्तोतरित्यामंत्र्याभिमुखीकरणाय। या देवता प्रस्तावं प्रस्तावभक्ति
मनुगता न्वायत्ता तां चेद्देवतां प्रस्तावस्य [illegible] रविद्वान्सन्प्रस्तोष्यसि विदुषो मम समीपे। तत्परोक्षेपि चेद्दिपतेत
स्यमर्धा कर्म मात्र विदामनधिकार एव कर्मणि स्यात्तच्चानिष्टमश्चि विदुषां कर्मदर्शनाद्दक्षिणमार्गश्रुतेश्च ज्ञानादि १०॥
कारेण वा विदुषो उत्तर एवैको मार्गः। अस्मैतेन च स्मार्त्ते कर्मनिमित्त एव दक्षिणः पंथाः यज्ञेन दानेनेत्यादि श्रुतेः। तथो
क्तस्य मर्येतिव विशेषणात्। विद्वत्समक्षमेव कर्मण्यनधिकारो न सर्वत्राग्निहोत्रादि स्मार्त्त कर्माध्ययनादिषु यथा
नुज्ञायास्तत्र दर्शनात्। कर्ममात्रविदामप्यधिकारः सिद्धः कर्मणीति। मूर्द्धा ते विपतिष्यतीत्यपतितोप्येवमेव ज्ञातारं स

पि३ पि४

तिहर्त्तारमुपाचेत्यादि समानमन्यत्। प्रस्तोत्रादयः कर्मभ्यः समारतास्तूपरताः संतो मूर्धपातभयात्तूष्णीमासांच
क्रिरेऽन्यच्चाकुर्वंतः॥१०॥ वेदार्थिभ्योऽथानंतरं हैनमुषस्तिं यजमानो राजोवाच। भगवंतं वै अहं वि
विदिषाणि वेदितुमिच्छामीत्युक्त उषस्तिर[illegible]स्मि चाक्रायणस्तवापि श्रोत्रपथमागतो यदीति होवाचोक्तवा
न्स ह यजमान उवाच। सत्यमेवमहं भगवंतं बहुगुणमश्रौषं सर्वैश्चार्त्विक्कर्मभिरार्त्विज्यैः पर्यैषिषं पर्यैषणं कृतवा
नस्म्यन्विष्य भगवतो वा अहमवित्त्याऽलाभेनान्यानिमान्वृतवानस्म्यद्यापि भगवांस्त्वेव मे मम सर्वैरार्त्वि
ज्यैरार्त्विक्कर्मार्थमस्त्वित्युक्तवंतस्तथेत्याहोषस्तिः किंत्वथैवं तर्ह्येत एव च या पूर्वं वृता मया समतिसृष्टाः। मया स
म्यक्पूर्वं प्रसन्नेनानुज्ञाताः संतः स्तुवतां त्वया त्वेतत्कार्यं यावत्त्वेभ्यः प्रस्तोत्रादिभ्यः सर्वेभ्यो धनं दद्याः। प्र
यच्छसि तावन्मम दद्याः इत्युक्तस्तथेति ह यजमान उवाच। अथ हैनमौषस्त्यं वचः श्रुत्वा प्रस्तोतोपससादोषस्तिं
विनयेनोपजगाम। प्रस्तोतर्या देवतेत्यादि मामाह भगवानवोचत्पूर्वं कतमा सा देवता या प्रस्तावभक्तिम
न्वायत्तेति पृष्टः प्राण इति होवाच। युक्तं प्रस्तावस्य प्राणो देवतेति। कथं सर्वाणि स्थावरजंगमानि भूतानि प्रा
णमेवाभिसंविशंति प्रलयकाले प्राणम[illegible] प्राणादेवोज्जिहते। प्राणादेवोद्गच्छंतीत्यर्थः। उत्पत्ति
तां ५ काले सैषा देवता प्रस्तावमन्वायत्ता तां चेदविद्वांस्त्वं प्रास्तोष्यः प्रस्तवनं प्रस्तावभक्तिं कृतवानसि यदि मूर्धा ते
व्यपतिष्यद्विपतेत् तमसविष्यत्तथोक्तस्य मया तत्काले मूर्धा ते विपतिष्यत्। अतः साधु कृतं त्वया यन्निषिद्धः मया ४
कर्मणो यदुपरमं मा कार्षीरित्यभिप्रायः। तथोद्गाता प्रप्रच्छ कतमा सोद्गीथभक्तिमनुगताऽन्वाय
त्ता देवतेति पृष्ट आदित्य इति होवाच। सर्वाणि ह वा इमानि भूतान्यादित्यमुच्चैरूर्ध्वं संतं गायंति शब्दयं
ति स्तुवंतीत्यभिप्रायः। उच्चैःशब्दसामान्यादुच्चैःशब्दसामान्यादिव प्राणोऽतः सैषा देवतेत्यादि पूर्ववदेव सर्वं हैनं

प्रतिहर्त्रोपससाद कतमा सा देवता प्रतिहारमन्वायत्तेति पृष्टोऽन्नमिति होवाच । सर्वाणि ह वा इमानि भूतान्य
न्नमेवात्मानं प्रतिसर्वतः प्रतिहरमाणानि जीवंति सैषा देवता प्रतिहृतभक्तिसामान्यात्प्रतिहारभक्तिमनुग
ता समानमन्यत्तथोक्तस्य मूर्ध्नपातयेति प्रस्तावोद्गीथप्रतिहारभक्तीः प्राणादित्यान्नदृष्ट्योपासीतेति समुदा
यार्थः । प्राणाद्यापत्तिः कर्मसमृद्धिर्वा फलमिति । ११ ॥ अतीते खंडेऽन्नाप्राप्तिनिमित्ता कष्टावस्थोक्ता उच्छि
ष्टपर्युषितलक्षणा तन्मा भूदित्यन्नलाभायाथानंतरं शौवः श्वभिर्दृष्ट उद्गीथ उज्ञानं सामा
हि ६ तः प्रस्तूयते । तत्र ह किल बको नाम ततः दल्भस्यापत्यं दाल्भ्यो ग्लावो वा नामतः मित्रायाश्चापत्यं मैत्रेयो
वा वाशब्दश्चार्थे द्व्यामुष्यायणो ह्यसौ वस्तुविषये क्रियास्विव विकल्पानुपपत्तेः । द्विनामा द्विगोत्र इत्या
दि हि स्मृतिर्दृश्यते चोभयतः पिंडभाक्त्वमुद्गीथे व बद्धचित्तत्वाद् ऋषावनादराद्वा वानूद्गूढः स्वाध्यायार्थं स्वाध्यायं
स्वाध्यायं कर्तुं ग्रामाद्बहिरुद्वव्राज उद्गतवान्विविक्ते देशे स्थितोदकाभ्याशे उद्वव्राज प्रतिपालयां चकारे
ति वैकवचनाल्लिंगादेको स ऋषिरुद्गीथकालप्रतिपालनादृषेः स्वाध्यायकरणमन्नकामतये
ति लक्ष्यते लिप्रायोऽतः स्वाध्यायेन तोषिता देवता ऋषिर्वा श्वरूपं गृहीत्वा श्वा श्वेतः सन् तस्मा ऋषये त
दनुग्रहणार्थं प्रादुर्बभूव प्रादुश्चकार । तमन्ये श्वानः क्षुल्लकाः श्वानमुपसमेत्योचुः उक्तवंतोऽन्नं नो
स्मभ्यं भगवानागायत्वागानेन निष्पादयत्वित्यर्थः । मुख्यप्राणं वागादयो वा प्राणमन्वन्नभुज ऊचुः स्वाध्या ॥११॥
यपरितोषिताः संतोऽनुग्रहीयुरन्नेन श्वरूपमादायेति दायेति युक्तमेवं प्रतिपत्तुमशनायाम वै बुभुक्षिताः
स्मा वयं इत्येतमुक्तवंतः स श्वा श्वेत स्तान्क्षुल्लकान् श्वनः इहैवास्मिन्नेव देशे मा मां प्रातः काल उपस

सर्पति ४ स्य ४ वा २

मीयात्तेऽतिदैर्घ्याच्छांदसं ईयातेति प्रमादपाठो वा प्रातःकालकरणं तत्कालकृत्यर्थमन्नदस्य वा सवितु
रपराह्णे नास्ति मुरश्मात्तत्रैव ह बको दाल्भ्यो ग्लावो मैत्रेयश्चर्षिः प्रतिपालयांचकार प्रतीक्षणं कृतवानि
त्यर्थः। तस्मान्नस्तत्रैवागम्यत्र श्वेतः समस्तं यथैवेह कर्मणि बहिष्पवमानेन स्तोत्रेण स्तोष्यमाणा उद्गातृपुरुषाः
मेव संरब्धाः संलग्ना अन्योन्यस्यैव मुखेनान्योन्यपुच्छं गृहीत्वा सस्रपुः आसृप्तवन्तः परिभ्रमणं कृतवन्त इत्यर्थः।
त एवं संसृप्य समुपविश्योपविष्टाः सन्तो हिंचक्रुः हिंकारं कृतवन्तः। ओ३मदा३मों३ पिबा३मों३ देवो द्योतनाद्व
२ रुणो वर्षणाज्जगतः प्रजापतिः पालनात्प्रजानां सविता प्रसवितृत्वात्सर्वस्यादित्य उच्यते एतैः पर्यायैः। स एवं
भूत आदित्योऽन्नमस्मभ्यमिहाहरत्वाहरत्विति। त एवं हिंकृत्वा पुनरप्यूचुः। स त्वं हे अन्नपते स हि सर्वस्यान्न
स्य प्रसवितृत्वात्पतिः। न हि तत्पाकेनाप्रसूतमन्नमणुमात्रमपि जायते प्राणिनामतोऽन्नपतिः। हेऽन्नपते
ऽन्नमस्मभ्यमिहाहराहरेत्यभ्यास आदरार्थः॥ ओमिति॥ १२॥ सामावयवविषयोपासनं सामावयवसंबद्धमित्यतः
सामावयवभूतस्तोभाक्षरविषयाण्युपासनान्तराणि संहतान्युपदिश्यन्तेऽनन्तरं। सामावयवसंबद्धत्वाविशेषात्। अयं
३ वाव अयमेव लोको हाउकारः स्तोभो रथन्तरे साम्नि प्रसिद्धः इयं वै रथन्तरमिति तस्मात्संबन्धसामान्याद्धाउकारस्तोभोऽयं लोक उ
६३ इत्येवमुपासीत। वायुर्हाइकारः वामदेव्ये साम्नि हाइकारः प्रसिद्धः। वायुसंबन्धश्च वामदेव्यस्य साम्नो योनि अप६
रित्यस्मात्सामान्याद्धाइकारं वायुदृष्ट्योपासीत। चन्द्रमा अथकारः। चन्द्रदृष्ट्याथकारमुपासीत। अन्नं हीदं स्थि
तमन्नात्मा चन्द्रः थकाराकारसामान्याच्च। आत्मेहकारः इहेति स्तोभः प्रत्यक्षो ह्यात्मा इहेति व्यपदिश्यते इ
हेति च स्तोभस्तत्सामान्यात्। अग्निरीकार इति। निधनानि चाग्नेयानि सर्वाणि सामानीत्यतस्तत्सामान्यात्। आदित्य ऊका हार
रः। उच्चैरूर्ध्वं सन्तमादित्यं गायन्तीत्यूकारश्चायं स्तोभः आदित्यदैवत्ये साम्नि स्तोभ ऊकार आदित्य ऊकारो। निहव एकारः। आ
नमो कारस्तोभ एहीति चाह्वयन्तीति तत्सामान्याद्विश्वेदेवा औहोयिकारो वैश्वदेवे साम्नि स्तोभस्य दर्श

कार २

१

नात। प्रजापतिर्हिंकार आनिरुक्तत्वाद्धिंकारस्य चाव्यक्तत्वात्। प्राणस्स्वरः स्वर इति स्तोभः। प्राणस्य च स्वरहे
तुत्वसामान्यादन्नं या या इति स्तोभोऽन्नेन हीदं यातीत्यतस्तत्सामान्याद्वागिति स्तोभो विराडन्नं देवताविशेषो
वा वैराजे साम्नि स्तोभदर्शनात्। अनिरुक्तो व्यक्तत्वादिदं चेदं चेति निर्वक्तुं न शक्यत इत्यतः संचरो विकल्प्यमानस्व
रूप इत्यर्थः। कोऽसावित्याह। हुंकारः। अव्यक्तो ह्ययमतोऽनिरुक्तविशेष एवोपास्य इत्यभिप्रायः। स्तोभाक्षरोपा
सनाफलमाह। दुग्धेऽस्मै वाग्दोहमित्याद्युक्तार्थं। य एतामेवं यथोक्तलक्षणां साम्नां सामावयवस्तोभाक्ष
रविषयामुपनिषदं दर्शनं वेद तस्यैतद्यथोक्तं फलमित्यर्थः। द्विरभ्यासोऽध्यायपरिसमाप्त्यर्थः। सामावयवविष सों ६
१७ योपासनाविशेषपरिसमाप्त्यर्थो वेति। ॥१२॥ इति श्रीमद्गोविंदभगवत्पूज्यपादशिष्यस्य परमहंसपरिव्राज
काचार्यस्य श्रीमच्छंकरभगवत्पादकृतौ छांदोग्योपनिषद्विवरणे प्रथमः पाठकः समाप्तः॥ ॥ॐ मित्येतदक्ष
रमित्यादिना सामावयवविषयमुपासनमनेकफलमुपदिष्टमनंतरं च स्तोभाक्षरविषयमुपासनमुक्तं सर्व
थापि साम्नेकदेशसंबद्धमेव तदित्यथेदानीं समस्ते साम्नि समस्तसामविषयाण्युपासनानि वक्ष्यामीत्यारभ ५१
ते श्रुतिः। युक्तं ह्येकदेशोपासनानंतरमेकदेशिविषयमुपासनमुच्यत इति समस्तस्य सर्वावयवविशिष्ट
स्य पांचभक्तिकस्य साप्तभक्तिकस्येत्यर्थः। खल्विति वाक्यालंकारार्थः। साम्न उपासनं साधु समस्ते साम्नि
साधुदृष्टिविधिपरत्वान्न पूर्वोपासननिंदार्थत्वं साधुशब्दस्य ननु पूर्वत्राविद्यमानं साधुत्वं समस्ते सा
म्न्यभिधीयते। न साधु सामेत्युपसंहारात् साधुशब्दः शोभनवाची। कथमवगम्यत इत्याह। यत्किल खलु ॥१२॥
लोके साधु शोभनमनवद्यं प्रसिद्धं तत्सामेत्याचक्षते कुशलाः। यदसाधु विपरीतं तदसामेति। तत्रैव
साध्वसाधुविवेककरणे उताप्याहुः साम्नैनमुपागादिति राजानं सामंतं वोपागादुपगतवान् कोऽसौ यतोऽसाधुत्व

छां ६

मान्याद्धिंकारादिलिंगमत इति हिंकारादित्वे कारणं नो ह्यं साम भक्तेषु नः सवितुरस्तु न कारणं न सुबोधमिति स
मत्यसुक्तं' तस्मिन्नादित्ये वय ॰ ववित्ता मन्त्राः समानि वक्ष्यमाणानि सर्वाणि भूतान्यन्वायत्तान्यनुगतान्यादित्य
मुपजीव्यत्वेनेति विद्यात्कथं तस्यादित्यस्य यत्पुरोदयात्प्राग्धर्मरूपं स हिंकारो लिंगि स्तत्रेदं सामान्यं' यत्तत्तस्य हिं
कारस्ता ॰ किंरूपं तदस्यादित्यस्य साम्नः पशवो गवादयोऽन्वायत्ताः अनुगतास्तद्भक्तिरूपमुपजीवंतीत्यर्थो यस्मा
देवं तस्मात्ते हिं कुर्वंति पशवः प्रागुदयात्तस्माद्धिंकारभाजिनो ह्येते तस्यादित्याख्यस्य साम्नस्तद्भक्तिस्तत्र नत्र छे॰
त्वाद्धितेऽएवंवृत्तिः' थ यत्प्रथमोदिते सवितृरूपं स प्रस्तावः तदस्य मनुष्या अन्वायत्ताः पूर्ववत्तस्माते प्रस्तु
तिं प्रशंसां कामयंते यस्मात्प्रस्तावभाजिनो ह्येतस्य साम्नो' थ यत्संगववेलायां गवां रश्मीनां संगमनं संगमे
यस्यां वेलायां गवां वावत्सैः सा संगववेला तस्मिन्काले यत्सावित्रं रूपं स आदिर्लिंगि विशेष ॐकारस्तदस्य
स्य वयांसि पक्षिणोऽन्वायत्तानि यत एवं तस्मात्तानि वयांस्यंतरिक्षेऽनारंबणान्यनालंबनान्यात्मानमादाय
आत्मानमेवालंबनत्वेन गृहीत्वा परिपतंति गच्छंत्यतः ॐकारसामान्यादादिलिंगि भाजीनि ह्येतस्य साम्नो' थ यत्सं
प्रति मध्यंदिने तत्कालमध्यंदिने इत्यर्थः स उद्गीथलिंगि स्तदस्य देवा अन्वायत्ताद्योतनात्तिशया तत्कालेत स्मात्
सत्तमा विशिष्टतमाः प्राजापत्यानां प्रजापत्यपत्यानामुद्गीथभाजिनो ह्येतस्य साम्नो' थ यदूर्ध्वं मध्यंदिनात्प्राग पं ७
त परा ह्णाद्यद्रूपं सवितुः स प्रतिहारस्तदस्य गर्भा अन्वायत्ताः अतस्ते सवितुः प्रतिहारलिंगि रूपेणोर्ध्वं प्रतिहृताः सं
तेऽ५ तो नावपद्यंते नाधः पतंति ह्यारस्यापीसंबंधं पीत्यर्थोऽयं प्रतिहारभाजिनो ह्येतस्य साम्नो' थ यदूर्ध्वमप
राह्णात्प्रागस्तमयात्स उपद्रवस्तदस्यारण्याः पशवोऽन्वायत्तास्तस्मात्ते पुरुषं दृष्ट्वा कक्षं श्वभ्रमित्यभयस्थानं
यस्मन्यमित्युपद्रवंति उपगच्छंति' दृष्ट्वोपद्रवणादुपद्रवभाजिनो ह्येतस्य साम्नो' थ यत्प्रथमास्तमिते ऽदर्शनं जिग ॥१४॥
मिषति सवितरि तन्निधनं तदस्य पितरोऽन्वायत्ता' स्तस्मात्तान्निदधति पितृपितामहप्रपितामहरूपेण दर्भेषु नि
क्षिपंति तांस्तदर्थं पिंडान्वा स्थापयंति निधनसंबंधान्निधनभाजिनो ह्येतस्य साम्नः पितर एवमवयवशः स प्त
तें ५

स्तावः साहचर्यदर्शनादजावीनां गाव उद्गीथः श्रैष्ठ्यादश्वाः प्रतिहारः प्रतिहरणात्पुरुषाणां पुरुषो निधनं पुरुषाश्रयत्वा
त्पशूनां फलं भवति हास्य पशवः पशुमान् भवति पशुफलैश्च भोगत्यागादिभिर्युज्यत इत्यर्थः । प्राणेषु पंचविधं प
रोवरीयः सामोपासीत परं परं वरीयस्त्वगुणवत्प्राणदृष्टिविशिष्टं सामोपासीतेत्यर्थः । प्राणो घ्राणो हिंकारस्तत्तरोत्त
रवरीयसां प्राथम्याद्धि वाक्प्रस्तावः वाचा हि प्रस्तूयते वाक्च घ्राणादुत्तरोत्तरवरीयसी सर्वं वाक्वरीयसी प्राणाद प्राप्तमप्युच्य
ते वाचा प्राणस्यैव तु गंधस्य ग्राहकः प्राणो वाचो बहुतरविषयं प्रकाशयति । चक्षुरुत्तरोत्तरवरीयो वाचः उद्गीथः श्रैष्ठ्या
ष॰४ च्छ्रोत्रं प्रतिहारः प्रतिहृतत्वाद्वरीयश्चक्षुषः सर्वतः श्रवणात् मनो निधनं मनसि हि निधीयंते पुरुषस्य भोग्यत्वेन स
र्वेन्द्रियाहृता विषयाः वरीयस्त्वं च श्रोत्रान्मनसः सर्वेन्द्रियविषयव्यापकत्वादतीन्द्रियविषयोऽपि मनसो गोचर इ
ति यथोक्तहेतुभ्यः परोवरीयांसि प्राणादीनि वै एतानि एतदृष्टिविशिष्टं यः परोवरीयः सामोपास्ते परोवरी
यो हास्य जीवनं भवति । इत्युक्तार्थमिति तु पंचविधस्य साम्न उपासनमुक्तमिति सांप्रतं सप्तविधे वक्ष्यमाणविष
ये बुद्धिसमाधानार्थं निरपेक्षो हि पंचविधे वक्ष्यमाणबुद्धिं समाधित्सति ॥७॥ अथानंतरं सप्तविधस्य समस्तस्य
साम्न उपासनं शुद्धमिदमारभ्यते । वाचीति सप्तमी तं पूर्ववद्वाग्दृष्टिविशिष्टं सप्तविधं सामोपासीतेत्यर्थः यत्किं
५५५ ७ च वाचः शब्दस्य हुं इति यो विशेषः स हिंकारो हकारसामान्यात् यत्प्रेति शब्दरूपं स प्रस्तावः प्रसामान्याद्यदा इति घ७
तदादिः आकारसामान्यादादिरित्योंकारस्य । यदुदिति स उद्गीथः उत्पूर्वत्वादुद्गीथस्य । यत्प्रतीति स प्र
तिहारः प्रतिसामान्यात् यदुपेति स उपद्रव उपोपक्रमत्वादुपद्रवस्य । यन्नीति तन्निधनं निशब्दसामान्यात् दुग्धेऽस्मै
वागित्युक्तार्थः ॥८॥ अवयवमात्रे साम्न आदित्यदृष्टिः पंचविधेषूक्ता प्रथमे चाध्याये । अथेदानीं खल्वमुमादित्यं स
मस्ते साम्न्यवयवविभागशोऽध्यस्य सप्तविधं सामोपासीत । कथं पुनः साम त्वमादित्यस्येत्युच्यते उद्गीथत्वहेतुवदा
दित्यस्य सामत्वे हेतुः कोऽसौ सर्वदा समो वृद्धिक्षयाभावात्तेन हेतुना साम आदित्यो मां प्रति मां प्रतीति तुल्यां बु
द्धिमुत्पादयंतः सर्वेण समोऽतः साम समत्वादित्यर्थः । उद्गीथलिंगसामान्यवचनादेव लोकान्न दिसृक्तसा
स

गानं

समुद्गीथोंतरिक्षे हि गगनं गकारश्च द्वितीयोक्षरउद्गीथः आदित्यः प्रतिहारः प्रति प्राणिनं प्रति मां प्रति मां प्रतीति द्यौर्निधनं दि
वि निधीयंते ह्यतो गता इत्येवमूर्ध्वगतेषु लोकेषु दृष्ट्या सामोपासनमथावृत्तेषु वा अधोमुखेषु पंचविधमुच्यते । सामोपासनं
गत्यागतिविशिष्टा हि लोकाः यथोक्तेन प्रकारेण दृष्ट्यैव सामोपासनं विधीयते यतोतः आवृत्तेषु लोकेषु द्यौर्हिंकारः प्राथम्यादा
दित्यः प्रस्ताव उदिते ह्यादित्ये प्रस्तूयंते कर्माणि प्राणिनामंतरिक्षमुद्गीथः पूर्ववदग्निः प्रतिहारः प्राणिभिः प्रतिहरणाद
ग्नेः पृथिवी निधनं तत आगतानां निधनात् उपासनफलं कल्पंते समै ऊर्ध्वाश्चावृत्ताश्च लोका भोग्यत्वेनास्मै लोका व्यवतिष्ठंत इत्यर्थो य एवं विद्वांल्लोकेषु पंचविधं समस्तं साधु सामेत्युपास्ते इति सर्वत्र योज
॥२॥ नासमस्तविधेषु वृष्टौ पंचविधं सामोपासीत लोकस्थितेर्वृष्टिनिमित्तत्वादानंतर्यं पुरोवातो हिंकारः पुरोवाताद्युद्ग्रहणांता
हि वृष्टिर्यथा साम हिंकारादिनिधनांतमतः पुरोवातो हिंकारः प्राथम्यान्मेघो जायते स प्रस्तावः प्रावृषि मेघजनने वृष्टेः ओः
: प्रस्ताव इति हि प्रसिद्धिर्वर्षति स उद्गीथः श्रैष्ठ्याद्विद्योतते स्तनयति स प्रतिहारः प्रतिहृतत्वादुद्गृह्णाति तन्निधनं समा
प्तिसामान्यात्फलमुपासनस्य वर्षति हास्मै वर्षयति हासत्यामपि वृष्टौ यस्तद्विद्यादि पूर्ववत् ॥३॥ सर्वा
स्वप्सु पंचविधं सामोपासीत वृष्टिपूर्वकत्वात्सर्वासामपामानंतर्यं मेघो यत्संप्लवते एकीभावेनेतरेतरं घनीभवति मेघो य
दा उन्नतस्तदा संप्लवत इत्युच्यते मेघस्तदापामारंभः स हिंकारो यद्वर्षति स प्रस्ताव आपः सर्वतो व्याप्तुं प्रस्तूयंता या
प्राच्यः स्यंदंते स उद्गीथः श्रैष्ठ्याद्याः प्रतीच्यः स प्रतिहारः प्रतिशब्दसामान्यात्समुद्रो निधनं तन्निधनत्वादपां
या५ नाप्सु प्रैत्यप्सुमान्भवति फलं ॥४॥ ऋतुषु पंचविधं सामोपासीत ऋतुव्यवस्थाया यथोक्तांबुनि
।न मित्तत्वादानंतर्यं वसंतो हिंकारः प्राथम्याद्ग्रीष्मः प्रस्तावो यवादिसंग्रहो हि प्रस्तूयते हि प्रावृडर्थं । वर्षा उद्गीथः प्राधान्याच्छ ॥१३॥
रत्प्रतिहारो रोगिणां मृतानां च प्रतिहरणाद्धेमंतो निधनं निवाते निधानात्प्राणिनां फलं कल्पंते ऋतुव्यवस्थानुरूपं
भोग्यत्वेनास्मा उपासकायर्तुमानार्तववैर्भोगैश्च संपन्नो भवतीत्यर्थः ॥५॥ पशुषु पंचविधं सामोपासीत सम्य
ग्वृत्तेष्वृतुषु पश्व्याः कालस्यानंतर्यमजा हिंकारः प्राधान्यात्प्राथम्याद्वा अजः पशूनां प्रथम इति श्रुतेरवयः प्र

तिपर्यये ज्ञातेसा मेनो वतेति यत्साधु सा॰ वत्यसाधु बतेत्येवतदाहुः ।४
प्राप्या बंको सङ्गत्य लिप्रायः । त्रोसना सिप्राये प्रसाधुनैनमुपासौगादित्येव तत्त वाहुर्लौकिका बंधनाद्यसाधुकार्यं
मपश्यंतो 'यत्र पुनर्विपर्ययो बंधनाद्यसाधुकार्यं पश्यंति तत्रासाम्नैनमुपागादित्यसाधुनैनमुपागादित्येव तदाहु
रुतोताप्याहुः । स्वसंवेद्यं साम नोऽस्माकं बतेत्येवं दृष्टुकं पश्यंतः संवृत्तमित्याहुरेतच्चैरुक्तं भवति यत्साधु भवति साधु
बतेत्येव तदाहुः । तस्मात्सामसाधुशब्दयोरेकार्थत्वं सिद्धं मतः स यः कश्चित्साधु सामेति साधुगुणवत्सामेत्युपास्ते
समस्तं साम साधुगुणवद्दिष्टं स्तस्यैतत्फलमभ्याशो ह क्षिप्रं यदिति क्रियाविशेषणार्थमेवैनमुपास्ते सकं साधव
वो साधना धर्माः श्रुतिस्मृत्यविरुद्धा आ च गच्छेयुराभागच्छेयुश्च न केवलमागच्छेयुरुप च नमेयुरुपनमेयुश्च भोग्यत्वे
नोपतिष्ठेयुरित्यर्थः ।।१।। कानि पुनस्तानि साधुदृष्टिविशिष्टानि समस्तानि सामान्युपास्यानीति इमानि तान्युच्यंते
लोकेषु पंचविधमित्यादीनि ननु लोकादिदृष्ट्या तान्युपास्यानि साधुदृष्ट्या चेति विरुद्धं न साधुत्वस्य लोकादि
~~र्येष्वनुगतत्वोस्यथायत्र घटादिषु मृद्धर्मादिकार्येषु लोकादिकार्ये~~ कार्येषु कारणस्यानुगतत्वात् मृदादिवद्वृ ण
दादिविकारेषु साधुत्वाद्यन्यो वा ... धर्मो ब्रह्म वा सर्वथापि लोकादिकार्येष्वनुगतमतो यथा यत्र घटादिदृष्टिर्मृदा
दिदृष्ट्यनुगतैव सा तथा साधुदृष्ट्यनुगतैव लोकादिदृष्टिर्धर्मादिकार्यत्वात् लोकादीनां यद्यपि कारणमविशिष्टं स५
ब्रह्म धर्मयोः स्तथापि धर्म एव साधुशब्दवाच्य इति युक्तं साधुकारी साधुर्भवतीति धर्मविषये साधुत्वाद्ययोगात्
तु लोकादिकार्यकारणस्यानुगतत्वादर्थप्राप्तैव तद्दृष्टिरिति साधुसामेत्युपास्त इति न वक्तव्यं न प्राक्कर्णस्य लोकादृष्टे
सर्वत्र हि शास्त्रप्रापिताद् एव धर्मा उपास्या न विद्यमाना अप्राप्तशास्त्रीयाल्लोकेषु पृथिव्यादिषु पंचविधं पंच भक्ति सेदं
पंचप्रकारं साधु समस्तं सामोपासीत कथं पृथिवी हिंकार इत्यादि ... प्रथमा लेन विपरी॰ णाम ... स्या २
द्या हिंकारे पृथिवी हिंकार इत्युपासीतेति । यत्तु यस्य वा समस्तं ... लोकविषयां हिंकारादिषु पृथिव्यादिषु दृष्टिं च
कृत्वोपासीत तत्र पृथिवी हिंकारः प्राथम्यसामान्यात् अग्निः प्रस्तावो ... हि कर्माणि प्रस्तूयंते प्रस्तावश्च भक्तिरंतरि
वी३

मु१ सि

घाविसक्तं खल्वमुमादित्यं सप्तविधं सामोपास्ते यः तस्य तदापत्तिः फलमिमिति वाक्यशेषः ॥७॥ मृत्युरादित्यः अ
होरात्रादिकालेन जगतः प्रमापयितृत्वात्तस्यातितरणायेदं सामोपासनमुपदिश्यते अथ खल्वनंतरं मृत्युमादि
त्यविषयमेव सामोपासीत आत्मसंमितं स्वावयवतुल्यतया मितं परमात्मतुल्यतया वा संमितं अतिमृत्यु मृत्यु
यरूपेहेतुत्वात् यथा प्रथमेध्याये उद्गीथभक्तिनामाक्षराण्युद्गीथमुपास्यत्वेनोक्तानि तथेह साम्नः सप्तभक्तिना
माक्षराणि समाहृत्य त्रिभिस्त्रिभिः समतया साम्नत्वं परिकल्प्योपास्यत्वेनोच्यंते तदुपासनेन मृत्युगोचराक्षरसंख्यासा
मान्येन मृत्युं प्राप्य तदतिरिक्ताक्षरेण तस्यादित्यस्य मृत्योरतिक्रमणायैव संक्रमं कल्पयति अतिमृत्यु सप्तविधं सामोपा
सीत मृत्युमतिक्रांतमतिरिक्ताक्षरसंख्ययेत्यतिमृत्यु साम तस्य प्रथमभक्तिनामाक्षराणि हिंकार इत्येतत्त्र्यक्षरं
भक्तिनाम प्रस्ताव इति च त्र्यक्षरमेव नाम तत्पूर्वेण सममादिरिति त्र्यक्षरं सप्तविधस्य साम्नः संख्यापूरणे
कार आदिरित्युच्यते प्रतिहार इति चतुरक्षरं तत इह एकमक्षरमपच्छिद्याद्ययोरक्षरयोः प्रक्षिप्यते तेन तत्सममेव भव
त्युद्गीथ इति त्र्यक्षरमुपद्रव इति चतुरक्षरं त्रिभिस्त्रिभिः समं भवत्यक्षरमतिरिच्यते अतिरिच्यते तेन वैषम्ये प्राप्ते सा
म्नः समत्वाय कारणायां इतदेकमपि सदक्षरमिति व्यक्षरमेव लक्ष्यते तत्समं निधनमिति त्र्यक्षरं तत्सममेव भवत्येवं त्र्य
क्षरसमतया साम्नत्वं प्राप्य संपाद्य यथा प्राप्तान्येवाक्षराणि संख्यायंते तानि ह वा एतानि सप्तभक्तिनामाक्षराणि द्वावि
शतिस्तत्रैकविंशत्यक्षरसंख्ययादित्यमाप्नोति मृत्युं यस्मादेकविंश इतो ऽस्माल्लोकादसावादित्यः संख्यया द्वादश
मासाः पंच र्त्तवः त्रय इमे लोका असावादित्य एकविंश इति श्रुतेः तरति शिष्टेन द्वाविंशेनाक्षरेण परं मृत्योरादित्याज्ज
यत्याप्नोतीत्यर्थः यच्च तदानीमादित्यात्परं किं तन्नाकं कमिति सुखं तस्य प्रतिषेधो ऽकं तन्नास्तीति नाकं कमेवेत्यर्थो ऽम
त्युविषयत्वात् दुःखस्य विशोकं च तद्विगतशोकं मानसदुःखरहितमित्यर्थः ॥६॥ तदाप्नोतीत्युक्तस्यैव पिंडितार्थमाहैक
विंशतिसंख्ययादित्यस्य जयमाप्नोति परो ह्यस्यैवंविद आदित्यान्मृत्युगोचरात्परो जयो भवति द्वाविंशत्यक्षर

त्या१ ती

संख्ययेत्यर्थः॥ य एतदेवं विद्वानित्यादि उक्तार्थं तस्य यथोक्तं फलमिति विधिरभ्यासः साम्न एव विद्य समाप्यर्थः॥१०॥
विना नामग्रहणं पंचविधस्य सप्तविधस्य च साम्न उपासनमुक्तमथेदानीं गायत्र्यादिनामग्रहणपूर्वकं विशिष्टविशिष्ट
ध्फलानि सामोपासनान्तराण्युच्यन्ते यथाक्रमं गायत्र्यादीनां कर्मणि प्रयोगस्तथैव मनो हिंकारो मनसः सर्वकरण
प्रवृत्तीनां प्राथम्यात्तदानंतर्याद्वाक्प्रस्तावः प्रस्तावैव च चक्षुरुद्गीथः श्रेष्ठ्यात् श्रोत्रं प्रतिहारः प्रतिहृतत्वात्प्राणो निध
नं यथोक्तानां प्राणे निधनात्स्वापकाले एतद्गायत्रं साम प्राणेषु प्रोतं गायत्र्याः प्राणसंस्तुतत्वात् स य एवमेतद्गायत्रं
प्राणेषु प्रोतं वेद प्राणी भवति अविकलकरणो भवतीत्येतत्सर्वमायुरेति शतं वर्षाणि सर्वमायुः पुरुषस्येति श्रुतेः ज्योक्
छं उज्ज्वलं जीवति महान्भवति प्रजादिभिर्महान्कीर्त्या गायत्रोपासकस्यैतद्व्रतं यन्महामनाः स्यादक्षुद्रचित्तः स्यादि
त्यर्थः॥११॥ अभिमंथति स हिंकारः प्राथम्यादग्नेर्धूमो जायते स प्रस्तावः आनंतर्यात् ज्वलति स उद्गीथो हविः
संबंधाच्छ्रेष्ठ्यं ज्वलनस्यांगारा भवंति स प्रतिहारोऽंगाराणां प्रतिहृतत्वादुपशाम्यति सावशेषत्वात् संशाम्यति निःशेषो
प पशमः समाप्तिसामान्यान्निधनमेतद्रथंतरमग्नौ प्रोतं मंथने ह्यग्निर्गीयते स य इत्यादि पूर्ववत् ब्रह्मवर्चसी वृत्तस्वा
दू२ ध्यायनिमित्तं तेजो ब्रह्मवर्चसं तेजस्तु केवलं कान्तिर्बलवान् अन्नादो दीप्ताग्निर्न प्रत्यङ्ङग्निमुखो नाचामेन्न सद्भ्येत किं
चिन्न निष्ठीवेत् श्लेष्म न निरस्येन्न कुर्यादिति व्रतं॥१२॥ उपमंत्रयते स हिंकार इति प्राथम्यात् स हिंकारः ज्ञपयते तोषयति
स प्रस्तावः सह शयनमेकपर्यंकगमनं ... स्त्रिया शयनं स्त्रियोऽभिमुखो भवति स उद्गीथः प्रतिहारः का
लं गच्छति मैथुनेन पारं समाप्तिं गच्छति तन्निधनमेतद्वामदेव्यं मिथुने प्रोतं तं वा एवं मिथुनसंबंधात्स इत्यादि ॥१४॥
पूर्ववन्मिथुनी भवत्यविधुरो भवतीत्यर्थः॥ मिथुनान्मिथुनात्प्रजायते इत्यमोघरेतस्त्वमुच्यते न कांचन कांचिदपि
स्त्रियं स्वात्मतल्पप्राप्तां न परिहरेत् समागमार्थिनीं वामदेव्यसामोपासनांगत्वेन विधानादेतस्मादन्यत्र प्रतिषे
धस्मृतयो वचनप्रामाण्याद्धर्मावगतेर्न प्रतिषेधशास्त्रेणास्य विरोधः॥१३॥ उद्यन्सविता स हिंकारः प्रा
त २

थम्यादृर्शनस्योदितः प्रस्तावः प्रस्तवनहेतुत्वात्कर्णानां मध्यंदिन उद्गीथः श्रैष्ठ्यादपराह्णः प्रतिहारः पश्वादीनां गृहान्प्रतिह
रणादस्तं यन्निधनं रात्रौ गृहे निधानात्प्राणिनां एतद्बृहदादित्ये प्रोतं बृहत आदित्यदेवत्यत्वात् य इत्यादि पूर्ववत्तपन्तं न
निंदेदित्युक्तं ॥ ॥ अभ्राण्यब्भ्रसरणान्मेघ उदकसेक्तृ स कृत्वाऽऽकार्यमन्यदिति देवः रूपं समानं मेघः पर्जन्य इति मनेकरू
पत्वादस्रादिति पर्जन्यस्य विरूपं च सुरूपं च अजाविप्रसूतीन्पशून्नवरूपं रूपं पशूनाप्नोतीत्यर्थो वर्षन्तं न निंदेदित्युक्तं ॥
वैरूपं ४ वसंतो हिंकारः प्राथम्याद् ग्रीष्मः प्रस्ताव इत्यादि पूर्ववद् वैराजमृतुषु प्रोतं वेद विराजति प्रजानुवद्धा यर्तुवत् आर्तवैर्द्धर्मै
विराजं देवं प्रजादिभिर्विद्वानित्युक्तमन्यदृतून्न निंदेदित्युक्तं ॥ ॥ पृथिवी हिंकार इत्यादि पूर्ववत् शक्वर्य इति नित्यं बहुवच शं ६
नं रेवत्य इव लोकेषु प्रोताः लोकी भवति लोकफलेन युज्यत इत्यर्थः ॥ लोकान्न निंदेदित्युक्तं ॥ ॥ अजा हिंकार इ
त्यादि पूर्ववत् पशुषु प्रोताः पशून्न निंदेदित्युक्तं ॥ ॥ लोम हिंकारो देहावयवानां प्राथम्यात् त्वक् प्रस्तावः आनन्तर्या
न्मांसमुद्गीथः श्रैष्ठ्यादस्थि प्रतिहारः प्रतिहृततरत्वान्मज्जा निधनं मांत्यादित्य यज्ञायज्ञीयं नाम सामदेहावयव
वेषु प्रोतमंगी भवति समग्रांगो भवतीत्यर्थो नांगेन हस्तपादादिना विकूर्छति न कुटिलो भवति पंगुः कुणिर्वेत्यर्थः
संवत्सरं संवत्सरं मज्ज्ञो मांसानि नाश्नीयान्न सद्दयेद्वा बहुवचनं मत्स्योपलक्षणार्थं मज्जो नाश्नीयात् सर्व
र दैवनाश्नीयादिति वा ॥ इत्युक्तं ॥ ॥ अग्निर्हिंकारः प्रथमस्थानत्वाद्वायुः प्रस्ताव आनन्तर्यसामान्यादादित्य उद्गीथः
श्रैष्ठ्यान्नक्षत्राणि प्रतिहारः प्रतिहृततरत्वाच्चन्द्रमा निधनं कर्मिणां तन्निधनादिति राजनं देवतासु प्रोतं देवतानां दी
प्तिमत्त्वादिदं फलमेतासामेव वाग्न्यादीनां देवतानां सलोकतां समानलोकतां सार्ष्टितां समानर्द्धित्वं सायुज्यं
सयुग्भावमेकदेहदेहित्वमित्येतद्वा वाशब्दोऽत्रलुप्तो द्रष्टव्यः सलोकतां वेत्यादि भावनाविशेषतः फलविशेषोप
पत्तेर्गच्छति प्राप्नोति समुच्चयानुपपत्तेश्च ब्राह्मणान्न निंदेदिति ब्राह्मणा वै देवाः प्रत्यक्षं ब्राह्मणा इति श्रुतेर्ब्राह्मणनिं
दा देवतानिंदैवेति ॥ ॥ त्रयी विद्या हिंकारः अग्न्यादि साम्यात् आनन्तर्यात् त्रयी विद्यायाः अग्न्यादि कार्यत्वश्रुतेर्हिं
कारः प्राथम्यात्सर्वकर्तव्यानां त्रय इमे लोकास्तत्कार्यत्वादनन्तरत्वाच्च प्रस्तावः अग्न्यादीनामुद्गीथत्वं श्रैष्ठ्यान्नक्ष

तद्विनं विशिष्टो न ईशः स्वस्तिरोपक्ष्म बल कृतिं तस्य भो स्यात्तीति १७

त्रादीनां प्रतिहर्तृत्वात् प्रतिहारत्वं पर्वतादीनां धकार सामान्यान्निधनत्वमेतत्साम नाम विशेषेणोपासीतो सप्तम समु
द्राय: सामन्नाद्ध: सर्वस्मिन्प्रोतं त्रयी विद्यादि हिं सर्वं त्रयीविद्यादिदृष्ट्या हिंकारादिसामलक्षणमुपास्य अतीते
ष्वपि सामोपासनेषु येषु येषु प्रोतत्वं साम तद्दृष्ट्या तदुपास्यमिति विं गोमतीनां दृष्टि विशेषणादाउपस्यैवस्तस्यार्थ
त्वात्सर्वविषयसाम विद्: फलं सर्वं ह सवति सर्वं ह सेतव त्रीयथो निरूपवावितसर्वं लावेष्वि दिकूले स्थेयो वक्लि
प्राप्यनुपपत्तिस्तदेतस्मिन्नर्थे एकश्लोको मंत्रो प्यस्ति यानि पंचधा पंच प्रकारेण हिंकारादि विभागै: प्रोक्तानि त्र
णि त्रीणि त्रयी विद्यादीनि तेभ्य: पंचविंशिकेभ्यो ज्यायो महत्तरं परं व्यतिरिक्तमन्यद्वस्त्वंतरं नास्ति न विद्यत इत्यर्थ:॥त
त्र हि सर्वस्यांतर्भाव: यस्तद्यथोक्तं सर्वात्मकं साम वेद स वेद सर्वं स सर्वज्ञो भवतीत्यर्थ:॥सर्वा दिशो बलिं दि
शो अस्मा एवं विदे बलिं लोगं हरंति प्रापयंतीत्यर्थ:॥सर्वमस्मीत्येवमेतत्सामोपासीत तस्यैतद्
व्रतं द्विरुक्ति: सामोपासनसमाप्त्यर्था॥ ॥सामोपासनप्रसंगेनागानविशेषादिसंपत्फलानुरूपादिवयते
कवित्वविशेषसंबंधाद्विनर्दिंगा नमिति वाक्यशेषस्त्वसाम्न: संबंधिपशुभ्यो हितं पशव्यमग्नेरग्निदेवत्य
मौशीथतज्ज्ञानं। तदर्थमेवं विशिष्टं वृणे प्रार्थयेय इतिकश्चिद्यजमान उद्गाता वा मन्यते अनिरुक्तो: प्रजापतेरसं
ष्यविशेषित: प्रजापते: प्रजापतिदेवत्य: सगानविशेषो निरुक्तस्य प्रजापतेर्निरुक्तोऽस्पष्ट: सोमस्य स
मदेवत्य: सग्ज्ञा घट्टत्यर्थ: मृदुश्लक्ष्णं वगानं वायो वायुदैवत्यं तत्र श्लक्ष्णं बलवच्च प्रयत्नाधिक्योपेतं
इन्द्रस्यैन्द्रं गानं क्रौंचं क्रौंचपक्षिनिर्नादसमं बृहस्पतेर्बार्हस्पत्यं तदपध्वांतं लिन्नकांस्यस्वरवत्समं वरुणस्यै
तद्गानं तान्सर्वानेवोपासीत सेवेत प्रयुंजीत वारुणं त्वेवैकं वर्जयेदमृतत्वं देवेभ्य आगायानीत्यागानिसाध ॥१८॥
यानि स्वधां पितृभ्य: आगायान्याशामनुष्येभ्य आशां प्रार्थनां प्रार्थितमित्येतत् तृणोदकं पशुभ्यः स्वर्ग
लोकं यजमानायान्नमात्मन इत्येतान्यागायानीत्येवर्थ: तानि मनसा चिंतयन्ध्यायन्नप्रमत्त: स्वरोष्मव्यंजनगानादि
सर्वे स्वराः ... स्य: स्वरा अकारादय इंद्रस्य बलकर्मण आत्मानो देहावयवस्थानीया: सर्व ऊष्माण: शषसहादय:
य: प्रजापतेर्विसर्गकर्मण आत्मानः सर्वे स्पर्शा: कादयो व्यंजनानि मृत्योरात्मानस्तमेव विदम्
विरालः पौ प्रपस्या

ज्ञातारं यदि कश्चित्स्वरेषूपालभेत त्वं स्वरं दुष्टं प्रयुक्तवानित्येवमुपालब्ध इन्द्रं प्राणमीश्वरं शरणमाश्रयं प्रपन्नोऽभूवं स्वरान्
प्रयुंजानोऽहं स इन्द्रो यत्तव वक्तव्यं त्वां प्रति वक्ष्यति स एव देव उत्तरं दास्यतीति ब्रूयात् अथ यद्येनमूष्मसु तथैवोपालभे
त प्रजापतिं शरणं प्रपन्नोऽभूवं स त्वा प्रतिपेक्ष्यति संचूर्णयिष्यतीत्येनं ब्रूयात् अथ यद्येनं स्पर्शेषूपालभेत मृत्युं शरणं प्र
पन्नोऽभूवं स त्वा प्रतिधक्ष्यति भस्मीकरिष्यतीत्येनं ब्रूयात् यत इन्द्राद्यात्मानः स्वरादयोऽतः सर्वे स्वरा घोषवन्तो बलवन्तो व
क्तव्यास्तथाहमिन्द्रे बलं ददानीति बलमादधानीति तथा सर्व ऊष्माणोऽग्रस्ता अनन्तःप्रविष्टा अनिरस्ता बहि
रप्रक्षिप्ताः विवृता विवृतप्रयत्नोपेताः प्रजापतेरात्मानं परिददानि प्रयच्छानीति सर्वे स्पर्शा लेशेन शनकैरनभिनि
हिता अनभिनिक्षिप्ताः वक्तव्या मृत्योरात्मानं परिहराणीति ॥ २२ ॥ ओंकारस्योपासनविध्यर्थं त्रयो धर्मस्कंधा इत्याद्यारभ्यते नैवं
मंतव्यं सामावयवभूतस्यैवोद्गीथादिलक्षणस्योंकारस्योपासनात्फलं प्राप्यत इति किं तर्हि यत्सर्वैरपि सामोपासनैः
कर्मभिश्चाप्राप्यं तत्फलममृतत्वं केवलादोंकारोपासनात्प्राप्यत इति तत्स्तुत्यर्थं सामप्रकरणे तदुपन्यासः त्रयस्त्रि
संख्याकाः धर्मस्य स्कंधा धर्मस्कंधा धर्मप्रविभागा इत्यर्थः के त इत्याह यज्ञोऽग्निहोत्रादिरध्ययनं सनियमस्यर्गा
द्यभ्यासो दानं बहिर्वेदि यथाशक्ति द्रव्यसंविभागो भिक्षमाणेभ्य इत्येष प्रथमो धर्मस्कंधो गृहस्थसमवेतत्वात् तन्निर्व
र्तकेन गृहस्थेन निर्दिश्यते प्रथम एक इत्यर्थो द्वितीयतृतीयश्रवणात् ॥ तप एव द्वितीयस्तप इति कृच्छ्रचा
न्द्रायणादि तद्वांस्तापसः परिव्राड्वा न ब्रह्मसंस्थः आश्रमधर्ममात्रसंस्थः ब्रह्मसंस्थस्य त्वमृतत्वश्रवणात् द्वितीयो धर्म
स्कंधो ब्रह्मचार्याचार्यकुले वसितुं शीलमस्येत्याचार्यकुलवासी अत्यंतं यावज्जीवमात्मानं नियमैराचार्यकुलेऽवसादय
न् क्षपयन् देहं तृतीयो धर्मस्कंधोऽत्यंतमित्यादिविशेषणान्नैष्ठिक इति गम्यते उपकुर्वाणकस्य स्वाध्यायग्रहणार्थत्वान्न
हि पुण्यलोकत्वं ब्रह्मचर्येण सर्व एते त्रयोऽप्याश्रमिणो यथोक्तैर्धर्मैः पुण्यलोका भवन्ति पुण्यो लोको येषां त इमे पुण्य
लोका आश्रमिणो भवंति अवशिष्टस्त्वनुक्तः परिव्राट् ब्रह्मसंस्थो ब्रह्मणि सम्यक्स्थितः सोऽमृतत्वं पुण्यलोकविल
क्षणममरणभावमात्यंतिकं नापेक्षिकं देवाद्यमृतत्ववत् पुण्यलोकात्पृथगमृतत्वस्य विभागकरणाद्यदि च पुण्यलो

कातिशयमात्रममृतत्वमसविषयत्वं तु पुण्यलोकत्वादिलक्षणं नावद्यच्छिलक्षोपदेशात्त्वात्यंतिकममृतत्वमिति गम्यते।
अत्र चाश्रमधर्मफलोपन्यासः प्रणवसेवास्तुत्यर्थं न तत्फलविध्यर्थं। स्तुतये च प्रणवसेवाया आश्रमधर्मफलविध वे०३
यवेति हि लिप्येत वा कर्ता तस्मात्स्तुतिप्रसिद्धिश्रयैतत्फलानुवदेन प्रणवसेवाफलममृतत्वं ब्रुवन्प्रणवसेवां स्तौति यथा पू
र्णवर्मणः सेवासक्तः परिधानमात्रफला। राजवर्मणस्तु सेवा राज्यतुल्यफलेति तद्वत्प्रणवस्य तत्सत्यं परं ब्रह्म तत्प्र
तीकत्वादेतद्ध्येवाक्षरं ब्रह्म एतद्ध्येवाक्षरं परमित्याद्याम्नायात्काठके युक्तं तत्सेवातोऽमृतत्वं मन्त्राकुः केचि
त्तु चतुर्णामाश्रमिणामविशेषेण स्वकर्मानुष्ठानात्पुण्यलोकतेत्युक्ता ज्ञानवर्जितानां सर्व एते पुण्यलोका भवंती
तिनात्तु परिव्राडवशेषितः परिव्राजकस्यापि ज्ञानं यमानियमास्थितमेव एतत्तप एव द्वितीय इत्यत्र तपःशब्देन परिव्रा वे
ट्तापसयोर्ग्रहणे तावतस्तेषां चैवमेव चतुर्णां यो ब्रह्मसंस्थः प्रणवसेवकः सोऽमृतत्वमेतीति चतुर्णामविशिष्टत्वाद्वि योऽयं ब्रह्मसं वसे०८
स्थत्वे प्रतिषेधाच्च स्वकर्मच्छिद्रे ब्रह्मसंस्थतायाः सामर्थ्यापेक्षोपपत्तेः न च यज्ञादिरहितानां ब्रह्मसंस्थत्वाद्?: परिव्राजके
सं रूढो ब्रह्मणि स्थितिनिमित्तमुपादाय प्रवृत्तत्वान्न हि रूढिर्नाश्रित्य निमित्तमुपाददते सर्वेषां च ब्रह्मणि स्थितिर्भवेदामाय वनो०८
त्रयत्र निमित्तं नमस्ति ब्रह्मणि स्थितिस्तस्य तस्य निमित्तं वा स्वकौकं संतं ब्रह्मसंस्थशब्दं परिव्राडेकविषये संकोचे कारणा
तावान्निरोधकमनुरूढौ कथं युक्तं न च परिव्राज्याश्रमधर्ममात्रेणामृतत्वं ज्ञानानर्थक्यप्रसंगात् परिव्राज्यधर्मयुक्तमे
व ज्ञानममृतत्वसाधनमिति चेन्न आश्रमधर्मत्वाविशेषात् धर्मो वा ज्ञानविशिष्टोऽमृतत्वसाधनमित्येतदपि सर्वाश्र
मधर्माणामविशिष्टं न च वचनमस्ति परिव्राजकस्यैव ब्रह्मसंस्थस्य मोक्षो नान्येषामिति ज्ञानान्मोक्ष इति च सर्वो ॥९७॥
छ पनिष्पन्नं सिद्धांतस्तस्माद्यो ब्रह्मसंस्थः स आश्रमविहितकर्मवान्सोऽमृतत्वमेतीति। न कुर्यात् कर्मनिमित्तं चेद्विस्वाश्र
य त्यजो विरोधात् कर्त्रादिकारकक्रियाफलभेदप्रत्ययवत्त्वं हि निमित्तमुपादाय इदं कुरु इदं मा कार्षीरिति कर्मविध
यः प्रवृत्ताः स्वल्पि। निमित्तं न शास्त्रकृतं सर्वप्राणिषु दर्शनात् सदेकमेवाद्वितीयमात्मैवेदं सर्वं ब्रह्मैवेदं सर्वमिति

नास्त्यन्यः प्रत्ययो विद्यारूपः स्यात् सा विद्या क्रियाकारकफलभेदप्रत्ययं कर्मविधिनिमित्तमनुपमृद्य न जा
यते। भेदाभेदप्रत्यययोर्विरोधात् न हि तैमिरिकद्विचंद्रादिभेदप्रत्ययमनुपमृद्य तिमिरापगमे चंद्रैकत्व
प्रत्यय उपजायते विद्याविद्याप्रत्यययोर्विरोधात् तत्रैवं सति यं भेदप्रत्ययमुपादाय कर्मविधयः प्रवृत्ताः। स यस्यो
पमर्दितः सदेकमेवाद्वितीयं तत्सत्यं विकारभेदोऽनृतमित्येतद्वाक्यप्रमाणजनितेनैकत्वप्रत्ययेन तस्य सर्वक
र्मभ्यो निवृत्तो निमित्तनिवृत्तेः स च निवृत्तकर्मा ब्रह्मसंस्थ उच्यते स च परिव्राडेवान्यस्यासंभवादन्यो ह्यनि
वृत्तभेदप्रत्ययः सोऽन्यच्छृण्वन्नन्यत्पश्यन्नन्यद्विजानन्निदं कृत्वेदं प्राप्स्यामीति हि मन्यते तस्यैवं कुर्वतो न ब्र बुद्ध
ह्मसंस्थता वाचारंभणमात्रविकारानृताभिसंधिप्रत्ययवत्त्वान्न चासत्यमित्युपमर्दिते भेदप्रत्यये
सत्यमिदमनेन कर्तव्यं मयेति प्रमाणप्रमेयबुद्धिरुत्पद्यते। आकाश इव एकत्वबुद्धिविवेकिनोपमर्दितेपि भेदप्रत्यये मालिन ८
कर्मभ्यो न निवर्त्तते चेत्प्राग्वत् भेदप्रत्ययोपमर्दनादेकत्वप्रत्ययविधायकं वाक्यमप्रमाणीकृतं स्यादभक्ष्यभक्षणादिप्र
तिषेधवाक्यानां प्रामाण्यवद्युक्तमेकत्ववाक्यस्यापि प्रामाण्यं सर्वोपनिषदां तत्परत्वात् कर्मविधीनामप्रामाण्यप्रसंग
इति चेन्नानुपमर्दितभेदप्रत्ययवत्पुरुषविषये प्रामाण्योपपत्तेः स्वप्नादिप्रत्यय इव प्राक्प्रबोधाद्विवेकिनामकर
णात्कर्मविधिप्रामाण्योच्छेद इति चेन्न काम्यविधिवदनुच्छेदान्न हि कामात्मता न प्रशस्तेत्येवं विज्ञानवद्भिः का
म्यानि कर्माणि नानुष्ठीयंत इति काम्यकर्मविधय उच्छिद्यंते अनुष्ठीयंत एव कामिभिरिति तथा ब्रह्मसंस्थैर्ब्रह्मविद्भिर्ना
नुष्ठीयंते कर्माणीति न तद्विधय उच्छिद्यंते अब्रह्मविद्भिरनुष्ठीयंत एव परिव्राजकानां भिक्षाचरणादिवदुत्पन्नैकत्वप्रत्य
यानामपि गृहस्थादीनामग्निहोत्रादिकर्मणां निवृत्तिरिति चेन्न प्रामाण्यचिंतायां पुरुषप्रवृत्तेरदृष्टांतत्वान्न हि
नाभिचरेदिति प्रतिषिद्धमप्यभिचरणं कश्चित्कुर्वन्दृष्ट इति शास्त्रोद्भवं रहितेनापि विवेकिनाभिचरणं क्रियते नैव कर्मवि
धिप्रवृत्तिनिमित्ते भेदप्रत्यये बाधितेऽग्निहोत्रादौ प्रवर्तकं निमित्तमस्ति परिव्राजकस्येव भिक्षाचरणादौ बुभुक्षा

विधिजनिते न्य स सर्वे ५

दिप्रवर्त्तकं मिताप्यकारणेप्रत्यवायलयप्रवर्त्तकमितिचेन्नो द्वेसेदप्रत्ययवतोधिकृतत्वाद्वेदप्रत्ययवान्नलुपमर्द्दितसेद
बुद्धिर्विषयास्येयः सकर्मण्यधिकृतप्रत्यवायाम 'योग्यधिकृतः कर्मणितस्यतदकरणे प्रत्यवायो न निवृत्ताधिकारस्य
गृहस्थस्येवब्रह्मचारिणो विशेषधर्मानलुष्ठाने 'एवं तर्हि सर्वः स्वाश्रमे स्वाश्रमस्थत्वपनैकल्पप्रत्ययः परिव्राडिति
चेन्न 'स्वस्वधर्मनिरतानेदवुध्यनिवृत्तेः कर्मोर्थत्वाच्चेतराश्रमिणामथकर्मकुर्वीयेतिश्रुते स्तस्माच्च स्वस्वाश्रमित्वासावा
द्विन्तुरेवपरिव्राडनग्नहस्तादिरकल्पप्रत्ययेन विधिनिमित्तसेदप्रत्ययस्योपमर्द्दितत्वाद्यमनियमाद्यनुपपत्तिः
परिव्राजकस्येतिचेन्न कुल्लुद्वादिनेकल्पप्रत्ययासव्याप्तिवितस्योपपत्तेर्निवृत्यर्थत्वान्नत्वप्रतिषिद्धसेवाप्राप्तिरेक
त्वप्रत्ययोस्तेः प्रागेवप्रतिषिद्धत्वान्नहिरात्रोकूपेकंटकेवापतितइतिपिसवितरिपतितितस्मिन्नेव तस्मात्सिद्ध
निवृत्तकर्मालिंगकएवब्रह्मसंस्थइतियत्पुनरुक्तं सर्वेषां ज्ञानविवर्जितानां पुण्यलोकतेतिसत्यमेतद्यथा स्नातप
न्नाकृतेन परिव्राडप्युक्तः स्यैतदसकलगमात्परिव्राजकस्येवब्रह्मसंस्थतासंभवासएव ब्रह्मचारी षितप्रत्ययवोधाम 'एक
त्वविज्ञानवतोऽग्निहोत्रादिवत्तपोनिवृत्तेस्वसेदबुद्धिमत एव हितपः कर्त्तव्यतास्यादतेनकर्मच्छिद्रेत्र संस्था ता
सामर्थ्यमप्रतिषेधश्चप्रत्युक्तस्तथाज्ञानपेवानवानिवृत्तकर्मापरिव्राडिति ज्ञानवैयर्थ्यमेप्रत्युक्तं 'यत्पुनरुक्तं
वराहादिनाशृवत्परिव्राजकेन रूपेणैव ब्रह्मसंस्थताद्युक्तइतितत्परिहृतमेतत्तस्यैवब्रह्मसंस्थतासंभवान्नान्यस्ये
ति 'यत्पुनरुक्तं रूपे लिंगाद्यानिमित्तं नोपादद्तइति तन्नग्नहस्ततत्परिव्राजकादिनाशृब्दर्शनानग्नहस्थिति
परिव्राडयतच्चरणादिनिमित्तोपादानाउपिगृहस्थपरिव्राजकाश्रमिविशेषविविशिष्टजातिमतिचगृहस्थइति ॥१९॥
परिव्राजकइतिवत्तद्वेतिरूपकादृत्वयंतेवाहुः 'नयत्रयत्रनिमित्तानितत्रतत्रवर्त्तते प्रसिद्धत्वाबात्तथेहापिब्रह्म
संस्थत्वाद्वोनिवृत्तसर्वकर्मतत्साधनपरिव्राडकविषयेस्याश्रमिणिपरमहंसाख्येवृत्तइहत्वविकमर्हतिमुख्यामु
तत्त्वफलश्रवणादतश्चेदमेवैकंवैतंपारिव्राज्यंनयज्ञोपवीतत्रिदंडकमंडल्वादिपरिग्रहवान्मुंडोपरिग्रहत्यत्व
हे।

ऽ संगच्छतिचक्र तिरत्यान्त्रमित्यः परमंषवित्रमित्यादिच श्चेतान्चनरीमयैं निरुक्तति निर्नमस्कार इत्यादिस्मृतित्यश्च।त
स्मात्कर्मनकुर्वीतियतयः पारदर्शिनिक्तस्मादलिंगोधर्मज्ञोऽव्यक्तलिंग इत्यादिस्मृतित्यस्यैश्च।यत्तुसांख्यैः कर्म
त्यागोऽभ्युपगम्यतेक्रियाकारकफलत्वेदबुद्धेः सत्यत्वाभ्युपगमात्तन्मृषात्मिबुद्धैश्च शून्या।ताभ्युपगमादकर्तृत्वम
भ्युपगम्यते।तदप्यसन्नदभ्युपगंतुःसत्वाभ्युपगमाच्छ्राद्धैरल्लुसतया ऽकर्तृत्वाभ्युपगमः।सोऽयसन्न्कारकबुद्धेरनि
वर्तितीतलिप्समाणेन।तस्माद्वेदांतप्रमाणजनितेकर्तृत्वप्रत्ययवतएवकर्मनिवृत्तिलक्षणं पापारिव्राज्यंब्रह्म
संस्थत्वंचेतिसिद्धं।एतेनगृहस्थस्यैकत्वविज्ञानेसतिपारिव्राज्यमर्थसिद्धं।ननुगृहस्थस्यादनदोषत्वात्कस्मात्स्यरिव्र ब्रा॰ ६
जन्चीरहावाक्यदेवानांयोऽग्निसुधायस्यइतिश्रुतेर्नदैवनेवोत्सादितत्वात्कुलसेनएवक्लिसएकत्वदर्शनेजातेऽपा
गादग्नेरग्नित्वमितिश्रुतेरतोनदोषलागृहस्थःपरिव्राडग्निरिति।यत्संस्थोऽमृतत्वमेतितन्निरूपणार्थमिदमाह
प्रजापतिर्लोकानभ्यतपदितिप्रजापतिर्विराट्कश्यपोवालोकानुद्दिश्यतेषुसारजिघृक्षयाल्यतपदत्सितापंकृतवान्ध्यानंतपःकृतवानित्य
र्थः।तेभ्योऽभितप्तेभ्यःसारभूतात्रयीविद्यासंप्रास्रवत्प्रजापतेर्मनसिप्रत्यभादित्यर्थः।तामभ्यतपत्सूर्वेवत्तस्या
ऽअभितप्तायाएतान्यक्षराणिसंप्रास्रवंतव्याहृतयस्तान्यक्षराण्यभ्यतपत्तेभ्योऽभितप्तेभ्यःॐकारःसंप्रा
स्रवत्तत्रप्रकृतिरूपमित्याह।तद्यथाशंकुनापर्णानिसर्वाणिपर्णानिसंतृण्णानिव्याप्तानीत्यर्थः।एवमोंकारेणब्रह्मणःपरमात्मनःप्रतीकस्तेनसर्वावाक्संतृण्णाकारोवेसर्वा।नामि
तिश्रुतेःपरमात्मविकारश्चनामधेयमात्रमित्यतॐकारएवेदंसर्वमितिद्विरभ्यासआदरार्थः।लोकादिनिर्ग
दकथनमथोंकारस्तुत्यर्थमिति॥ ॥सामोपासनप्रसंगेनकर्मगुणत्वात्तन्निवर्त्यॐकारंपरमात्मप्रत
कत्वायाभूतत्वहेतुत्वेनमहतीकृत्यप्रकृतस्यैवयज्ञस्यांगस्तुतानिसामहोममंत्रोत्थानीदनान्युपदिदिक्षन्नाह
ब्रह्मवादिनोवदंतीयत्प्रातःसवनंप्रसिद्धंतद्वसूनांतेषांप्रातःसवनसंबद्धोऽयंलोकोवशीकृतःसवनेनाग्नेः कु॰ ५

क्र

स्तथा रुद्रैर्माध्यंदिनसवनेनांतरिक्षलोकः आदित्यैश्च विश्वेदेवैश्च तृतीयसवनेनास्य तृतीयो लोको वशीकृत
इति यजमानस्य लोकोन्यः परिशिष्टो न विद्यतेऽतः कुतः खलु यजमानस्य लोको यदर्थं यजते न कश्चिल्लोकोस्तीति
अभिप्रायो लोकाय वै यजमानो यजत इति श्रुतेर्लोकाभावे च स यो यजमानस्तं लोकं स्वीकरणोपायं साम
होममंत्रोत्थानलक्षणं न विद्यान्न विजानीयात्सोऽज्ञः कथं कुर्याद्यज्ञं न कथं च न तस्य कर्तृत्वमुपपद्यत इत्यर्थः।
सामादिविज्ञानस्तुतिपरत्वान्नाविदुषः कर्तृत्वं कर्ममात्रविदः प्रतिषिध्यते। स्तौत्येव सामादिविज्ञानस्य विद्वत्क
र्तृत्वप्रतिषेधायैवेति हि लिखितं बाधे माघे चोषस्यैकांडे ५ विदुषोपि कर्मास्तीति हेतुमवोचाम। अथैतद्वक्ष्यमाणं
सामाद्युपायं विद्वान्कुर्यादित्येतदाह। पुरा प्रातरनुवाकस्योपाकरणस्य प्रारंभाज्जघनेन गार्हपत्यस्य
पश्चादुदङ्मुखः सन्नुपविश्य स वासवं वसुदेवत्यं सामाभिगायति। लोकद्वारमस्य पृथिवीलोकस्य प्राप्तये
द्वारमपावृणु हे अग्ने येन द्वारेण पश्येम त्वां राज्यायेत्यथानंतरं जुहोत्यनेन मंत्रेण नमोग्नये प्रह्वीभूतास्त
स्यैवयं हि पृथिवीक्षिते पृथिवीनिवासाय लोकक्षिते पृथिवीलोकनिवासायेत्यर्थः। लोकं मे मह्यं यजमानाय
विंद लभस्वैष वै मम यजमानस्य लोक एता गंतास्म्यत्रास्मिंल्लोके यजमानोऽहमायुषः परस्तादूर्ध्वं मृतः
सन्नित्यर्थः। स्वाहेति जुहोत्यपजह्यपनय परिघं लोकद्वारार्गलमित्येतं मंत्रमुक्त्वोत्तिष्ठति एवमेतैर्वसुभिः प्रा
तः सवनसंबद्धो लोको निष्क्रीतस्तस्मात्तस्मै प्रातःसवनं वसवो यजमानाय संप्रयच्छंति। तथाग्नीध्रीयस्य दक्षिणाग्ने ॥२४॥
र्जघनेनोदङ्मुख उपविश्य रौद्रं सामाभिगायति यजमानो रुद्रदेवत्यं वैराज्यायांतरिक्षक्षिते इत्यादि समानं तथाह
वनीयस्योदङ्मुख उपविश्य स आदित्यदेवत्यं आदित्यं वैश्वदेवं च सामाभिगायति क्रमेण स्वाराज्याय
साम्राज्यायेति विशेषः। इत्येव सामादि समानमन्यद्विदित्वा पठनेति वक्तव्यवचनमात्रं विशेषः। यजमानत्वं
एतास्म्यत्र यजमान इत्यादिलिंगादेष ह वै यजमानस्य वेद यथोक्तस्य सामादेर्विद्वान्यज्ञस्य मात्रां यज्ञयाथा

त्यं वेद यथोक्तं य एवं वेद य एवं वेदेति॥ द्विरुक्तिरध्यायपरिसमाप्त्यर्था॥ इति श्रीगोविंदभगवत्कृतौ छांदोग्यो
पनिषद्विवरणे द्वितीयः प्रपाठकः समाप्तः॥ ॥असौ वा आदित्य इत्याद्यध्यायारंभे संबंधोतीतानंतराध्या
यांते क्तं यज्ञस्य मात्रां वेदेति यज्ञविषयाणि च सामहोममंत्रोत्थानानि विशिष्टफलप्राप्तये यज्ञांगभूतानि
उपनिदिष्टानि सर्वयज्ञानां च कार्यनिर्वृत्तिरूपः सविता महत्या श्रिया दीप्यते स एव सर्वप्राणिकर्मफलभूतः
प्रत्यक्षं सर्वैरुपजीव्यते। अतो यज्ञव्यपदेशानंतरं तत्कार्यभूतसवितृविषयमुपासनं सर्वपुरुषार्थेभ्यः श्रे
ष्ठतमफलं विधास्यामीत्येवमारभते श्रुतिरसौ वा आदित्यो देवमध्वित्यादि। देवानां मोदनान्मध्विव मध्वसा
वादित्यो वस्वादीनां च मोदनहेतुत्वं वक्ष्यति सर्वयज्ञफलरूपत्वादादित्यस्य कथं मधुत्वमित्याह। तस्य मधु
२ नो द्यौरेव च्छार्मस्यैवमधुनस्तिरश्चीनश्चासौ वंशश्चेति तिरश्चीनवंशस्तिर्यग्गतो वंशो हि द्युलोको लक्ष्यते। अंतरिक्षं च
मधुपूपोऽपकवंशालग्नः सन्लंबत इवातो मधुपूपसामान्यादंतरिक्षं मधुपूपो मधुनः सवितुराश्रयत्वाच्च मरी
चयो रश्मयो रश्मिस्था आपो भौमाः सवित्राकृष्टाः एता वा आपः सुराज्ञोय न्मरीचय इति हि विज्ञायते
अंतरिक्षमधुपूपस्थरश्म्यंतर्गता भ्रमरबीजभूताः पुत्रा इव हिता लक्ष्यंत इति पुत्रा इव पुत्रा
मधुपूपनाड्यंतर्गता हि भ्रमरपुत्रास्तस्य सवितुर्मध्वाश्रयस्य मधुनो ये प्राचः प्राच्यां दिशि गता रश्मय
स्त एवास्य प्राच्यः प्राग्गता मधुनाड्यो मधुनाड्य इव मधुधारछिद्राणीत्यर्थः। तत्र ऋच एव मधुकृतो लो
हितरूपं सवित्राश्रयं मधु कुर्वंति। ता मधुकृतो भ्रमरा इव यतो रसमादाय मधु कुर्वंति तत्पुष्पमिव
पुष्पं ऋग्वेद एव तत्र ऋग्ब्राह्मणसमुदायस्य ऋग्वेदाख्यत्वात् शब्दमात्राद्धर्थलोग्यरूपरसनिस्रावासंभवाद् ऋ
ग्वेदशब्देनात्र ऋग्वेदविहितं कर्म ततो हि कर्मफलभूतमधुरसनिःस्रावसंभवान्मधुकरैरिव पुष्पस्थानीयो
यादृग्वेदविहितात्कर्मण आप आदाय ता अग्निर्मधुनिर्वर्त्स्यति का ता आप इत्याह। ताः कर्मणि प्रयुक्ताः सो

माज्यपयोरूपा अग्नौ प्रक्षिप्तास्तत्पाकाभिनिर्वृत्ता अमृता अमृतार्थत्वादत्यंतरसवत्य आपो भवंति। तद्रसाना
दायतावा एता ऋचः पुष्पेभ्यो रसमाददाना इव भ्रमराः ऋच एतमृग्वेदविहितं कर्म पुष्पस्थानीयमभ्यतपन्न
भितापं कृतवत्य इवैता ऋचः कर्मणि प्रयुक्ता ऋग्भिर्हि मंत्रैः शस्त्राद्यंगभावमुपगतैः क्रियमाणं कर्म मधुनिर्व
र्तकं रसं मुंचंतीत्युपपद्यते पुष्पाणीव भ्रमरैराकृष्यमाणानि तदेतदाह॥ तस्य ऋग्वेदस्याभितप्तस्य कोसौ
रसोयः ऋग्भ्रमरकृताभितापनिःसृत इत्युच्यते। यशो विश्रुतत्वं तेजो देहगता दीप्तिरिंद्रियं सामर्थ्योपेतैरिंद्रि
यैरवैकल्यं वीर्यं सामर्थ्यं बलमित्यर्थोऽन्नाद्यमन्नं चैतदाद्यं च येनोपयुज्यमानेनाहन्यहनि देवानां स्थि
तिः स्यात्तदन्नाद्यमेष रसोऽजायत यागादिलक्षणात्कर्मणो यश आद्यमन्नाद्यपर्यंतं तद्व्यक्षरद्विशेषेणा
क्षरदगमत् गत्वा च तदादित्यमभितः पार्श्वतः पूर्वभागं समविशदाश्रयदमुष्मिन्नादित्ये संचितं
कर्मफलाख्यं मधु सोऽश्नाम इत्येवं हि यज्ञा आदित्यलक्षणफलप्राप्त्यर्थं कर्माणि क्रियंते मनुष्यैः। केदारनिष्पा
दनमिव कर्षकैस्तदेतत्प्रत्यक्षं प्रदर्श्यते श्रद्धाहेतोस्तद्वा एतत् किं तद्यदेतदादित्यस्योद्यतो दृश्यते रोहितं रूपं॥
हि अथ येऽस्य दक्षिणा रश्मय इत्यादिसमानं यजूंष्येव मधुकृतो यजुर्वेदविहिते कर्मणि प्रयुक्तानि पूर्ववन्मधु
कृत इव यजुर्वेदविहितं कर्म पुष्पस्थानीयं पुष्पमित्युच्यते ता एव सोमामृता आपस्तानि वा एतानि
यजूंष्येतं यजुर्वेदमभ्यतपन्नित्येवमादि समानं मध्वेतदादित्यस्य शुक्लं रूपं अथ येऽस्य प्रत्यंचो रश्म ॥२०॥
य इत्यादि समानं तथा साम्नां मध्वेतदादित्यस्य कृष्णं रूपं अथ येऽस्योदंचो रश्मयः इत्यादि समानम् अथर्वांगिर
सोऽथर्वणा अंगिरसा च दृष्टा मंत्रा अथर्वांगिरसः कर्मणि प्रयुक्ता मधुकृत इतिहासपुराणं पुष्पं तयोश्चेति
हासपुराणयोरश्वमेधे पारिप्लवासु रात्रिषु कर्मांगत्वेन विनियोगः सिद्धो मध्वेतदादित्यस्य परः कृष्णं सु
मतिशयेन कृष्णमित्यर्थः। अथ येऽस्योर्ध्वा इत्यादि पूर्ववद्गुह्या गोप्या रहस्या एवादेशा लोकद्वारीयादिविधय

रूप२

उपासनानि यकर्मांगविषयाणि मधुकृतोथ्र्वैवङ्गिरकारास्त्रपावारव्यपुष्पसमानमन्यन्मध्वेतदादित्यस्य मध्ये
ह्योसतत इवसमादित इष्टेर्दूयते संवहतीवेदवास्ते यथोक्ता रोहितादिविशेषा रसानां रसाः केषां रसानामि
त्याह। वेदा हि यस्माल्लोकनिस्यंदत्वात्सारा इति रसास्तेषां रसानां कर्मरसावमापन्नानां रसानामप्येते रोहिता
दिविशेषा रसा अत्यंतसारभूता इत्यर्थः। तथाभूतानाममृतानि वेदा ह्यमृताः नित्यत्वात्तेषामेतानि रोहितादीरू
पाणि अमृतानि रसानां रसा इत्यादि कर्मस्तुतिरभिप्रायस्यैवं विशिष्टान्यमृतानि फलानीति। तत्र यत्प्रथमम
मृतं रोहितरूपलक्षणं तद्वसवः प्रातःसवनेशानाउपजीवंत्यग्निना मुखेनाग्निना प्रधानभूतेनाग्निनैव प्र
धानाः संतदुपजीवंतीत्यर्थः। न्याधंर सोऽङ्गानामत इति वचनात्कर्मवत्कग्रासमश्नंतीति प्राप्तं तत्प्रतिषिध्यते।
न वै देवा अश्नंति न पिबंतीति कथं तर्ह्युपजीवंतीत्युच्यते एतदेव हि यथोक्तममृतं रोहितं रूपं दृष्ट्वोपलभ्य
सर्वकरणैरनुभूय तृप्यंति दृशेः सर्वकरणद्वारोपलब्ध्यर्थत्वान्ननु रोहितं रूपं दृष्ट्वेत्युक्तं। कथमन्येंद्रियवि
ष लं यत्तवरूपस्येति। न यशआदीनां श्रोत्रादिगम्यत्वाच्छ्रोत्रग्राह्यं यशस्तेजोरूपं चाक्षुषमिंद्रियं विषयग्रहणका
र्यानुमेयं करणसामर्थ्यं वीर्यं बलं देहगतं तत्सामर्थ्यः प्राणवतः अन्नाद्यं प्रत्यहमुपजीव्यमानं शरीरस्थितिका
रं यद्भवति रसो ह्येवमात्मकः सर्वाणि दृष्ट्वा तृप्यंति सर्वदेवा दृष्ट्वात्तृप्यंतीति सर्वे देवा दृष्ट्वा तृप्यंत्येतत्सर्वं स्वक
रणैरनुभूय तृप्यंतीत्यर्थः। आदित्यसंश्रयाः संतो वैगंध्यादिदेहकरणदोषरहिताश्च। किं ते निरुद्यमा अमृतमु
पजीवंति न। कथं तर्हि तदेव रूपमभिलक्ष्याधुना भोगावसरो नास्माकमिति बुध्वाभिसंविशंत्युदासते। यदा
वै तस्यामृतस्य भोगावसरो भवेत्तदैतस्मादमृताद्रूपाद्भोगनिमित्तमित्यर्थः। एतस्माद्रूपादुद्यंत्युत्साहवंतो भव
तीत्यर्थः। न ह्यनुत्साहवतामनुतिष्ठतामलसानां भोगप्राप्तिर्लोके दृष्टास्य यः कश्चिदेतदेवं यथोक्तमेवं द्वि। ३
मृडन्यर्थं मधुकरतापरससंहरणमृग्वेदविहितकर्मपुष्पात्तस्य चादित्यसंश्रयणं रोहितरूपत्वं चामृ
तस्य प्राचीदिग्गतरश्मिनाडीसंस्थतां वसुदेवभोग्यतां तद्विदश्च वसुभिः सहैकतां गत्वा अग्निना मुखेनोप

ते ६

जीवनं दर्शनमात्रेण न[illegible]निंचं तो गाव सरतु धमानंतकाळापायसंवेदनं चेदसौ पिवस्तुवत्सर्वं तथैवानुभवति किंचयं
तंकाळे विद्यांस्तदमृतमुपजीवतीत्युच्यते। स विद्वान्यावदादित्यः पुरस्तात्प्राच्यां दिश्युदेता पश्चात्प्रतीच्यामस्तमे
ता तावद्वसूनां भोगकाळस्तावंतमेव काळं वसूनामाधिपत्यं स्वाराज्यं पर्येता परितो गंता भवती यथोनतथा
यथा चंद्रमंडळस्थः केवळकर्मी परतंत्रो देवतानामन्नभूतः किंतर्ह्याधिपत्यं स्वाराज्यं वाधिगच्छति॥ ॥अथ
यद्वितीयममृतं तद्रुद्रा उपजीवंति। स यावदादित्यः पुरस्तादुदेता पश्चादस्तमेता द्विस्तावद्वततो द्विगु
णं काळं दक्षिणत उदेतोत्तरतोऽस्तमेता रुद्राणां तावद्भोगकाळस्तथा पश्चादुत्तरत उर्ध्वमुदेता विपर्ययेणास्तमेता
।पूर्वस्मात्पूर्वस्माद्द्विगुणोत्तरोत्तरेण काळेन। नेत्यपौराणं दर्शनं सवितुश्चतुर्दिक्षु इंद्रयमसोमवरुणपुरादुदनया
८२ स्तमयकाळस्य तुल्यत्वं हि पौराणिकैरुक्तं। मानसोत्तरस्य मूर्ध्नि मेरोः प्रदक्षिणावृत्तेस्तुल्यत्वात्। अत्रोक्तः परि
हार आचार्यैरमरावत्यादीनां पुराणां द्विगुणोत्तरोत्तरेण काळेनोद्वासः स्यादुदयश्च नाम सवितुस्तन्निवासिनां
प्राणिनां चक्षुर्गोचरापत्तिस्तदत्ययश्चास्तमनं न परमार्थत उदयास्तमने स्तस्तन्निवासिनां च प्राणिनामभावात्
त्प्रतितेनैव मार्गेण गच्छतोऽपि नैवोदेता नास्तमेतेति। चक्षुर्गोचरापत्तेस्तदत्ययस्य चाभावात्। तथाऽमरावत्याः सकाशात् व्य ११
द्विगुणं काळं संयमिनी पुरी वसत्यतस्तन्निवासिनः प्राणिनः प्रतिदक्षिणत एवोदेतोत्तरतोऽस्तमेतीत्युच्यते। ३
स्मदृष्टिं वा पद्यते तथोत्तरास्वपि पुरीषु योजना। सर्वेषां च मेरुरुत्तरतो भवति। यदामरावत्यां मध्याह्नगतः स
विता तदा संयमिन्यामुद्यन्दृश्यते। तत्र मध्याह्नगो वारुण्यामुद्यन्दृश्यते। तथोत्तरस्यां प्रदक्षिणावृत्तेस्तु
ल्यत्वादिळावृतवासिनां सर्वतः पर्वतप्राकारनिवारितादित्यरश्मीनां सवितोर्ध्व इवोदेतार्वाक्‌ स्तमेताऽदृश्य २१॥
ते पर्वतोर्ध्वच्छिद्रप्रवेशात्तस्य रविप्रकाशस्य। तथर्गाद्यमृतोपजीविनाममृतानां च द्विगुणोत्तरोत्तरवीर्यवत्तम
नुमीयते भोगकाळद्वैगुण्यलिंगेनोद्यमनसंवेशनादिदर्शनानां रुद्रादीनां विद्युपश्च समानं कल्प्यैवमुदयास्त
मनेन प्राणिनां स्वकर्मफळभोगनिमित्तमनुग्रहं तत्कर्मफळोपभोगक्षये तानि प्राणिजातानि तियालमनिसंह

स्या ऽथ ततस्तस्मादनंतरं प्राप्तिपुण्यतुल्यकालादूर्ध्वः सन्नात्मन्युदेत्योऽद्धं जन्म यथासूत्रयकदेति तेषां प्राणिनामसा
वापेक्षया ब्रह्मलोके नैवोदेता नास्तमेता कालो ऽद्वितीयोऽनवयवो मध्ये स्थास्यन्नेव स्थाता। तत्र कश्चिद्विद्वान्यस्यादि
समानवरणो रोहिता घामू तत्स्नागतौ तं यथोक्तक्रमेणास्वमामानं सवितारमात्मत्वेनोपेत्य समाहितः सन्नेते
मंत्रं दृष्ट्वा स्थितोऽन्यस्मै प्रोच तेडागाद। यतस्त्वमागतो ब्रह्मलोकात्। किं तत्रापरा हो रात्राभ्यां परिवर्तमानः सवि
ता प्राणिनामायुः क्षपयतीयहे पेवास्माकमित्येवं पृष्टः प्रत्याह। तत्र यथापृष्टे यथोक्ते वार्थे एव श्लोकोऽप्यवति
तेनोक्तो योगिनेत्थिक्तते वचनमिदं। नवैतत्रयतो ब्रह्मलोकादागतस्तस्मिन्नवैतत्रैतदेतद स्तियस्यदृष्टस्तिनदि
तन्न निम्लोचन नास्तमनामस्य सविता। नवोदियाय योक्तृतः कुतश्चित्कदाचन कस्मिन्नपि काले इति उदयास्तमयवि
यवर्जितो ब्रह्मलोकइत्यनुपपन्नमित्युक्तः प्राप्यथमिमं प्रतिपदे हो देवाः साक्षिणो यूयं शृणुत। यथा मयोक्तं सत्यं
वचस्तेन सत्येनाहं ब्रह्मणा ब्रह्मस्वरूपेणमाविराधिषिमा विरुध्येयम प्राप्तिर्ब्रह्मणो ममामात्रदित्यर्थः।
सत्यं तेनोक्तं मिथ्या हृश्रुतिर्न हवा अस्मै यथोक्तब्रह्मविदे न उदेति न निम्लोचति नास्तमेति। किंतु ब्रह्मविदे
ऽस्मै सकृद्दिवा सदैवाहर्भवति स्वयंज्योतिष्ट्वात्। य एतां यथोक्तां ब्रह्मोपनिषदं वेद गुह्यं वेद एवं तंत्रेण वंशादि
त्रयं प्रयमः तेसंबद्धं व्यय सुन्यदवोदाभेवं जाऽतीत्येनी क्ते स्यर्थः। विद्यानुदयास्तमयकालापरिच्छेद्यं नित्य
मजं ब्रह्म भवतीत्यर्थः। तद्धैतन्मधुज्ञानं ब्रह्मा हिरण्यगर्भो विराजे प्रजापतय उवाच। सच मनवे मनुरिक्ष्वा
क्वाद्यित्यः प्रजापत्यः प्रोवाचेति विद्यां स्तौति ब्रह्मादिविशिष्टक्रमागतेति। किंच तद्धैतन्मधुज्ञानमुद्दालकाया
रुणाये पिता ब्रह्म। ब्रह्मज्ञानं ज्येष्ठाय पुत्राय ब्रह्म प्रोवाच इदं वाव तद्यथोक्तं मन्योऽपि ज्येष्ठाय पुत्राय सर्वप्रि
याया र्ह्यं प्रब्रूयात् प्रणाय्याय वा योग्याय अंतेवासिने शिष्याय नान्यस्मै कस्मैचन प्रब्रूयात्। तीर्थद्वय
अत

मनुज्ञातमनेकेषां प्राप्तानां तीर्थानामाचार्यादीनां कस्मात्पुनस्तीर्थसंकोचनं विद्यायाः कृतमित्याह । यद्य
प्यस्मा आचार्यायेमां कश्चित्पृथिवीमद्भिः परिगृहीतां समुद्रपरिवेष्टितां समस्तामपि दद्यादस्या विद्याया
निःक्रयार्थमाचार्याय धनस्य संपूर्णां संपन्नां भोगोपकरणैर्नासावस्या निष्क्रयो यस्मात्ततोपि दानादेतदेव
तन्मह्युविद्यादानं भूयो बहुतरफलमित्यर्थो द्विरभ्यास आदरार्थः ।। छ ।। यत एवमतिशयफलैषा ब्रह्म
विद्यातः सा प्रकारांतरेणापि वक्तव्येति गायत्री वा इत्याद्यारभ्यते गायत्रीद्वारेण चोच्यते ब्रह्म सर्वविशेषरहि
तस्य नेति नेतीत्यादिविशेषप्रतिषेधगम्यस्य दुर्बोधत्वात्सत्स्वप्यनेकेषु छंदःसु गायत्र्या एव ब्रह्मज्ञानद्वा ७ः
रतयोपादानं प्राधान्यात्सोमाहरणादितरछंदोक्षराहरणेनेतरछंदोव्याप्त्या च सर्वसवनव्यापकत्वाच्च
यज्ञे प्राधान्यं गायत्र्याः गायत्रीसारत्वाच्च ब्राह्मणस्य मातरमिव हित्वा गुरुतरां गायत्रीं ततोन्यद्गु
रुतरं न प्रतिपद्यते यथोक्तं ब्रह्मापीति तस्यामत्यंतगौरवस्य प्रसिद्धत्वादतो गायत्रीमुखेनैव ब्रह्मोच्यते गा
यत्री वै इत्यवधारणार्थो वैशब्दः इदं सर्वं भूतं प्राणिजातं यत्किंच स्थावरं जंगमं वा तत्सर्वं गायत्र्येव गा
यत्र्याः छंदोमात्रायाः सर्वभूतत्वमनुपपन्नमिति गायत्रीकारणं वाचं शब्दरूपामापादयति गायत्री वा वाग्वै
गायत्रीति वाग्वा इदं सर्वं भूतं यस्माद्वाक् शब्दरूपा सती सर्वं भूतं गायति शब्दयति च असौ गौरसावश्व इ
ति च त्रायते रक्षत्यमुष्मान्मा भैषीः किं ते भयमुत्थितमित्यादिना सर्वतो भयान्निवर्त्यमानो वाचा त्रातः २३।।
स्याद्यद्वाग्भूतं गायति च त्रायति च गायत्र्येव तद्गायति च त्रायते च वाचोनन्यत्वाद्गायत्र्याः । गायनात्त्राणाच्च
गायत्र्याः गायत्रीत्वं । या वै सैवं लक्षणा सर्वभूतरूपा गायत्री इयं वाव सा येयं पृथिवी । कथं पुनरियं पृ
थिवी गायत्रीत्युच्यते सर्वभूतसंबंधात्कथं सर्वभूतसंबंधोस्याः पृथिव्याः ह्यस्मात्सर्वं स्थावरं जंगमं

भूतंप्रतिष्ठितंएतामेवपृथिवींनातिशीयतेनातिवर्त्ततेइत्येतद्यथागानत्राणाभ्यांभूतसंबंधोगायत्र्याए
वंभूतप्रतिष्ठानाद्भूतसंबद्धापृथिव्यतोगायत्रीपृथिवीयावैसापृथिवीगायत्रीयंवावसातत्किंयदिदमस्मि
न्पुरुषेकायकारणसंघातेजीवतिशरीरंपार्थिवत्वाच्छरीरस्यकथंशरीरस्यगायत्रीत्वमित्युच्यतेअस्मि
न्हीमेप्राणाभूतशब्दवाच्याःप्रतिष्ठिताःअतःपृथिवीवद्भूतशब्दवाच्यप्राणप्रतिष्ठानाच्छरीरंगायत्र्येतदे
वयस्माच्छरीरंनातिशीयंतेप्राणाःयद्वैतत्पुरुषेशरीरंगायत्रीइदंवावतद्यदिदमस्मिन्नंतःपुरुषेहृदयं
पुंडरीकाख्यमेतद्गायत्रीहृदयमेवदेवनातिशीयंतेप्राणाःप्रतिष्ठिताःअतःशरीरवद्गायत्रीहृदय
मेतदेवनातिशीयंते+कथमित्याहास्मिन्हीमे+प्राणाःप्राणोहिपिताप्राणोमाताऽहिंसन्सर्वभूतानि
तिवश्रुतेर्भूतशब्दवाच्याःप्राणाःसैषाचतुष्पदाषडक्षरपादछंदोरूपासतीभवतिगायत्रीषड्विधावाक्
भूतपृथिवीशरीरहृदयप्राणरूपासतीऽषड्विधाभवतिवाक्प्राणयोरन्यार्थनिर्दिष्टयोरपिगायत्री
प्रकारत्वमन्यथाषड्विधसंख्यापूरणानुपपत्तेस्तदेतदृचायत्त्वाख्यंब्रह्मगायत्र्यनुगतंगायत्रीमुखेनो स्मिन्नर्थे एतत्
क्तमृचापिमंत्रेणाप्यभ्यनूक्तंप्रकाशितं॥ तावानस्यगायत्र्याख्यस्यब्रह्मणःसमस्तस्यमहिमाविभूतिवि
स्तारःयावांश्चतुष्पात्षड्विधश्चब्रह्मणोविकारःपादोगायत्रीतिव्याख्यातोवैतस्तस्माद्विकारलक्षणा
द्गायत्र्याख्याद्वाचारंभणमात्रात्ततोज्यायान्महत्तरश्चपरमार्थसत्यरूपोऽविकारःपूरुषःपुरुषःस
र्वपूरणात्पुरिशयनाच्चातस्यपादःसर्वाःसर्वाणिभूतानितेजोबन्नादीनिसस्थावरजंगमानित्रिपादस्य
पादोऽस्यसोऽयंत्रिपादमृतंपुरुषाख्यंसमस्तस्यगायत्र्यात्मनोदिविद्योतनवतिस्वात्मन्यवस्थितमित्य न्य३
र्थइतियद्वैतत्त्रिपादमृतंगायत्रीमुखेनोक्तंब्रह्मेतीदंवावतद्यदिदमेवमयोयंप्रसिद्धोबहिर्धाबहिःपुरुषादाका
शोभौतिकोयोवैसबहिर्धापुरुषादाकाशउक्तोऽयंवावसयोऽयमंतःपुरुषेशारीरआकाशोयोवैसोंतःपुरु

ष आकाशोऽयं वाव स योऽयमंतर्हृदये हृदयपुंडरीक आकाशः कथमेकस्य सत आकाशस्य त्रिधा भेद इत्युच्यते। बा
ह्येंद्रियविषये जागरितस्थाने नरः सदुःखबाहुल्यं दृश्यते ततोंतः उपाधिविशिष्टे शरीरे स्वप्नस्थाने ततो मंदतरं दुः
खं स्वतत्तिष्ठत्यात्पन्नो हृदयस्थे पुनर्न संप्रसन्न कंचन कामं कामयते न कंचन स्वप्नं पश्यत्यतः सर्वदुःखनिवृ
त्तिरूपमाकाशं सुषुप्तस्थानमतो युक्तमेकस्यापि त्रिधा भेदाख्यानं बहिर्धा पुरुषादाकाशस्य हृद
स्थाने ४ यसंकोचकरणं चेतः समाधानस्य तत्र यथा त्रयाणामपि लोकानां कुरुक्षेत्रं विशिष्यते अर्द्धतरं कुरुक्षेत्र
मर्द्धतस्याप्युत्कृष्टकमिति तद्वदेतद्धार्दाकाशाख्यं ब्रह्म पूर्णं सर्वगतं न हृत्पद्ममात्रपरिच्छिन्नमिति मंतव्यं। यद्य
पि हृदयाकाशोक्तेः समाधीयते अप्रवर्त्तिनि कुतश्चिद् विसर्वत्तिलं वाक्रमस्येति अप्रवर्त्तितदनुच्छित्तिध
नि मर्कं यथान्योऽपि परिच्छिन्नान्युच्छित्तिधर्मकाणि न तथा हार्दं नभः पूर्णमप्रवर्त्तिनीमनुच्छेदात्मि[illegible]कां श्रियं वि
भूतिं गुणफलं लभते दृष्टं य एवं यथोक्तं पूर्णमप्रवर्त्तिगुणं ब्रह्म वेद जानाति हैवं स्वावं प्रति प्रतिपद्यत इत्य
र्थः॥ ॥तस्य ह वा एतस्येत्यादिना गायत्र्याख्यस्य ब्रह्मण उपासनांगत्वेन द्वारपालादिगुणविधानार्थमारभ्य
तो। यथा लोके द्वारपाला राजोपासनेन वशीकृता राजप्राप्त्यर्था भवंति तथेहापीति तस्येति प्रकृतस्य
हृदस्येत्यर्थः। एतस्यानंतरानि छिद्रस्य पंच पंचसंख्याका देवानां सुषयो देवसुषयः स्वर्गलोकप्राप्तिद्वाराणि छि गृह
द्राणि देवैः प्राणादित्यादिभी रक्ष्यमाणानीत्यतो देवसुषयः तस्य स्वर्गलोकालयवर्तिनस्य हृदयस्यास्य यः प्राङ् सु
षिर्यः पूर्वाभिमुखस्य प्राग्गतं यच्छिद्रं द्वारं स प्राणः तत्स्थस्तेन द्वारेण यः संचरति वायुविशेषः स प्राण इति ताति ॥२३॥
प्राणस्तेनैव संबद्धमव्यतिरिक्तं तच्चक्षुस्तथैव स आदित्यः आदित्यो ह वै बाह्यः प्राण इतिश्रुतेश्चक्षुरूपप्रति
पाक्रमेण हृदि स्थितः स आदित्यः कस्मिन्प्रतिष्ठितं चक्षुषीत्यादिवाजसनेयके प्राणो वायुर्देवतैवं तेकाय द
आदित्यश्च स एकाश्रयेणैव ब्रह्मेति बुद्ध्या प्राणाय स्वाहेति हुतं हविः सर्वमेतत्तर्पयतीत्येतदेतत्प्राणाख्यं स्वर्ग

इति २ ।हि २

लोकद्वारत्वाद्यला ब्रह्मस्वर्गलोकप्रतिपत्तिस्तेजश्च एतच्चक्षुरादित्यस्वरूपेणान्नाद्यान्नाद्यत्वाच्च सवितुस्तेजोन्नाद्य
मित्याभ्यां गुणाभ्यामुपासीत ततस्तेजस्व्यन्नादश्चामयाविवरहितो भवति। य एवं वेद तस्यैतद्गुणफलमु
पासनेन वशीकृतो द्वारपः स्वर्गलोकप्राप्तिहेतुर्भवतीति मुख्यं च फलमुपासनेनैवं चैव वशीकृतो भ अथ योऽस्य
दक्षिणः सुषिस्तत्स्थो वायुविशेषः स वीर्यवत्कर्म कुर्वन्विगृह्यमाणो वा प्राणापानौ नाना वाऽनितीति व्यानस्तत्सं
बद्धमेव च श्रोत्रमिन्द्रियं तथा चन्द्रमाः श्रोत्रेण सृष्टा दिशश्च चन्द्रमाश्चेति श्रुतेः। स हाश्रयैः पूर्ववत्तदेतच्छ्रीश्च यशश्चे
तिः श्रोत्रचन्द्रमसोर्ज्ञानान्नहेतुत्वमतस्ताभ्यां श्रीत्वं ज्ञानान्नवतश्च यशः ख्यातिर्भवतीति यशोहेतुत्वाच्चाद्यशस्त्व
मतस्ताभ्यां गुणाभ्यामुपासीनेत्यादि समानम्। अथ योऽस्य प्रत्यङ् सुषिः पश्चिमस्तत्स्थो वायुविशेषः स मूत्रपुरी
षाद्यपनयन्नधोऽनितीत्यपानः स तथा सा वाक्तत्संबन्धात्तथाग्निस्तदेतद्ब्रह्मवर्चसं वृत्तस्वाध्यायनिमित्तं
तेजोऽग्निसंबन्धाद्वृत्तस्वाध्यायस्यान्नं ग्रसनहेतुत्वादपानस्यान्नाद्यत्वं समानमन्यत्। अथ योऽस्योदङ् सुषि
रुदग्गतः सुषिस्तत्स्थो वायुविशेषः। सोऽशितपीते समं नयतीति समानस्तत्संबद्धं मनोऽन्तःकरणं स पर्जन्यो वृष्ट्या
त्मकादेवः पर्जन्यो निमित्ताश्चाप इति मनसा सृष्टा आपश्च वरुणश्चेति श्रुतेः तदेतत्कीर्तिश्च मन
सो ज्ञानस्य कीर्तिहेतुत्वादात्मपरोक्षं विश्रुतत्वं कीर्तिर्यशः स्वकरणसंवेद्यं विश्रुतत्वं व्युष्टिः कीर्तिर्देहगतला
वण्यं ततश्च कीर्तिसंभवात्कीर्तिश्चेति समानमन्यत्। अथ योऽस्योर्ध्वः सुषिः स उदानः आपादतलादारभ्योर्ध्वमु
त्क्रमणादुत्कर्षार्थं च कर्म कुर्वन्ननितीत्युदानः स वायुस्तदाधारश्चाकाशस्तदेतद्वाय्वाकाशावोजोहेतुत्वा
दोजो बलं महत्त्वाच्च मह इति समानमन्यत् तमेवं वेदेत्यथोक्तपंचसुषिसंबंधात्पंच ब्रह्मणो हार्दस्य पुरुषा राज
पुरुषा इव द्वारस्थाः स्वर्गस्य हार्दस्य लोकस्य द्वारपा द्वारपालाः एते हि चक्षुःश्रोत्रवाङ्मनःप्राणा बहिर्मुखप्र

वृत्तैर्ब्रह्मणो हार्दस्य प्राप्तिद्वाराणि निरुद्धानि । प्रत्यक्षं चैतदजितकरणतया बाह्यविषयासंगानृतप्ररूढ
त्वान्न हार्दे ब्रह्मणि मनस्तिष्ठति । तस्मात्सत्यमुक्तमिमे ते पंच ब्रह्मपुरुषाः स्वर्गस्य लोकस्य द्वारपा इत्यतः स
य एतानेवं यथोक्तगुणविशिष्टान्स्वर्गस्य लोकस्य द्वारपान्वेदोपास्ते उपासनया वशीकरोति स राजद्वा
रपानिवोपासनेन वशीकृत्य तैरनिवारितः प्रतिपद्यते स्वर्गं लोकं राजानमिव हार्दं ब्रह्म । किं चास्य विदु
षः कुले वीरः पुत्रो जायते वीरपुरुषसेवनात् । तस्य चर्णापाकरणेन ब्रह्मोपासने प्रवृत्तिहेतुत्वं ततश्च स्वर्ग
लोकप्रतिपत्तये पारंपर्येण भवतीति स्वर्गलोकप्रतिपत्तिरेवैकं फलं ॥ अथ यदसौ विद्वान्स्वर्गं लोकं वीरपु
रुषसेवनात्प्रतिपद्यते यज्ज्योतिस्त्रिपादस्यामृतं दिवीति च तदिदं लिंगेन चक्षुःश्रोत्रेंद्रियगोचरमापादयितव्यं य
थाग्न्यादि धूमादिलिंगेन तथा ह्येवमेवेदमिति । यथोक्तेर्थे दृढा प्रतीतिः स्यादनन्यत्वेन निश्चय इत्यत आ
ह । यदतोमुष्माद्दिवो द्युलोकात्परः परमिति लिंगव्यत्ययेन ज्योतिर्दीप्यते स्वयंप्रभं सदाप्रकाशत्वाद्दीप्य
त इव दीप्यत इत्युच्यते अग्न्यादिवज्ज्वलनलक्षणाया दीप्तेरसंभवात् विश्वतः पृष्ठेष्वित्येतस्य व्या
नं सर्वतः पृष्ठेष्विति संसारादुपरीत्यर्थः । संसार एव हि सर्वः असंसार्येकत्वान्निर्भेदत्वाच्चानुत्तमेषु तत्पु
रुषसमासाशंकानिवर्तनाय आहोत्तमेषु लोकेष्विति सत्यलोकादिषु हिरण्यगर्भादिकार्यरूपस्य परस्येश्व
रस्यासन्नत्वादुच्यते उत्तमेषु लोकेष्विति । इदं वाव तद्यदिदमस्मिन्नंतःपुरुषे ज्योतिश्चक्षुः
श्रोत्रग्राह्येण लिंगेनोष्णिम्ना शब्देन चावगम्यते यत्त्वचा स्पर्शरूपेण गृह्यते तच्चक्षुषैव दृढप्रतीतिकरत्वा ।२४।
त्वचोऽविनाभूतत्वाच्च रूपस्पर्शयोः । कथं पुनस्तस्य ज्योतिषो लिंगं त्वग्दृष्टिगोचरत्वमापद्यत इत्याह । यत्रैत
स्मिन्काल एतदिति क्रियाविशेषणं अस्मिंछरीरे यथा हस्तेनालभ्य संस्पर्शेनोष्णिमानं रूपसहभा
विनमुष्णस्पर्शभावं विजानाति । स ह्युष्णिमा नामरूपव्याकरणाय देहमनुप्रविष्टस्य चैतन्यात्मज्यो

लिंगो लिंगमव्यभिचारा॰॰न्न हि जीवन्तमात्मानमुष्णिमा व्यभिचरति उष्ण एव जीविष्यन्नशीतो मरिष्यन्निति विज्ञायते । मरणका
ले च तेजः परस्यां देवतायामिति परेण विना॰॰वोपगमादतो साधारणं लिं॰॰गमौष्ण्यमग्नेरिव धूमोऽतस्तस्य परस्यै
षा दृष्टिः साक्षादिव दर्शनं दर्शनोपाय इत्यर्थः । तथा तस्य ज्योतिष एषा श्रुतिः श्रवणं श्रवणोपायोऽप्युच्यमानो यदा पुरु
षो ज्योतिषो लिंगं श्रोतुमिच्छति तदेतत्कर्णावपिगृह्येतदिति क्रियाविशेषणमपिगृह्यापिधायेत्यर्थो अंगुलीभ्यां प्रो
र्णुत्य निनदमिव रथस्येव घोषो निनदस्तमिव शृणोति नदथुरिव ऋषभकूजितमिव ॰ वत्राद्योयथावाग्नेर्बहिर्ज्वल
त एवं शब्दमंतः॰शरीरे शृणोति । तदेतज्ज्योतिर्दृष्टश्रुतलिंगत्वाद्दृष्टं च श्रुतं चेत्युपासीत । तथोपासनाच्चक्षुष्यो द
र्शनीयः श्रुतो विश्रुतश्च यस्मा॰ स्पर्शगुणोपासननिमित्तं फलं तद्रूपे संपादयतीव चक्षुष्य इति रूपस्य सहचारियोः सरूपादि
त्वादिदृष्टत्वाद्दर्शनीयतायाः एवं विद्यायाः फलमुपपन्नं स्यान्न तु मृदुत्वादिस्पर्शवत्त्वे य एवं यथोक्तो गुणौ वेद स्वर्ग
लोकप्रतिपत्तिस्तूक्तमदृष्टं फलं द्विरभ्यास आदरार्थः ॥ ॥ पुनस्तस्यैव त्रिपादमृतस्य ब्रह्मणोऽनंतगुणवतोऽनंत
शक्तेरनेकधोपास्यस्य विशिष्टगुणशक्तिमत्त्वेनोपासनं विधित्सन्नाह । सर्वं समस्तं खल्विति वाक्यालंकारार्थो
निपातः इदं जगन्नामरूपविकृतं प्रत्यक्षादिविषयं ब्रह्म कारणं वृद्धतमत्वाद्ब्रह्म कथं सर्वस्य ब्रह्मत्वमित्यत आह
तज्जलानिति तस्माद्ब्रह्मणो जातं तेजोबन्नादिक्रमेण सर्वमतस्तज्जं तथा तेनैव जननक्रमेण प्रतिलोमतया तस्मिन्नेव
ब्रह्मणि लीयते तदात्मतया श्लिष्यत इति तल्लं तथा तस्मिन्नेव स्थितिकालेऽनिति प्राणिति चेष्टत इति तदनं इत्येवं ब्रह्मात्मतया
जग ॥ यथा चैदं तदेवैकमद्वितीयं तथा षष्ठे विस्तरेण वक्ष्यामः । यस्माच्च सर्वमिदं ब्रह्म अतः शांतो रागद्वेषादिदोषरहितः सं
यतः सन् यत्तत्सर्वं ब्रह्म तद्वक्ष्यमाणैर्गुणैरुपासीत कथमुपासीत क्रतुं कुर्वीत क्रतुर्निश्चयोऽध्यवसाय एवमेव नान्यथेत्य
विचलः प्रत्ययस्तं क्रतुं कुर्वीतोपासीतेत्यनेन व्यवहितेन संबंधः । किं पुनः क्रतुकरणेन कर्तव्यं प्रयोजनं कथं वा क्र
तुः कर्तव्यः क्रतुकरणं चाभिप्रेतस्यार्थस्य साधनं कथमित्यस्यार्थस्य प्रतिपादनार्थमथेत्यादिग्रंथः । अथ खल्वि
ति हेत्वर्थो यस्मात्क्रतुमयः क्रतुप्रायोऽध्यवसायात्मकः पुरुषो जीवो यथाक्रतुर्यादृक्क्रतुरस्य सोऽयं यथाक्र
ला

वंशमानान्तयामपि त्रिष्वपि कालेषु ब्रह्मत्वाविशिष्टं तद्व्यतिरेकेणाग्रहणान्नाद

तुर्यथाध्यवसायोयादृङ्निश्चयोस्मिंल्लोकेजीवन्निहपुरुषोभवतितथेतोस्माद्देहात्प्रेत्यमृत्वाभवतिक्रत्वनु
रूपफलात्मकोभवतीत्यर्थः। एवंह्येतच्छास्त्रतोदृष्टंयंयंवापिस्मरन्भावंत्यजत्यंतेकलेवरमित्यादि। यतएवंव्यवस्था
शास्त्रदृष्टातःसएवंजानन्क्रतुंकुर्वीतयादृशंक्रतुंवक्ष्यामस्तं। यतएवंशास्त्रप्रामाण्यादुपपद्यतेक्रत्वनुरूपंफलमतः
तःसकर्तव्यःक्रतुः। कथं। मनोमयः मनःप्रायोमनुतेऽनेनेतिमनस्तत्स्ववृत्त्याविषयेषुप्रवृत्तंभवतितेनमन
सातन्मयस्तथाप्रवृत्तइवतत्प्रायोनिवृत्तइववा। अतएवप्राणशरीरःप्राणोलिंगात्माविज्ञानक्रियाशक्तिद्वय
संमूर्छितोयोवैप्राणःसाप्रज्ञायावाप्रज्ञासप्राणइतिश्रुतेः। सशरीरंयस्यसप्राणशरीरः। प्राणशरीरत्वे
नेतिवक्ष्यत्यंतराभारूपोभादीप्तिश्चैतन्यलक्षणंरूपंयस्यसभारूपः सत्यसंकल्पः सत्याअवितथाःसंकल्पा
यस्यसोयंसत्यसंकल्पोनयथासंसारिणइवानैकांतिकफलःसंकल्पईश्वरस्येत्यर्थः। अनृतेनमिथ्याफलत्व
हेतुनाप्रत्यूढत्वात्संकल्पस्य तिरोधायाफलत्वंचदस्यसत्तेनहिप्रत्यूढाइत्याकाशात्माकाशइवात्मास्वरूपं
यस्यसआकाशात्माकाशात्मासर्वगतत्वंसूक्ष्मत्वंरूपादिहीनताचाकाशतुल्यतेश्वरस्यसर्वकर्मासर्वंविश्वंतेनेश्वरे
णक्रियतइतिजगत्सर्वंकर्मास्यससर्वकर्मासहिसर्वस्यकर्तेतिश्रुतेः सर्वकामः सर्वेकामादोषरहिताअस्ये
तिसर्वकामाधर्माविरुद्धोभूतेषुकामोस्मीतिस्मृतेः। ननुकामोस्मीतिवचनादिहबहुव्रीहिर्नसंभवति
सर्वकामइति। न। कामस्यकर्तव्यत्वाच्छब्दादिवत्पारार्थ्यप्रसंगाच्चदेवस्य। तस्माद्यथेहसर्वकामइतिबहुव्रीहिस्तथा २५॥
कामोस्मीतिस्मृत्यर्थोवाच्यः सर्वगंधः सर्वेगंधाःसुखकराअस्यसोयंसर्वगंधः पुण्योगंधःपृथिव्यामितिस्मृतेस्तथार
साअपिविज्ञेयाअपुण्यगंधरसग्रहणस्यपाप्मसंबंधनिमित्त[illegible]श्रवणात्तस्मात्तेनोभयंजिघ्रतिसुरभिचदुर्गंधिं
चपाप्मनाह्येषविद्धइतिश्रुतेः। नचपाप्मसंसर्गईश्वरस्याविद्यादिदोषस्यानुपपत्तेः सर्वमिदंजगदभ्यात्तोभिव्याप्तो
अततेर्व्याप्त्यर्थस्यकर्तरिनिष्ठातथावाक्युच्यतेऽनयेतिवाक्वागेववाकोयद्वावचेर्घञंतस्यकरणेवाकः
सयस्यविद्यतेसवाकीनवाकीअवाकीवाक्प्रतिषेधश्चात्रोपलक्षणार्थः। गंधरसादिश्रवणादीश्वरस्यप्राप्तानिघ्राण॥

छां ४ ५

दीनि विकरणानि गंधादिग्रहणा ... यात्तो . वाक्प्रतिषेध्येन प्रतिषिध्यंते तानि । अवाक्यनादरो ऽजयनो गृहीतापन्नत्यय
त्तु: संभ्रमणोप्ययकर्षी ... त्यादिमंत्रवर्णादनादरो ऽसंभ्रमो ऽप्राप्तप्राप्तौ हि संभ्रमः स्यादवाप्तकामस्य न त्वाप्तकामत्वो
न्नित्यतृप्तस्येश्वरस्य संभ्रमो ऽस्ति क्वचिदेषः । यथोक्तगुणो मे मम आत्मांतर्हृदये पुंडरीकस्यांतर्मध्ये ऽणीयानणु
तरो व्रीहेर्वा यवाद्वेत्याद्यत्यंतसूक्ष्मप्रदर्शनार्थं ... श्यामाकाद्वा श्यामाकतंडुलाद्वेति । परिच्छिन्नपरिमाणादणी
यानित्युक्ते ऽणुपरिमाणत्वं प्राप्तमाशंक्याह ततः तन्निषेधाय ... रसतं एष म आत्मांतर्हृदये ज्यायान्पृथिव्या
इत्यादिना । ज्यायः परि... माणात्ज्यायस्त्वं दर्शय ... नंतपरिमाणत्वं दर्शयति । म... नोमयादृत्यादिना ज्यायाने त्यो लोकेभ्य
इत्यंतेन । यथोक्तगुणलक्षण ईश्वरो ध्येयो न तु तद्गुणविशिष्ट एव यथा राजपुरुषमानय ... चित्रगुं वेत्युक्ते न विशेषणस्यापानयने
व्याप्रियते तद्वदिहापि प्राप्तमतस्तन्निवृत्त्यर्थं पुनः सर्वकर्मेत्यादि वचनं तस्मान्मनोमयत्वादिगुणविशिष्ट ईश्वरो ध्येयो ऽत एव च
ष्टसमः प्रयोरिव तच्च मस्यात्मैवेदं सर्वमिति नेह स्वाराज्येतिषिंचत्येष म आत्मैतद्ब्रह्मैतमितः प्रेत्याभिसंभवितास्मीति लि
गान्नैवात्मब्रह्मणी न प्रत्यगात्मैवोच्यते नमम इति षष्ठ्याः संबंधार्थप्रत्याय्य वक्त्वादेतमितः प्रेत्याभिसंभवितास्मीति कर्मक ... नैव नि
र्देशाच्चानुषच्येप्यथ संपश्य इति संपन्नेः का ... तरितव्यं दर्शयति नारब्धसंस्कारशेष ... त्यर्थं परर्थं ... त्यो न का ...
रितार्थः । ता ऽन्यथा तत्त्वमसीत्येतस्यार्थस्य बाधप्रसंगः स्यात् अथ प्रत्यगात्मब्रह्मणोस्य प्रत्यगर्थत्वं सर्वं खल्विदं ब्रह्मेति यत्प्रकृत
मेष म आत्मांतर्हृदय एत ... द्ब्रह्मेत्युच्यते तथापि तत्त्वमसीत्यादिपरिच्छ्येदेवाहत मासान्मितोस्माच्छरीरात्प्रेत्याभिसंवि भ
तास्मीत्युक्तं यथाक्रतुरूपस्यात्मनः प्रतिपत्तास्मीति यस्यैवं विदः स्यादद्धा वेदनास्य मेवं स्यामहं प्रेत्या ऽवंनस्यामिति न वि
विचिकित्सास्तीत्येतस्मिन्क्रतुफलसंबंधे सत्येवं च फलावश्यं प्रतिपद्यते ति वि ... ह्यानित्येतदाह स्म
हो वा: किंचित्वां डिल्यो नामर्षिद्विरस्यासादरार्थः ।। ... अस्य कुले वीरो जायत इत्युक्तेन वीरजन्ममात्रं पितुस्त्राणाय ।
तत्र पुत्रमनुशिष्टं त्यलोकाय भवति इति श्रुत्यंतरात् ततः स्वदीर्घायुष्ट्वं कथं स्यादित्येतदर्थं कोशविज्ञानारंभोस्य
इति विज्ञानवासंगादनंतरमेव नीकृत दिह्यामभिधास्यते ऽतरिक्षोदरमितः सु ... विरंयस्यसोयमं तरिक्षो

रः कोशः कोशइवानेकधर्मसादृश्यात्कोशः स च भूमिबुध्नो मूलं यस्य स भूमिबुध्नः न जीर्यति न विनश्यति त्रैलोक्यात्मकत्वा
त्सहस्रयुगकालावस्थायी हि सः दिशो ह्यस्य सर्वाः स्रक्तयः कोणाः द्यौरस्य कोशस्योत्तरमूर्ध्वं बिलं यस्य स एष यथो
क्तगुणः कोशो वसुधानो वसु धीयतेऽस्मिन्प्राणिनां कर्मफलाख्यं महो वसुधानस्तस्मिन्नन्तर्विश्वं सर्वं समस्तं प्राणिकर्म
फलं सह तत्साधनैरिदं यद्गृह्यते प्रत्यक्षादिप्रमाणैः श्रितमाश्रितं स्थितमित्यर्थः। तस्यास्य प्राची दिक्प्रागतो भागो जुहू
र्नाम जुह्वत्यस्यां दिशि कर्मिणः प्राङ्मुखाः सन्त इति सहमाना नाम सहन्तेऽस्यां पापकर्मफलानि यमपुर्यां प्राणिन इति
सहमाना नाम दक्षिणा दिक् तथा राज्ञी नाम प्रतीची पश्चिमा दिक् राज्ञी नाम राज्ञा वरुणेनाधिष्ठिता संध्यारागयोगाद्वा सुभू
ता नामोत्तरा दिग्भूतिमद्भिरीश्वरकुबेरादिभिरधिष्ठितत्वात्सुभूता नामोदीची तासां दिशां वायुर्वत्सो दिग्जत्वाद्वायोः पुरोवा
तइत्यादिदर्शनात्स यः कश्चित्पुत्रदीर्घजीवितार्थ्येवं यथोक्तगुणं वायुं दिशां वत्सं वेद स न पुत्ररोदं पुत्रनिमित्तं रो
दनं न रोदिति पुत्रो न म्रियत इत्यर्थः यत एवं विशिष्टं कोशदिग्वत्सविषयं विज्ञानमतः सोऽहं पुत्रजीवितार्थी एवमेतं वा
युं दिशां वत्सं वेद जानेऽतः सोऽहं मा पुत्ररोदं मा रुदं पुत्रमरणनिमित्तो रोदो मम मा भूदित्यर्थः। रिष्टमविनाशिनं कोशं य
थोक्तं प्रपद्ये प्रपन्नोऽस्मि पुत्रायुषे अमुनामुनामुनेति त्रिर्नाम गृह्णाति पुत्रस्य तथा प्राणं प्रपद्येऽमुनामुनामुना भूः प्रपद्ये
ऽमुनामुनामुना भुवः प्रपद्येऽमुनामुनामुना स्वः प्रपद्येऽमुनामुनामुना सर्वत्र प्रपद्य इति त्रिर्नाम गृह्णाति पुनः पुनः स यद
वोचं प्राणं प्रपद्य इति व्याख्यानार्थमुपन्यासः प्राणो वा इदं सर्वं भूतं यदिदं किंच जगत् यथा वा अरा नाभाविति व
क्ष्यति अतस्तमेव सर्वं तेन प्राणप्रतिपादनेन प्रापत्सि प्रपन्नोऽभूवं तथा भूः प्रपद्य इति त्रीन्लोकान्भूरादीन्प्रपद्य इति
तदवोचम् अथ यदवोचं भुवः प्रपद्य इत्येव तदवोचमित्यग्न्यादीन्मंत्रानुपेत्य ततः ऊर्ध्वं क्रमजरं कोशं स दिग्वत्सं यथाव ॥२६५
द्ध्यायेद्दीर्घ इयं न मा इत्यर्थः॥ ॥पुत्रायुषउपासनमुक्तं जपश्चाथेदानीमात्मनो दीर्घजीवनायेदमुपासनं जपं च वि
दधदाह। जीवन्हि स्वयं पुत्रादिफलेन युज्यते नान्यथेत्यात्मानं यज्ञं संपादयति पुरुषः पुरुषो जीवनविशिष्टः कार्यका स२
रणसंघातो यथा प्रसिद्ध एव यावज्ञ इव धारणार्थः। पुरुष एव यज्ञ इत्यर्थः। तथा हि सामान्यैः संपादयति यज्ञ
इत्यग्न्यादीन्प्रपद्य इत्येव तदवोचं अथ यदवोचं स्वः प्रपद्य इत्येव ... न्प्रपद्य इत्यै
दी

त्वं कथं तस्य पुरुषस्य यानि चतुर्विंशति वर्षाणि आयुषस्तत्प्रातःसवनं पुरुषाख्यस्य यज्ञस्य केन सामान्येने
त्याह । चतुर्विंशत्यक्षरा गायत्री छंदो गायत्रच्छंदस्कं हि विधियज्ञस्य प्रातःसवनं मतः प्रातःसवनसंपन्नेन चतुर्विं
शतिवर्षायुषा युक्तः पुरुषोऽतो विधियज्ञसादृश्याद्यज्ञः तथोत्तरयोरायुषोः सवनद्वयसंपत्तिस्त्रिष्टुब्जगत्यक्षर
संख्यासामान्यतो वाच्या । किं च तदस्य पुरुषयज्ञस्य प्रातःसवनं विधियज्ञस्येव वसवो देवा अन्वायत्ता अनु
गताः सवनदेवतात्वेन सवनस्वामिन इत्यर्थः । पुरुषयज्ञेऽपि विधियज्ञ इवाग्न्यादयो वसवो देवाः प्राप्ता इत्य
तो विशेषमाह । प्राणा वाव वसवो वागादयो वायवश्च एते हि यस्मादिदं पुरुषादिप्राणिजातमेते वासयंति प्राणेषु देहे
वसत्सु सर्वमिदं वसति नान्यथेत्यतो वासनाद्वासनाद्वसवः । तं चेद्यज्ञसंपादिनमेतस्मिन्प्रातःसवनसंप
न्ने वयसि किंचिद्व्याध्यादि मरणशंकाकारणमुपतपेदुःखमुत्पादयेत्स तदा यज्ञसंपादी पुरुषः आत्मानं यज्ञं
मन्यमानो ब्रूयाज्जपेदित्यर्थः । इमं मंत्रं प्राणा वसवो हि इदं मे प्रातःसवनं मम यज्ञस्य वर्तते तन्माध्यंदिनं सवन
मनुसंतनुतेति माध्यंदिनसवनेनायुषा सहितमेकीभूतं संततं कुरुतेत्यर्थः मा हं यज्ञो युष्माकं प्राणानां वसूनां
प्रातःसवनेशानानां मध्ये विलोप्सीय विलुप्येय विच्छिद्येयमित्यर्थः । इतिशब्दो मंत्रपरिसमाप्त्यर्थः । स तेन
जपेन ध्यानेन च ततस्तस्मादुपतापादुदेत्युद्गच्छति उद्गम्य विमुक्तः सन्नगदो हानुपतापो भवत्येव । अथ यानि
चतुश्चत्वारिंशद्वर्षाणीत्यादि समानं रुदंतीति रोदयंतीति प्राणा रुद्राः । क्रूरा हि ते मध्यमे वयस्यतो रुद्रास्त आदि
त्याः प्राणास्ते हीदं शब्दादिजातमाददते अत आदित्यास्तृतीयसवनमायुः षोडशोत्तरं वर्षशतं समापयतानुसंत
नुत यज्ञं समापयेतेत्यर्थः । समानमन्यत् निश्चिता हि विद्याफलायेत्येतद्दर्शयन्नुदाहरत्येतद्यज्ञदर्शनं ह स्म वै किल
तद्विद्वानाह । महिदासो नामत इतरायाः अपत्यमैतरेयः किं कस्मान्मे मम एतदुपतपनमुपतपसि स त्वं हे रोग
यो हं यज्ञो नेन त्वत्कृतेनोपतापेन न प्रेष्यामि न मरिष्यामि अतो वृथा तव परिश्रम इत्यर्थः । इत्येवमाह स्मेति

पूर्वेण संबंधः सर्वं निश्चयः सन्नाप्नोति इत्यर्थः ब्रह्म अभिवदन्नयोऽप्येवं निश्चयः षोडशं वर्षशतं जीवति य एवं यथोक्तं
यज्ञसंपादनं वेद जानाति स इत्यर्थः ॥ ॥ स यदशिशिषतीत्यादि यज्ञसामान्यनिर्देशः पुरुषस्य पूर्वेणैव
संबध्यते । यदशिशिषति अशितुमिच्छति तथा पिपासति पातुमिच्छति । यन्न रमते इष्टाद्यप्राप्तिनिमित्तं यदे
वंजातीयकं दुःखमनुभवति ता अस्य दीक्षाः दुःखसामान्याद्धि दीक्षा यज्ञस्येव ॥ अथ यदश्नाति यत्पिबति यद्रमते
रतिं चानुभवति इष्टादिसंयोगात् तदुपसदैः समानतामेति उपसदां च पयोव्रतत्वनिमित्तं सुखमस्ति अल्प
भोजनीयानि चाहान्यासन्नानीति प्रश्वासोऽतोऽशनादीनामुपसदां च सामान्यम् ॥ अथ यद्धसति यज्जक्ष
ति यन्मैथुनं चरति स्तुतशस्त्रैरेव तत्समानतामेति शब्दवत्त्वसामान्यात् ॥ अथ यत्तपो दानमार्ज
वमहिंसा सत्यवचनमिति । ता अस्य दक्षिणाः धर्मपुष्टिकरत्वसामान्यात् यस्माच्च यज्ञः पुरुषस्तस्मा
त्तं जनयिष्यति माता यदा तदाहुरन्ये सोष्यतीति तस्य मातरं यदा च प्रसूता भवति तदाऽसोष्ट पूर्णिके
ति विप्रयज्ञ इव सोष्यति सोमं देवदत्तोऽसोष्ट सोमं यज्ञदत्त इत्यतः शब्दसामान्याद्वा पुरुषो यज्ञः पुनरुत्पा
दनमेवास्य तत्पुरुषाख्यस्य यज्ञस्य यत्सोष्यत्यसोष्टेति शब्दसंबंधित्वं विप्रयज्ञस्येव किंच तन्मरणमे
वास्य पुरुषयज्ञस्यावभृथः समाप्तिसामान्यात् तद्धैतद्यज्ञदर्शनं घोरो नामतः आंगिरसो गोत्रतः कृष्णाय देव
कीपुत्राय शिष्यायोक्त्वोवाच तदेतत्त्रयमित्यादि व्यवहितेन संबंधः स चैतद्दर्शनं श्रुत्वाऽपिपास एव अन्या ॥२७॥
भ्यो विद्याभ्यो बभूव इत्थं च विशिष्टेयं विद्या यत्कृष्णस्य देवकीपुत्रस्यान्यां विद्यां प्रति तृष्णाच्छेदकरीति पुरुष
यज्ञविद्यां स्तौति घोर आंगिरसः कृष्णायोक्त्वेमां विद्यां किमुवाचेति तदाह स एवं यथोक्तयज्ञविदंतवे
लायां मरणकाले एतन्मंत्रत्रयं प्रतिपद्येत जपेदित्यर्थः किं तत् अक्षितमक्षीणमक्षतं वासीत्येकं यजुः सामर्थ्या
दादित्यस्थं प्राणं चैकं कृत्वाह तथा तमेवाह अच्युतमप्रच्युतं स्वरूपादप्रच्युतमसीति द्वितीयं यजुः प्राणसंशितं प्राणश्च स्य

ञु १

संसन्निते सम्यक् कृ कृतेच स्रच्छं तद्यमसीति न तीयं यदुक्तं चैतस्मिन्नर्थे विद्यास्कृतिपरे देवत्रवैमंत्रैलवत्तोन
रूपार्थमिमं त्रयं प्रतिपद्येति त्रिच संख्या बाधनात्तु वसंख्या हितदास्यात्। आम इत्यत्र आकारस्यानुबंधस्तु का
रोनर्थकः। इदं वक्ष्यप्रश्नस्य विरंतनस्य पुरापास्यैय यथेरितसः कारणस्य बीजत्व तस्य जगतः सदाख्यस्य ज्यो
तिः ज्यौति प्रकाशत्वं प्रयंति आत्रादुःखस्पष्टानुबंधः पुन्यंतीत्यनेन संबध्यते किंत वासरं खेरिवसर्वतोव्या अह॰
प्तं ब्रह्मणो ज्योति निवृत्त चक्षुषो ब्रह्मविदो ब्रह्मचर्यादि निवृत्तिसाधनेभ्रांतःकरणा आसमंततो ज्योतिःप
द्यंतीत्यर्थः परः परमितिलिंगव्यत्ययेन ज्योतिःपरत्वाद्यदिव्यलेदीप्यते दिवि द्योतं वतिपरस्मिन्ब्रह्मणि नेह॰
वर्त्तमानं। येन ज्योतिषेद्धः सविता तपति चंद्रमा भाति विद्युद्विद्योतते ग्रहतारागणा विभासंते किंचाऽन्योमं दि १
त्रद्गाह। यथोक्तं ज्योतिःपश्यंतः उद्वयं तमसोऽज्ञानलक्षणात्परि परस्तादिति तमसो वाऽपनेतृत्व ज्यो
तिरूपं परमादित्यस्थं परिपश्यंतो वयमुदगन्मेति व्यवहितेन संबंधस्तु ज्योतिः स्वकं अस्मीयमस्मद्दिस्थित
मादित्यस्थं स तदेकं ज्योतिः यदुत्तरमुत्कृष्टतरमूर्ध्वतरं वाऽपरज्योतिरपेक्ष्य पश्यंतउदगन्म वयं कमुदगन्मेत्याह। थे ५०
देवं द्योतनवंतं देवत्रा देवेषु सर्वेषु। सूर्यं रसासानां रश्मीनां प्राणानां च जगतः तरणात्स्वयं सूर्यमुदगन्म गतवंतो ज्यो
तिरुत्तमं सर्वज्योतिर्भ्य उत्कृष्टतममहो प्राप्तावयमित्यर्थः इदं तज्ज्योतिः ऋग्द्वयस्तुतं यदृक्त्रयेण प्रकाशितं दि
रत्यासो यज्ञकल्पनास्समाप्यर्थः। मनोमयपदेश्वरः। आकाशो ब्रह्मेति च ब्रह्मणो गुणैकदेशत्वेनाथेदानीं मन
आदीनि कारणायोः समस्तब्रह्मदृष्टिविधानार्थमारंभो॥ मनो ब्रह्मेत्यादिः मनो मनुते अनेनेति अंतःकरणं तद्ब्र
ह्मपरमित्युपासीतेत्येतदात्मविषयं दर्शनमध्यात्मम् अथाधिदैवतं देवताविषयमिदं वक्ष्याम आकाशो ब्रह्मेत्यु
पासीतेत्येवमुभयमध्यात्ममधिदैवतं चोभयं ब्रह्मदृष्टिविषयमादिष्टमुपदिष्टं भवत्याकाशात्मनसः सूक्ष्मत्वात्म
मनसोपलभ्यत्वाच्च ब्रह्मणो योग्यं मनो ब्रह्मदृष्टेः आकाशश्च सर्वगतत्वात्सूक्ष्मत्वादुपाधिहीनत्वाच्च। [illegible]
योगं ब्रह्म तदेतन्मनआख्यं चतुष्पाद्ब्रह्म चत्वारः पादा अस्य कथं वाक्पादः मनसो ब्रह्मण इत्याह। वाक्यादः

वाक्प्राणश्चक्षुःश्रोत्रमित्येते चत्वारः पादा इत्यध्यात्मम् अथाधिदैवतमाकाशस्य ब्रह्मणोऽग्निः पादो वायुरादित्यो दिश इ
त्येते एवमुभयमेव चतुष्पाद्ब्रह्मादिष्टं भवत्यध्यात्मं चैवाधिदैवतं च। तत्र वागेव मनसो ब्रह्मणश्चतुर्थः पादः
इतरपादत्रयापेक्षया। वाचा हि पादेनेव गवादिना वक्तव्यविषयं प्रतितिष्ठति अतो मनसः पाद इव वाक् तथा प्राणो
घ्राणः पादः तेनापि गन्धविषयं प्रति क्रामति तथा चक्षुः पादः श्रोत्रं पाद इत्येवमध्यात्मं चतुष्पात्त्वं मनसो ब्रह्मणो
ऽथाधिदैवतमग्निवाय्वादित्यदिश आकाशस्य ब्रह्मण उदरे हि गोः पादा विलग्ना उपलभ्यन्ते तेन तस्याकाश
स्याग्न्यादयः पादा इत्युच्यन्ते एवमुभयमध्यात्मं चैवाधिदैवतं चतुष्पादादिष्टं भवति। तत्र वागेव मनसो ब्रह्मणः पा चं ५
दश्चतुर्थः पादः सोऽग्निनाधिदैवतेन ज्योतिषा भाति च दीप्यते तपति च संतापं वा करोति। यथा वा तैलघृताद्याग्ने
याशनेनेद्धा वाग्भाति च तपति च वदनोत्साहवती स्यादित्यर्थः विद्वत्फलं भाति तपति च कीर्त्या यशसा ब्र
एवं ह्मवर्चसेन च य एवं यथोक्तं वेद। तथा प्राण एव ब्रह्मणश्चतुर्थः पादः स वायुना गन्धाय भाति च तपति च। तथा चक्षु
रादित्येन रूपग्रहणाय श्रोत्रं दिग्भिः शब्दग्रहणाय विद्याफलं समानं सर्वत्र ब्रह्मसंपत्तिरदृष्टफलं य एवं वेद द्वि
रुक्तिर्दर्शनसमाप्त्यर्था ॥ ५ ॥ ५ ॥ आदित्यो ब्रह्मणः पादः उक्त इति तस्मिन्सकलब्रह्मदृष्ट्यर्थमिदमारभ्यते। आ
दित्यो ब्रह्मेत्यादेश उपदेशस्तस्योपव्याख्यानं क्रियते स्तुत्यर्थम् असदव्याकृतनामरूपमिदं जगदग्रे प्रागवस्था
यामुत्पत्तेरासीन्न त्वसदेव कथमसतः सज्जायेतेत्यसत्कार्यत्वस्य प्रतिषेधात् ननु इहासदेवेति विधानाद्विकल्पः
स्यान्न क्रियास्विव वस्तुनि विकल्पानुपपत्तेः कथं तर्हीदमसदेवेति ननु अवोचाम अव्याकृतनामरूपत्वादसदि
त्यसदिति नन्वेव शब्दोऽवधारणार्थः सत्यमेवं न तु सत्त्वाभावमवधारयति किं तर्हि नामरूपव्याकृत
विषयस्य सच्छब्दप्रयोगो दृष्टस्तच्च नामरूपादिव्याकरणमादित्यायत्तं प्रायशो जगतस्तदभावे ह्यान्ध्यं तम इदं न २८॥
प्रज्ञायेत किंचनेत्यतस्तत्स्तुतिपरे वाक्ये सदपीदं प्रागुत्पत्तेर्जगदसदेवेत्यादित्यं स्तौति ब्रह्मदृष्ट्यर्हत्वायादित्यनिमि
त्तो हि लोके सदिति व्यवहारः। यथाऽसदेवेदं राजकुलं सर्वगुणसंपन्ने पूर्णवर्मणि राजन्यसतीति तद्वन्न
च सत्त्वं वा जगतः प्रतिपिपादयिषितम् आदित्यो ब्रह्मेत्यादेशपरत्वादुपसंहरिष्यते आदित्यं ब्रह्मेत्यु

पास्त इति। तत्सदासीत् ॰ तत्सत् प्रागुत्पत्तेः स्तिमितं निस्पन्दमसदिव सत्कार्याभिमुखमीषदुपजायन्नजातप्र
वृत्ति सदासीत्ततो लब्धपरिस्पन्दं तत्समभवत् अल्पतरनामरूपव्याकरणेनांकुरीभूतमिव बीजं ततोऽपि क्रमेण स्थूलीभ
वत्तदद्भ्योऽण्डं समवर्त्तत संवृत्तमाण्डमिति दैर्घ्यं छांदसं तदण्डं संवत्सरस्य कालस्य प्रसिद्धस्य मात्रां परिमाणमभिन्न
स्वरूपमेवाशयत स्थितं बभूव ततस्ततः संवत्सरपरिमाणात्कालादूर्ध्वं निरभिद्यत निर्भिन्नं वयसामिवाण्डं तस्य नि
र्भिन्नस्याण्डस्य कपाले द्वे रजतं च सुवर्णं चाभवतां संवृत्ते तत्र ते यो कपालयोर्यद्रजतं कपालमासीत्सेयं पृथि
वी पृथिव्युपलक्षितमधोऽण्डकपालमित्यर्थः यत्सुवर्णं कपालं सा द्यौर्द्युलोकोपलक्षितमूर्ध्वं कपालमित्यर्थः य
ज्जरायु गर्भपरिवेष्टनं स्थूलमण्डस्य द्विशकलीभावकाले आसीत्ते पर्वता बभूवुः यदुल्वं सूक्ष्मं गर्भपरि
सह वेष्टनं तन्मेघैः सह मेघा नीहारोऽवश्यायो बभूव या धमनयो गर्भस्य जातस्य देहे शिरास्ता नद्यो बभू
वुः यत्तस्य बस्तो सर्वबास्तेयमुदकं समुद्रो अथ यत्तदजायत गर्भरूपं तस्मिन्नण्डे सोऽसावादित्यस्तमादित्यं जायमानं त १
रू मनु घोषा उलूलव उरवो विस्तीर्णाः रवाः उदतिष्ठन्नुत्थितवन्तः ईश्वरस्येव प्रथमपुत्रजन्मनि सर्वा
णि च स्थावरजंगमानि भूतानि सर्वे च तेषां भूतानां कामाः काम्यंत इति विषयाः स्त्रीवस्त्रान्नादयः यस्मादादि
त्यजन्मनिमित्ता भूतकामोत्पत्तिस्तस्मादद्यत्वेऽपि तस्यादित्यस्योदयं प्रति प्रत्यायनं प्रत्यस्तमनं प्रति चाथवा पुनः ग प्र
पुनः प्रत्यागमनं प्रत्यायनं तत्प्रतिनिमित्तीकृत्येत्यर्थः सर्वाणि भूतानि सर्वे च कामा घोषा उलूलवश्चानु
तिष्ठंति प्रसिद्धं ह्येतदुदयादौ सवितुः स यः कश्चिदेतमेवं यथोक्तमहिमानं विद्वानादित्यं ब्रह्मेत्युपास्ते
स तद्भावं प्रतिपद्यत इत्यर्थः किं च दृष्टं फलमस्याभ्याशो ह क्षिप्रं तद्विदो यदिति क्रियाविशेषणमेतमेवंविदं साधवः २३
शोभना घोषाः साधुत्वं घोषादीनां यदुपभोगे पापानुबंधाभावः आ च गच्छेयुः आगच्छेयुश्चोप च निम्रेडेरन्नुप
निम्रेडेरन् न केवलमागमनमात्रं घोषाणामुपसुखयेयुश्चोपसुखयेयुश्चेत्यर्थः द्विरभ्यासोऽध्यायपरिसमा
प्त्यर्थः आदरार्थश्च ॥ ॥ इति श्रीगोविंदभगवत्पूज्यपादशिष्यस्य परिव्राजकाचार्यस्य श्रीशंकरभगवतः कृतौ छांदोग्योपनिषद्विवरणे
तृतीयः प्रपाठकः समाप्तः ॥ ॥

पा १ ना २

॥ॐ॥ श्रू॥ वायुप्राणौ ब्रह्मणः पादद्वयस्य व्यासः पुरस्ताद्वर्णितः। अथेदानीं तयोः साक्षाद्ब्रह्मत्वेनोपास्यत्वायोत्तरमा
रभ्यते सुखावबोधार्थाख्यायिका विद्यादानग्रहणविधिप्रदर्शनार्था च श्रद्धान्नदानानुद्धतत्वादीनां च विद्याप्रा
प्तिसाधनत्वं प्रदर्श्यते आख्यायिकया जनश्रुतस्यापत्यं जानश्रुतिः ह इत्यैतिह्यार्थः। पुत्रस्य पौत्रः स पौ
पौत्रायणः स एव श्रद्धादेयः श्रद्धापुरःसरमेव ब्राह्मणादिभ्यो देयमस्येति श्रद्धादेयः स च बहुदायी प्रभूतं दातुं शी
लमस्येति बहुदायी बहुपाक्यो बहुपक्तव्यमहन्यहनि गृहे यस्यासौ बहुपाक्यो भोजनार्थिभ्यो बहु ह्यस्य गृ
हेऽन्नं पच्यत इत्यर्थः। एवंगुणसंपन्नोऽसौ जानश्रुतिः पौत्रायणो विशिष्टे देशे काले च कस्मिंश्चिदास बभूव ह स
ह सर्वतः सर्वासु दिक्षु ग्रामेषु नगरेषु आवसथानेत्य वसंति येषु ते आवसथास्तान्मापयांचक्रे कारितवानि
त्यर्थः। सर्वत एवं मे ममान्नं तेष्वावसथेषु वसंतो भोक्ष्यंतीत्येवमभिप्रायः तत्रैवं सति राजनि तस्मिन्घर्म
काले हर्म्यतलस्थे हंसा निशायां रात्रावतिपेतुः ऋषयो देवता वा राज्ञोऽन्नदानगुणैस्तोषिताः संतो हंसरूपा
भूत्वा राज्ञो दर्शनगोचरे निपेतुः पतितवंतः तस्मिन्काले तेषां पततां हंसानामेकः पृष्ठतः पतन्नग्रतः पत
तं हंसमभ्युवादाभ्युक्तवान् हो हो ऽयीति संबोधयन् भल्लाक्ष भल्लाक्षेत्यादरं दर्शयति यथा पश्यपश्याश्चर्यमिति
तद्वद्भल्लाक्ष इति मंददृष्टित्वं सूचयन्नाह अथवा सम्यग्ब्रह्मदर्शनाभिमानवत्त्वात्तस्यासकृदुपालब्धस्तेन पीड्यमानो
ऽमर्षितया तत्सूचयति भल्लाक्षेति जानश्रुतेः पौत्रायणस्य समं तुल्यं हि विद्दिवा द्युलोकेन ज्योतिः प्रभास्वरमन्न
दानादिजनितप्रभावजमाततं व्याप्तं द्युलोकस्पृगित्यर्थो दिवाऽह्ना वा समं ज्योतिरित्येतत्तन्मा प्रसांक्षीः संज
नं सक्तिं तेन ज्योतिषा संबंधं माकार्षीरित्यर्थः। तत्संजननेन तज्ज्योतिस्त्वां मा प्रधाक्षीर्मा दहत्वित्यर्थः पुरुषव्य २८
प त्ययेनैव माधाक्षीरिति तमेवमुक्तवंतं परः इतरः सोऽग्रगामी प्रत्युवाचारे निकृष्टोऽयं राजा वराकस्तं कमेनं संतं केनमा
हात्म्येन युक्तं संतमिति कुत्सयत्यथैनमेवं सबहुमानमेतद्वचनमात्थ रैक्वमिव सयुग्वानं सह युग्वया गंत्र्याव

रत्न २ श्रा १

त्तत इति । स[ ]युग्वा रैक्व सत्तमिवात्थैनमननुरूपमस्मिन्नयुक्तमीदृशं वं कुरैक्व इवे यलिप्रायस्तं इतर आह । यो
नु कथं त्वयोच्यते सयुग्वा रैक्व इत्युक्तवंतं स क्षत्ताह आह शृणु यथा[ ] स रैक्वो यथा लोके कृतायः कृतो नामायो
द्यूतसमये प्रसिद्धश्चतुरंकः स य[ ]दा जयति द्यूते प्रवृत्तानां तस्मै विजिताय तदर्थमितरे त्रिद्व्येकांका अधरेयास्
त्रेताद्वापरक[ ]लिनामानः संयंति संगच्छंति तेः तत्सर्वं ति चतुरंके कृते आयन्ति एकाकान्तो विद्यमानत्वादंतर्भ
वंतीत्यर्थः यथायं दृष्टांत एवमेनं [ ]रैक्वं कृतायस्थानीयं त्रेताद्यायस्थानीयं सर्वं तदभिसमैति अंतर्भवति रैक्वे । किं
तद्यत्किंच लोके सर्वाः प्रजाः साधु । लोके शोभनं धर्मजातं कुर्वंति तत्सर्वं रैक्वस्य धर्मे अंतर्भवति तस्य च फलं सर्व
प्राणिधर्मफलमंतर्भवतीत्यर्थः तदपि कश्चिद्यस्तु वेद्यं वेद[ ] किं तद्वेद्यं तथान्योपि[ ] यस्स रैक्वो वेद तदपि सर्वप्रा
णिधर्मजातं तत्फलं च रैक्वमिवाभिसमैतीत्यनुवर्तते । स एवंभूतो रैक्वो मया विद्वानेतदुक्त एवमुक्तो रैक्ववत्सर्
वकृतायस्था[ ]नीयो भवतीत्यभिप्रायः तदु ह तदेतदीदृशं हंसवाक्यमात्मनः कुत्सारूपमन्यस्य विदुषो रैक्वा
देः प्रशंसारूपमुपशुश्राव श्रुतवान् हर्म्यतलस्थो राजा जानश्रुतिः पौत्रायणः तच्च हंसवाक्यं स्मरन्नेव पौनःपु
न्येन रात्रिशेषमतिवाहयामास । ततः स वंदिभी राजा स्तुतियुक्ताभिर्वाग्भिः प्रतिबोध्यमान उवाच क्षत्तारं संजि
हान एव शयनं निद्रां वा परित्यजन्नेव हे अंग वत्साऽरे सयुग्वानमिव रैक्वमात्थ किं मां स एवं स्तुत्यर्हो नाहमित्य
भिप्रायः अथवा सयुग्वानं रैक्वं मा आत्थ गत्वा मम तद्दिदृक्षा तद्देयं राज्ञां वा पारणार्थो नर्थको वा वाच्यः स च क्ष
त्ता प्रयुवा न रैक्वानयनकामो राज्ञोभिप्रायं ज्ञात्वा यो नु कथं सयुग्वा रैक्व इति राज्ञैवमुक्तो आनेतुं तद्विह्नं ज्ञातुमिच्छ
न्यो नु कथं सयुग्वा रैक्व इ[ ]वोव[ ] स च[ ] स क्षत्ता राज्ञो वचनमेवावोचत्तस्य तत्स्मरन्स ह क्षत्ता नगरं ग्रामं गत्वान्वि
ष्यरे धेनाविदं न व्यज्ञासिषमिति प्रत्येयाय प्रत्यागतवान् तं होवाच क्षत्तारमरे यत्र ब्राह्मणस्य ब्रह्मविद एका

ते ऽरण्ये नदीपुलिनादौ विविक्ते देशे ऽन्वेषणानुमार्गेण लभ्यते तत्तत्रैनं रैक्वं ... तत्र मार्गणां कुरुत इ
त्यर्थ इत्युक्तः । हे ऽन्वा न्विष्य तं विजने देशे ऽधस्ताच्छकटस्य गंत्र्याः पामानं कषमाणं कंडूयमानं दृष्ट्वा ऽयं स नूनं
रैक्व इति समीप उपविवेश विनयेनोपविश्य तं हाभ्युवाद त्वं नु असि हे भगवो भगवन्स
युग्वा रैक्व इत्येवं पृष्टो ऽहमस्मि हि अरा अरे इति ह अनादर एव प्रतिजज्ञे ऽभ्युपगतवान् स तं विज्ञायाविदं विज्ञा
तवा लभ्यमिति प्रत्येयाय । तत्र जानश्रुतेर्गार्हस्थ्यं प्रत्यति प्रायं बुद्ध्वा धनार्थितां च तदु ह एवं जानश्रुतिः पौत्रायणः ष
न नि ट्शतानि गवां निष्कं कंठहारमश्वतरीभ्यां युक्तं रथं तदादाय धनं गृहीत्वा प्रतिचक्रमे रैक्वं प्रतिगतवान् तं च म
ता बान्ते संगत्वा ह्युवाद हाभ्युक्तवान् रैक्व षट्शतानीमानि मयानीतानि अयं च निष्को अश्वतरीरथ गवां
ता ऽनेन धनेन सह अनु म एतां देवतां यां देवतां त्वमुपास्से देवतोपदेशेन मामनुसाधि
ध्यायमेतद्धनं माद्यस्व लब्धं वोनुसाधि च मा मे तां देवतां यां देवतां त्वमुपास्से ॥ अह इत्ययं निपातो विनिग्रहार्थीयो ऽन्यत्र इह त्वनर्थक
इत्यर्थैतमेवमुक्तं तं राजानं प्रत्युवाच । परो रैक्वः अह हारे त्वा शूद्र हारेत्वा गोभिः सह तवैवास्त्विति वैवति घ्नतुनम
एवं नाम तस्य पृथक्कृयो गाद्दूरेत्वा हारेणायुक्ता इत्वा ऽत्रीसायं हारेत्वा गोलिः सह तवैवास्तु संबंधा सह क्षत्तारं मुनैचारि
पर्याप्तेन कर्मार्थमनेन प्रयोजनमिति प्रायः हे शूद्र इति ननु राजासौ क्षत्रसंबंधात् सह क्षत्तारं कथमिदं मनन्तु रू परैक्वो पोच्यते
युक्तं विद्याग्रहणाय च ब्राह्मणसमीपोपगमात् शूद्रस्य च न धिकारात् कथमिदं अर्थ्याचयाप्रतीति तिरा । पिषिरा
हे शूद्र इति । तत्र कुरावार्याः हंसवचः श्रवणात् शुगेनमाविवेश तेनासौ शुचा श्रुत्या वा द्रवतीति । षिरा
त्मनः परो ऽहं तां दर्शयन् शूद्रेति इति शूद्र इव द्रवतीति नैनं विद्याग्रहणायोपजगाम न शुश्रूषया । नतु जा ३०॥
• त्यैव शूद्र इत्य पर पुनरा कुर त्वं धनमाह ... तमिति रू षैवैन मुक्तं वा ... न शूद्र इति लिंगं च बकाहरणे
उपादानं धनस्येति तद्दूरे एर्षमतं त्वा पुनरेव जानश्रुतिः पौत्रायणो गवां सहस्रमधिकं जायां च श्रेष्ठ रसिम
ऱौ त्या २ वै २ पे २

तां दुहितरं मामभवत् तद्दानाय प्रतियन्नेकां तवान्त्य रैक्व हेदं सहस्रं गवामयं निष्कोऽयमश्वतरीरथ इयं जाया यार्थं जायाम्
मदुहितार्थं च ग्रामोऽयं यस्मिन्नास्से तिष्ठसि सहस्रं च तदर्थं मया कल्पितं तदेत सर्वमादायाच्छ शाधीत्येव मां हे भगवन्नित्यु
क्तः स्याज्जायार्थमानीतां ताया राज्ञो दुहितुर्मुखमेवमुखमिव मुखं द्वारं विद्याया दानतीर्थमुपोद्गृह्णन् जानन्नित्यर्थः ब्रह्मच
रीधनदायी मेधावी श्रोत्रियः प्रियो विद्यया वा विद्यां यः प्राह तानि तीर्थानि षण्णमेति विद्यायाया वचनं विज्ञायते हेवं च
नं नुपोद्गृह्णन्नुवाचोक्तवान् आजहार आहृतवान् त्वं गा यच्चान्यद्धनं तत्साध्विति वाक्यशेषः। शूद्र इति पूर्वो
क्तानुकृतिमात्रं न तु कारणांतरापेक्षया पूर्ववदनेनैव मुखेन विद्याग्रहणतीर्थेनालापयिष्यथा आलापयसि मामा सा
पायसीत्यर्थः। ते हैते ग्रामा रैक्वपर्णा नाम विख्याता महावृषेषु देशेषु यत्र येषु ग्रामेषूवासोषितवान् रैक्वस्तान्सो पु
ग्रामानदात्तस्मै रैक्वाय राजा तस्मै धनं दत्तवते ह किलोवाच विद्यां स रैक्वः॥ ॥वायुर्वाव संवर्गो वायुर्वावेत्य
वधारणार्थः। संवर्गः संवर्जनात् संग्रहणात् संग्रसनाद्वा संवर्गो वक्ष्यमाणा अग्न्याद्या देवता आत्मभावेनापाद्य
तीयतः संवर्गः संवर्जनाख्यो गुणो ध्येयो वायोर्वैकृतायां तत्तौ वद दृष्टांतः कथं संवर्गत्वं वायोरित्याह यदा यस्मिन्का
ले वा अग्निरुद्वायत्युद्वासनं प्राप्नोतीत्युपशाम्यति तदासाववह्निर्वायुमेवाप्येतीति वायुस्वात्मा लयमपिगच्छति तथा
यदा सूर्योऽस्तमेति वायुमेवाप्येति यदा चंद्रोऽस्तमेति वायुमेवाप्येतीति वायुस्वात्मा लयमपिगच्छतीत्यत्र यदा सूर्योऽस्तमे
ति वायुमेवाप्येति यदा चंद्रोऽस्तमेति वायुमेवाप्येतीति ननु कथं सूर्याचंद्रमसोः स्वरूपावस्थितयोर्वायावपिगमनं
नैष दोषोऽस्तमनेऽदर्शनप्राप्तेर्वायुनिमित्तत्वात् वायुना ह्यस्तं नीयते सूर्यश्चलनं ह्यस्य वायुकार्यत्वात् अथ वा प्रल
येव सूर्याचंद्रमसोः स्वरूपस्य तेजोरूपयोर्वायावेवापिगमनं स्यात् तथा यदाप उच्छुष्यंति उच्छोषमापद्यंते तदा
वायुमेवापियंति वायुर्हि यस्मादेवैतान् महतोऽग्न्याद्यान् संवृंक्ते अतो वायुः संवर्गगुणत्वेनोपास्य इत्यर्थः। इत्यधिदैवतं
अधिदैवतासु संवर्गदर्शनमुक्तं॥ अथानंतरमध्यात्मम् अपि संवर्गदर्शनमिदमुच्यते प्राणो मुख्यो वाव संवर्गः
स पुरुषो यदा स्मिन्काले स्वपिति प्राणमेव वागप्येतीति वायुमिवाग्निः। प्राणं चक्षुः प्राणं श्रोत्रं प्राणं मनः प्राणो ह्ये
य

स्माद्देवता न्वागादीन्सर्वान्संवृंक्त इति तौ वा एतौ द्वौ संवर्गौ वायुरेव देवेषु संवर्गः प्राणेषु वागादि
प्राणख्या वायु मन ३ षु मुख्यो ऽथैतयोस्तुत्यर्थमाख्यायिकारच्यते ह स्मेत्यैतिह्यार्थः शौनकं च शुनकस्यापत्यं शौनकं कापेयं कपि
गोत्रमभिप्रतारिणं च नामतः कक्षसेनस्यापत्यं काक्षसेनिं भोजनायोपविष्टौ परिविष्यमाणौ सूपकारैः ब्रह्मचारी
ब्रह्मविच्छौण्डो बिभिक्षे भिक्षितवान् ब्रह्मचारिणो ब्रह्मविन्मानितावनुध्यातं जिज्ञासमानोऽस्तु तस्मै सिद्धान्नं ददतुर
ब्रह्मविच्छौण्डो विलिदे लिक्षितवान् ब्रह्मचारिणो ... सहोवाच ब्रह्मचारी महात्मनश्चतुर इति द्वितीया बहुवचनं देव एको ऽग्न्या
तु न दत्तवन्तौ ह किमयं वक्ष्यतीति स होवाच ब्रह्मचारी ... जगारेति प्रश्नमेकवचनस्य वंत्य
दीन्वायुर्वागादीन्प्राणः कः स प्रजापतिर्जगार ग्रसितवान् कः सो जगारेति प्रश्नमेकेवचनस्य
त्रिभुवनं भूरादिः सर्वो लोकस्तस्य गोपाः गोपायितारक्षितारो गोपेत्यर्थः । तं कं प्रजापतिं हे कापेय
स्मिन्स्तानीति भुवनं भूरादिः सर्वो लोकस्तस्य ... मरणधर्माणोऽविवेकिनो वा हे ऽभिप्रतारिन् बहुधाऽध्यात्माधिदैवतादि स्थूलप्रका
नाभिपश्यन्ति न जानन्ति ते मर्त्या मरणधर्माणो ... यस्मै वा एतदन्नमहरहरन्नमदनाय क्रियते संस्क्रियते तस्मै प्रजापतये एतदन्नं न दत्तमिति तदुक्त्वा
रैर्वसंतयस्मैवा एतदहरहरन्नमदनाय ... ब्रह्मचारिणं प्रत्युवाच आजगाम गत्वा वा
ब्रह्मचारिणो वचनं शौनकः कापेयः प्रतिमन्वानो मनसालोचयन् ब्रह्मचारिणं प्रत्युवाच आजगाम गत्वा वा
हायं लभमवो ... पश्यन्ति मर्त्या इति तं वयमुपास्यामः । कथमात्मा सर्वस्य स्थावरजङ्गमस्य च किं च देवानामग्न्या
दीनामात्मा निसंहृत्य ग्रसित्वा पुनर्जनिता ... वायुरूपेणाधिदैवं तमध्यात्मं च प्राणरूपेण वागादीनां च मयादेनां
जानां जनयिता अथवा आत्मा देवानामग्निवागादीनां देवानां जनिता प्रजानां स्थावरजङ्गमानां हिरण्यदंष्ट्रो भक्षितृ
दंष्ट्रो ऽसंभग्नदंष्ट्र इति यावत् बभसो ऽनसूरिः सूरिर्मेधावी न सूरिरसूरिस्तं प्रतिषेधो ऽनसूरिः
सूरिरेवेत्यर्थो महान्तमतिप्रमाणमप्रमेयमस्य प्रजापतेर्महिमानं विभूतिमाहुर्ब्रह्मविदो यस्मादन्यैरनद्यमानोऽन्नं ॥३२॥
सूरिरेवेत्यर्थो ... वागादिदेवतारूपमत्तीति ... इति निरर्थकः वयं हे ब्रह्मचारिन्नाद्यमानो
घमानो ऽन्नं भक्षमाणो यदनन्नमग्निवागादिदेवतारूपमत्ति ... वयं तं मितिश्च ... नवयं सिदमुपास्महे । किं तु
स्मदमेवं यथोक्तलक्षणं ब्रह्म वयं आ उपास्महे वयमिति व्यवहितेन संबन्धोऽन्यो न वयं सिदमुपास्महे । किं तर्हि
र्हि परमेव ब्रह्मोपास्महे इति वर्णयन्तितदत्ता स्मै भिक्षामित्यवोचयन्त्यांस्तस्मै हदद्युः ते हि विद्वांसो ते वै येग्र

स्यं तेभ्य ग्न्यादयो याश्चतेषां ग्रसिता वायुः पंचान्ये वादि गादिभ्य स्तथान्ये स्युं तेभ्यः पंचाध्यात्मं वागादयः प्राणश्च ते स
र्वे दश सन्त एवं ति संख्यया दश सन्तस्तत्कृतं भवति ते चतुरंकः एक आयत एव चत्वारस्त्र्यंकाय कृतैव त्र एवं त्रयो परे द्व्यंका
पद त्र एवं द्वावन्यो वेकांकाय व देवमेको न्य इत्येवं दश सन्तस्तत्कृतं भवतीत्य त एवं तस्मात्सर्वासु दिक्षु दशस्वेव
ग्न्याद्या वागाद्याश्च दश संख्या सामान्यादन्नमेव दशाक्षरा विराड्विराडन्नमिति श्रुतिरतोऽन्नमेव दश संख्या
त्वादेव दश कृते कृतं तत्सोवा ह्यत्तृत्वेनेत्यवोचाम सैषा विराड्दशसंख्या सत्यन्नं चान्नादिनी च कृतत्वेन कृते हि
दश संख्या विघते तत्त्वा तोऽन्नमन्नादिनी च सात्त्या विद्वान् दशादिदेवतान्मलूतः सन्नु विराट्त्वेन दश संख्ययान्नं कृत
संख्ययान्नादितयाऽन्नानादिन्या इदं सर्वं जगत् दशदिक्संस्थं दृष्टं कृतसंख्या भूतान्नादितयाऽन्नानादिन्या इदं सर्वं
जगत् दशदिक्संस्थं दृष्टं उपलब्धं सर्वं विदोऽस्य सर्वं कृतसंख्याभूतस्य दशादिक् संबद्धं दृष्टमुपलब्धं भवति किंच अ
न्नादश्च भवति य एवं यथोक्तदर्शी दिक्स्वेवं सदुपासनां समाप्त्यर्थः॥ ॥सर्वं वागाद्यग्न्यादि चान्नान्नादत्वसं
स्कृतं जगदेकीकृत्य षोडशकलाद्य प्रविला. ऽयतस्मिन्ब्रह्मदृष्टिर्विधातव्येत्यारभ्यते श्रद्धा तपसो ब्रह्मोपासनांगत्व
दर्शनाया आख्यायिका सत्यकामो ह नाम तो ह वाभूहेतिहार्थः जबालाया अपत्यं जाबालो जबालां स्वां मातरमा
मं त्रयां चक्रे इति आमन्त्रितवान् ब्रह्मचर्यं स्वाध्यायग्रहणाय हे भगवति विवत्स्यामि आचार्यकुले किंगोत्रोऽहं किमस्य
मम गोत्रं सोऽहं किंगोत्रो न्वहमस्मीति एवं पृष्टा जबाला सा हैनं पुत्रमुवाच नाहमेतत्तव गोत्रं वेद हे तात यद्गो
त्रस्त्वमसि कस्मान्न वेत्सीत्युक्ताह बहु अहं चरन्ती परिचर्याजातमतिथ्यभ्यागतादि चरंत्यहं परिचरंती चरि
हमतश्च तदपरिचरणते न चित्ते न चेतनतया गोत्रादिस्मरणे मम मनो नाभूत् यौवने च तत्काले त्वामलभे लब्ध
वत्यस्मि तदेव तत्पितापरतोऽनाथाहं साहमेतन्न वेद यद्गोत्रस्त्वमसि जाबाला तु नामाहमस्मि सत्यकामो नाम
त्वमसि स त्वं सत्यकाम एवाहं जाबालोऽस्मीत्याचार्याय ब्रवीथा यदाचार्येण पृष्ट इत्यर्थः इत्यभिप्रायः स ह सत्य

कामोहारिद्रुमतंहरिद्रुमतोवैनंहारिद्रुमतंगौतमंगोत्रतएत्यगत्वोवाचब्रह्मचर्यंभगवतिश्रवात्स्यामिवत्स्याम्यतउपेयाम्
पगच्छेयंशिष्यतयाभगवंतमित्युक्तवंतंहोवाचगौतमःकिंगोत्रोनुसोम्यासीतिविज्ञातकुलगोत्रःशिष्यःउपनेतव्यइतिपृष्ट
:प्रत्याहसत्यकामःसहोवाचनाहमेतद्वेदभोयद्गोत्रोहमस्मिकिंत्वपृच्छंपृष्टवानस्मिमातरंसामयापृष्टामांप्रत्यब्रवीन्माता
अहं बह्वहंचरंतीत्यादिपूर्ववत्तस्याअहंवचःस्मरामिसोहंसत्यकामोजाबालोस्मीतिभोइतितंहोवाचगौतमोनैतदचोऽब्राह्मणो
विशेषेणवक्तुमर्हत्यार्जवार्थसंयुक्तंमृजवोहिब्राह्मणानेतरेस्वभावतोयस्मान्नसत्याद्ब्राह्मणजातिधर्मादपेयगाःनाप
गतवानस्यातोब्राह्मणंत्वामुपनेष्येऽतःसंस्कारार्थंहोमायसमिधंसोम्याहरेत्युक्त्वातमुपनीयकृशानामबलानांगो
यूथान्निराकृत्यापाकृष्यचतुःशताचत्वारिशतानिगवामुवाचेमागाःसोम्यत्वमनुसंव्रजानुगच्छेत्युक्तस्ताअरण्यं
प्रत्यभिप्रस्थापयन्नुवाच नासहस्रेणापूर्णेनसहस्रेणनावर्तेयंनप्रत्यागच्छेयमितिउक्त्वासगाअरण्यंतृणोदकबहुलं
द्वंद्वरहितंप्रवेश्यसवर्षगणंदीर्घंप्रोवासविप्रोषितवान्स्ताःसम्यग्गावोरक्षितायदायस्मिन्कालेसहस्रंसंपेदुःसंपं
न्नाःबभूवुः।तंसत्यकाममेवंश्रद्धातपोभ्यांसिद्धंवायुर्देवतादिक्संबंधिनीतुष्टासत्यर्षभमनुप्रविश्यर्षभ
पेणालंकृतायाथसत्यकामैतेनऋषभेणोत्युवादकस्यकुमारान्वितिभगवइतिप्रतिशुश्रावप्रतिवचनंददावित्यर्थः।
प्राप्ताःसोम्यसहस्रंस्मःपूर्णातवप्रतिज्ञातःप्रापयनोस्मानाचार्यकुलंकिंचाहंब्रह्मणःपरस्यतेतुभ्यंपादं
ब्रवाणिकथयामीत्युक्तःप्रत्युवाचब्रवीतुकथयतुमेभगवानित्युक्तऋषभस्तस्मैसत्यकामायप्रो
हउवाचप्राचीदिक्कलाब्रह्मणःपादस्यचतुर्थोभागस्तथाप्रतीचीदिक्कलातथादक्षिणादिक्कलोदीची
दिक्कलैषवैसोम्यब्रह्मणःपादःचतुष्कलश्चतस्रःकलाअवयवायस्यपादस्यसोयंचतुष्कलःपादोब्रह्मणः
प्रकाशवान्नामप्रकाशवानित्येवंनामाभिधानमस्यतथोत्तरेऽपिपादास्त्रयश्चतुष्कलाब्रह्मणःसयःकश् ३२॥
चिदेवंयथोक्तमेतंब्रह्मणश्चतुष्कलंपादंविद्वान्प्रकाशवानित्यनेनगुणेनविशिष्टमुपास्तेतस्येदंफलं

सत्यकामा३इतिसंबोध्यतमसौसत्यकामो०

यामभिसं ४ ऐकत्राभिमुख्यः संस्कृता ४

प्रकाशवानस्मिंल्लोके भवति प्रख्यातो भवतीत्यर्थः। तथाऽदृष्टं फलं प्रकाशवतो ह लोकान्देवादिसंबंधिनो मृतः
सञ्जयति प्राप्नोति। य एतमेवं विद्वांश्चतुष्कलं पादं ब्रह्मणः प्रकाशवानित्युपास्ते॥ सोऽग्निष्टे पादं वक्तेत्युक्त्वोपर
रामर्षभः। स सत्यकामो स ह श्वोभूते परेद्युर्नैत्यकं कृत्वा गा अभिप्रस्थापयांचकाराचार्यकुलं प्रति ताः शनैः
श्चरंत्यो यत्राचार्यकुलाभिमुख्याः प्रस्थिता यत्र यस्मिन्काले ऽभिसायं निशाया बभूवुस्तत्राग्निमुपसमाधाय गा
उपरुध्य समिधमाधाय पश्चादग्नेः प्राङ्मुख उपविवेश। [illegible]वचो ध्यायंस्तमग्निरभ्युवाद सत्य काम
इति संबोध्य तम सोऽस सत्यकामो भगव इति ह प्रतिशुश्राव प्रतिवचनं ददौ ब्रह्मणः सोम्य ते पादं ब्रवाणि ब्रवीतु
मे भवानिति तस्मै होवाच। पृथिवी कलाऽतरिक्षं कला द्यौः कला समुद्रः कलेत्याग्निगोचरमेव दर्शनम
ग्निर्ब्रवीदेष वै सोम्य चतुष्कलः पादः ब्रह्मणोऽनंतवान्नाम स यः कश्चिद्यथोक्तं पादमनंतवत्त्वेन गुणे
न उपास्ते स तथैव तद्गुणो भवति अस्मिंल्लोके मृतश्चानंतवतो ह लोकान्सञ्जयति य एतमेवमित्यादि पू
र्ववत्॥ ॥ सोऽग्निर्हंसस्ते पादं वक्तेत्युक्त्वोपरराम। हंस आदित्यः शौक्ल्यात्पतनसामान्याच्च हंसः
स ह श्वोभूत इत्यादि समानमग्निः कला सूर्यः कला चंद्रः कला विद्युत्कलैष वै सोम्येति ज्योतिर्विषयमेव
यद्दर्शनं प्रोवाचातो हंसस्यादित्यचंद्रातीतेयत विद्युत्फलं ज्योतिष्मान्दीप्तियुक्तोऽस्मिंल्लोके भवति चंद्रादि
त्यादीनां ज्योतिष्मतश्च लोकान्जयति समानमुत्तरं॥ ॥ हंसोऽपि मद्गुष्टे पादं वक्तेत्युक्त्वोपरराम। म
द्गुरुदकचरः पक्षी स चाप्संबंधात्प्राणः स ह श्वोभूत इत्यादि पूर्ववत्स भ[illegible]च मद्गुः प्राणस्य विषयमेव यद्दर्शन
मुवाच प्राणः कलेत्याद्यायतनवान्नित्येव नामायतनं मनः सर्वकरणोपहृतानां भोगानां। तद्यस्मिन्पादे विद्य
त इत्यायतनवान्नाम पादस्तं पादं तथैवोपास्ते यः स आयतनवानाश्रयवानस्मिंल्लोके भवति तथायतनवत
एव सावकाशांल्लोकान्मृतो जयतीति य एतमेवमित्यादि पूर्ववत्॥ स एवं ब्रह्मवित्सन्प्राप ह प्राप्तवा
नाचार्यकुलं तमाचार्योऽभ्युवाद सत्य कामा३ इति भगव इति ह प्रतिशुश्राव ब्रह्मविदिव वै सोम्य भासि प्रसन्ने

ट्य: प्रहसितवदनश्च निश्चिंत: कृतार्थो ब्रह्मविद्भवन्यत आहाचार्यो ब्रह्मविदिव सौम्य भासीति को नु त्वेति वितर्क
यन्नुवाच। कस्त्वामनुशशासेति स चाह सत्यकामोऽन्ये मनुष्येभ्यो देवा: मामनुशिष्टवंत: कोऽन्यो भवच्छि
ष्यं मां मनुष्य: सन्ननुशासितुमुत्सहेतेत्यभिप्राय:। अतोऽन्ये मनुष्येभ्य इति ह प्रतिजज्ञे प्रतिज्ञातवान्
भगवांस्त्वेव मे कामे मम इच्छायां ब्रूयात्किमन्यैरुक्तेन नाहं तद्गणयामीत्यभिप्राय: किंच श्रुतं हि यस्मा
न्ममापि विद्यत एवास्मिन्नर्थे भगवद्दृशेभ्यो भगवत्समेभ्य ऋषिभ्य: आचार्याद्धैव विद्या विदिता साधिष्ठं
ती साधुतमत्वं प्रापदिति प्राप्नोतीत्यतो भगवानेव ब्रूयादित्युक्त आचार्योऽब्रवीत्तस्मै तामेव दैवतै
रुक्तां विद्यां अत्र ह न किंचन षोडशकलविद्याया: किंचिदेकदेशमात्रमपि न वीयायेति विगतमित्यर्थ:। द्विर
भ्यासो विद्यापरिसमाप्त्यर्थ:॥ ॥पुनर्ब्रह्मविद्यां प्रकारान्तरेण वक्ष्यामीत्यारभते गतिं च तद्विदोऽग्निवि
द्यां चाख्यायिकां पूर्ववत्॥ श्रद्धातपसोर्ब्रह्मविद्यासाधनत्वप्रदर्शनार्था। उपकोसलो ह वै नामत: क
मलस्यापत्यं कामलायन: सत्यकामे जाबाले ब्रह्मचर्यमुवास तस्य ह आचार्यस्य द्वादश वर्षाण्यग्नीन्परिचचारा
ग्नीनां परिचरणं कृतवान् स ह स्माचार्योऽन्यानन्ब्रह्मचारिण: स्वाध्यायं ग्राहयित्वा समावर्त्तयंस्तमेवोपकं को
सलमेकं न समावर्त्तयति स्म ह। तमाचार्यजायोवाच तप्तो ब्रह्मचारी कुशलं सम्यगग्नीन्परिचचारीत्परि
चरितवान् भगवांश्चाग्निकुशलं न समावर्त्तयत्यतोऽस्मै ते ह्युत्तं न समावर्त्तयतीति ज्ञात्वा त्वामग्नयो मा परिप्र
वोचन्। गर्हितिव मा कुर्युरत: प्रब्रूह्यस्मै विद्यामिष्टामुपकोसलायेति तस्मा एवं जायया उक्तोऽपि हाप्रो
च्यैवानुक्त्वैव किंचित्प्रवासांचक्रे प्रवसितवान्। स होपकोसलो व्याधिनामानसेन दु:खेनानशितुम
नशनं कर्तुं दध्रे धृतवान् तं मनसा स्त्री अग्न्यागारेऽवस्थितमाचार्यजायोवाच हे ब्रह्मचारिन्नशाने ॥३३॥
नं नु त्वं किं नु कस्मात्कारणान्नाश्नासीति स होवाच बहवो नैके अस्मिन्पुरुषे कृतार्थे प्राकृते कामा इच्छा:
कर्तव्यं प्रतिनानात्ययोऽतिगमनं येषां व्याधयो नानाकर्तव्यचिंतानां तेनानात्यया व्याधय: कर्तव्यं प्रतिप्रा

ष्टितानि भिन्नानि चित्रदुःखानीत्यर्थस्तैः प्रतिपूर्णोऽस्म्यतो नाशिष्यामीत्युक्तवति ब्रह्मचारिण्यथ
हाग्नयः शुश्रूषयावर्जिताः कारुण्याविष्टाः सन्तः समेत्यापि संभूयेतरेतरमूचुरुक्तवन्तः हन्तेदानीमस्मै
ब्रह्मचारिणेऽस्मद्भक्ताय दुःखिताय तपस्विने श्रद्दधानाय सर्वे प्रब्रवाम ब्रह्मविद्यामित्येवं संप्रधार्य
तस्मै होचुरुक्तवन्तः प्राणो ब्रह्म कं ब्रह्म खं ब्रह्मेति। स होवाच ब्रह्मचारी विजानाम्यहं यद्भवद्भिरु
क्तं प्रसिद्धपदार्थकत्वाद्विजानाम्यहं प्राणो ब्रह्मेति। यस्मिन्सति जीवनं यदपगमे च न भवति तस्मि
न्वायुविशेषे लोके रूढोऽतोऽसौ युक्तं ब्रह्मत्वं तस्य तेन प्रसिद्धपदार्थत्वाद्विजानाम्येवं यत्प्राणो
२१५ ब्रह्मेति कं च तु खं च तु न विजानामीति। ननु कंखंशब्दयोरपि सुखाकाशविषयत्वेन प्रसिद्धपदार्थ
कत्वमेव कस्माद्ब्रह्मचारिणोऽज्ञानं नूनं सुखस्य कंशब्दवाच्यस्य क्षणप्रध्वंसित्वात् खंशब्दवा
च्यस्य चाकाशस्याऽचेतनस्य कथं ब्रह्मत्वमिति मन्यते। कथं च भगवतां वाक्यमप्रमाणं स्यादित्यतो
न विजानामीत्याह। तमेवमुक्तवन्तं ब्रह्मचारिणं ते हाग्नय ऊचुर्यद्वाव यदेवं वयं कमवोचाम तदेव खमा
काशमित्येवं खेन विशेष्यमाणं कं विषयेन्द्रियसंयोगजात्सुखान्निवर्तितं स्यात्। नीलेनेव विशेष्य
माणमुत्पलं रक्तादिभ्यो यदेव खमित्याकाशमवोचाम तदेव च कं सुखमिति जानीह्येवं च सुखे
न विशेष्यमाणं खं लौकिकादचेतनात्खान्निवर्तितं स्यान्नीलोत्पलवदेव सुखमाकाशस्थं नेत
रल्लौकिकं आकाशं सुखाश्रयं नेतरल्लौकिकमित्यर्थः। नन्वाकाशं चेत्सुखेन विशेषयितुमिष्ट
मस्त्वन्यतरदेव विशेषणं यद्वा कं तदेव खमित्यतिरिक्तमितरद्वा यदेव खं तदेव कमिति पूर्ववि
शेषणं वा। ननु सुखाकाशयोरुभयोरपि लोके किं कंसुखाकाशार्थयोर्व्यावृत्तिरिष्टेत्यवोचाम सु

खेना॥काशोविशेषितेव्याचक्तिरुभयोरर्थप्राप्तैवेतिचेत्सत्यमेवं किंतुसुखेनविशेषितस्यैवाकाशस्य
ध्येयत्वंविवक्षितंनत्वाकाशेकाशगुणविशेषणस्यसुखस्यध्येयत्वंविहितंस्यादितिविशेषणोपादानस्य
विशेष्यनियंत्रत्वेनैकपदत्वयादतः खेनसुखमपिविशेष्यतेध्येयत्वाय कुतश्चैतन्निश्चीयते कंशब्दस्या
पिब्रह्मत्वाद्संबंधात्कंब्रह्मेति। यदिहिसुखगुणविशिष्टस्यखस्यध्येयत्वंविवक्षितंस्यात्कंखं अ. ४
ब्रह्मेति। ब्रूयुरग्नयः प्रथमं न चैवमुक्तवंतः किंतर्हि कंब्रह्म खंब्रह्मेति अतो ब्रह्मचारिणो मोहाय
नयनाय कंखंशब्दयोरितरेतरविशेषणविशेष्यत्वनिर्देशो युक्त एव। यद्वाव कमित्यादिस्तद्वेतदर्शि
त्रि तैरुक्तं वचस्य समर्थयाय श्रुतिराह। प्राणं च हास्मै ब्रह्मचारिणे तस्याकाशस्तदाकाशं प्राणस्य संबं
ध्याश्रयत्वेन हार्दाकाशमित्यर्थः सुखगुणवत्त्वनिर्देशात्तं चाकाशं सुखगुणविशिष्टं ब्रह्म तत्स्थं च
प्राणं ब्रह्मसंपर्कादेव ब्रह्मेत्युभयं प्राणं चाकाशं च समुच्चित्य ब्रह्मणी ऊचुरग्नय इति संभूयाग्नयो ६
ब्रह्मचारिणे ब्रह्मोक्तवंतो ऽनंतरं प्रत्येकं स्वविषयां विद्यां वक्तुमारेभिरे॥ ॥अथ हैनं ब्रह्मचा
रिणं गार्हपत्योऽग्निरनुशशास पृथिव्यग्निरन्नमादित्य इति ममैताश्चतस्रस्तनवस्त
त्रय आदित्ये एष पुरुषो दृश्यते सोऽहमस्मि गार्हपत्योऽग्निर्यश्च गार्हपत्योऽग्निः स एवाहमादित्ये पुरुषो
ऽस्मीति पुनः पौराणस्य स एवास्मि स एवास्मीति वचनात्पृथिव्यन्नयोरविलोग्यज्यत्वलक्षणयोः संबंधो न गार्हप
त्यादित्ययोरन्नत्वपक्तृत्वप्रकाशकत्वधर्मा अविशिष्टा इत्यत एकत्वमेवावयोरित्येतं पृथिव्यं ३४।
न्नयोस्तु भोग्यत्वेनावाप्यां संबंधः स यः कश्चिदेतं यथोक्तं गार्हपत्यमग्निमन्नान्नादत्वेन चतुर्धा प्र
विभक्तमुपास्ते सोऽपहते विनाशयति पापकृत्यां पापं कर्म लोकी लोकवांश्चास्मदीयेन लोकेनाग्नेयेन

तद्वान्भवति यथा वयमिह च लोके सर्वं वर्षशतं तु आयुरेति प्राप्नोति ज्योग्जु उज्ज्वलं जीवति नाऽवख्यातः इत्येतत्
न चास्यावरपुरुषास्तेषु नैरूप्यमस्य विदुषः संततिजा इत्यर्थः। न क्षीयंते संतत्युच्छेदो न भवतीत्यर्थः। किं
च तं वयमुपभुंजामहे यमः पालयामोऽस्मिंश्च लोके जीवंतममुष्मिंश्च परलोके य एतमेवं विद्वानुपास्ते यथोक्त
मेवास्यैतत्फलमित्यर्थः॥ ॥अथ हैनमन्वाहार्यपचनोऽनुशशास दक्षिणाग्निरापो दिशो नक्षत्राणि
चंद्रमा इत्येतानि मम चतस्रस्तनवश्चतस्रोऽहमन्वाहार्यपचन आत्मानं प्रविभज्यावस्थितस्तत्र य एष
चंद्रमसि पुरुषो दृश्यते सोऽहमस्मि स एवाहमस्मीति पूर्ववदन्नसंबंधाज्ज्योतिष्ट्वसामान्याच्चान्वा
हार्यपचनचंद्रमसोरेकत्वं दक्षिणादिक्संबंधाच्चापामन्ननक्षत्राणां च पूर्ववदन्नत्वेनैव संबंधो नक्षत्राणां
चंद्रमसो भोग्यत्वप्रसिद्धेरपामन्नोत्पादकत्वादन्नत्वं दक्षिणाग्नेः पृथिवीवद्गार्हपत्यस्य समा
नमन्यत्। अथ हैनमाहवनीयोऽनुशशास प्राण आकाशो द्यौर्विद्युदिति मम चतस्रस्तनवो य
एष विद्युति पुरुषो दृश्यते सोऽहमस्मीत्यादि पूर्ववत् सामान्याद्दिवाकाशयोराश्रयविषयत्वाच्चाद्विद्यु
दाहवनीययोः स्वर्ग्यत्वेन संबंधः समानमन्यत्॥ ।एते पुनः संभूयोचुः हे उपकोसलैषा सो
म्य तेऽस्मद्विद्याऽग्निविद्येत्यर्थः। आत्मविद्या पूर्वोक्ता प्राणो ब्रह्म कं ब्रह्म खं ब्रह्मेति आचार्यस्तु ते
गतिं वक्ता विद्याफलप्राप्तये इत्युक्त्वोपरेमुरग्नयः। आजगाम हास्याचार्यः कालेन तं च शिष्यमा
चार्योऽभ्युवादोपकोसला इति स भगव इति प्रतिशुश्राव ब्रह्मविद इव सोम्य ते मुखं प्रसन्नं भाति को
नु त्वानुशशासेत्युक्तः प्रत्याह को नु मानुशिष्यादनुशासनं कुर्याद्भो भगवस्त्वयि प्रोषित इति हाप
ह्नुवन्निह्नुते पनिह्नुत इवेति व्यवहितेन संबंधो। न चापनिह्नुते नन्वयथावदग्निभिरुक्तं ब्रवीतीत्यतिप्रा
यः। कथमिमेऽग्नयो मया परिचरिता उक्तवंतोऽनूनं यतस्त्वां दृष्ट्वा वेपमाना इव दृश्यंते पूर्वमन्यादृ

श्री

न्नाः संत इतीहाग्नीनभ्युदे ऽभ्युक्तवान् कोऽग्नीन्दर्शयन् किंतु सोम्य किल ते तुभ्यमवोचन्नग्नय इति
पृष्ट इति एवमिदमुक्तवंत इत्येवं ह प्रतिजज्ञे प्रतिज्ञातवान् प्रतीकमात्रं किंचिन्न सर्वं यथोक्तमग्निभिरु
क्तमवोचद्यत आहाचार्यः लोकान्वाव पृथिव्यादीन्हे सोम्य किल तेऽवोचन्न ब्रह्म साकल्येनाहं तु ते
त्वं तद्ब्रह्म यदिच्छसि त्वं श्रोतुं तद्वक्ष्यामि शृणु। तस्य मयोच्यमानस्य ब्रह्मणो ज्ञानमाहात्म्यं। यथा पुष्क
रपलाश आपो न श्लिष्यंत एवं यथावक्ष्यामि ब्रह्मैवंविदि पापं कर्म न श्लिष्यते न संबध्यत इति। ए
वमुक्तवत्याचार्ये आहोपकोसलो ब्रवीतु मे भगवानिति तस्मै होवाचाचार्यः॥ ॥य एषोऽक्षिणि पु
रुषो दृश्यते निवृत्तचक्षुर्भिर्ब्रह्मचर्यादिसाधनसंपन्नैः शांतैर्विवेकिभिर्दृष्टुर्दृष्टा चक्षुषश्चक्षुरिति हि श्रु
त्यंतरान्न चैवं शिष्टकं विलक्षणं यत आचार्यस्योक्ते गतिं वक्तेति गतिमात्रस्योक्तेरित्यवोचन्न स विद्याद्विषयाप
रिज्ञानं वाग्नीनां नैष दोषः सुखाकाशस्यैवाक्षिणि दृश्यत इति दृष्टुरनुवादात् एष आत्मा प्राणिनामिति
होवाचैवमुक्तवानेतद्यदेवामृतमभयमेतद्ब्रह्म अमरणधर्मि अविनाशि अत एवाभयं यस्य हि विना
शाशंका तस्यास्योपपत्तिः शंका तस्याभयोपपत्तिस्तदसौ वादस्य मत एवैतद्ब्रह्म बृहदनंतमिति। किं चा
स्य ब्रह्मणोऽक्षिपुरुषस्य माहात्म्यं तत्तत्र पुरुषस्य स्थाने अक्षिणि यद्यपि सर्पिर्वोदकं वाभिषिंचंति वर्त्मनी
एव गच्छति न चक्षुषा संबध्यते पद्मपत्रेणैवोदकं। स्थानस्याप्येतन्माहात्म्यं। किं पुनः स्थानिनोऽक्षि
पुरुषस्य निरंजनत्वं वक्तव्यमित्यभिप्रायः। एवं तं यथोक्तं पुरुषं संयद्वाम इत्याचक्षते। कस्माद्यस्मादेतं स ३५॥
र्वाणि वामानि क... वननीयानि संभजनीयानि शोभनान्यभिसंयंत्यभिसंगच्छंत्यतः संयद्वामेति। तथैवं
विदमेनं सर्वाणि ...णि वामान्यभिसंयंति य एवं वेद। एष उ एव वामनीर्यस्मादेष हि सर्वाणि वामानि पुण्यक
र्मफलानि ... पुण्यानुरूपं प्राणिभ्यो नयति प्रापयति वहति चात्मधर्मत्वेन विदुषः फले स

ति

र्वाणि वामानि नयति य एवं वेद। एष उ एव भामनीरेष हि यस्मात्सर्वेषु लोकेष्वादित्यचंद्राग्न्यादिरूपैर्भाति दीप्यते। तस्य
भासा सर्वमिदं विभातीत्यतो भामानि नयतीति भामनीः। य एवं वेदासावपि सर्वेषु लोकेषु भात्यथेदानीं य
थोक्तब्रह्मविदो गतिरुच्यते यद्यदि च यद्वास्मिन्नेवंविदि श्व्यं शवकर्म मृते कुर्वंति यदि च न कुर्वन्त्यृत्विजः सर्वथा
प्येवंविन्न तेन शवकर्मणाऽकृतेन नापि प्रतिबंधेन ब्रह्म प्राप्नोति न च कृतेन शवकर्मणास्य कश्चनाप्यधिको लोकः
न कर्मणा वर्धते नो कनीयानिति श्रुत्यंतरात् शवकर्मण्यनादरं दर्शयन् विद्यां स्तौति न पुनः शवकर्मैवंविदो न कर्तव्य
मित्य क्रियमाणेपि शवकर्मणि कर्मणां फलारंभे प्रतिबंधः कश्चिदभिप्रेयतेऽन्यत्र यत इह विद्याफलारंभकाले
ले शवकर्म स्याद्वा न वेति विद्यावतोऽप्रतिबंधेन फलं तदारंभं संदर्शयति। ये सुखाकाशमक्षिस्थं संयद्वामो वाम
नीर्भामनीरित्येवंगुणमुपासते प्राणसहितामग्न्यादिविद्यां च तेषामन्यत्कर्म भवतु वा मा वाभूत् सर्वथापि तेऽर्चि
वं षमेवार्चिरभिमानिनीं देवतामभिसंभवंति प्रतिपद्यंत इत्यर्थः। अर्चिर्देवताया अह्न अहरभिमानिनीं देवता
मह्न आपूर्यमाणपक्षं शुक्लपक्षदेवतामापूर्यमाणपक्षाद्यान्षण्मासानुदङ्ङुत्तरां दिशमेति सविता तान्मासानुत्त
रायणदेवतां तेभ्यो मासेभ्यः संवत्सरं संवत्सरदेवतां ततः संवत्सरादादित्यमादित्याच्चंद्रमसं [redacted]ंद्रमसो वि
द्युतं तत्र स्थांस्तान्पुरुषः कश्चिद्ब्रह्मलोकादेत्यामानवो मानवी सृष्टिर्भवो मानवो न मानवोऽमानवः स
पुरुष एनान्ब्रह्म सत्यलोकं गमयति गंतृगंतव्यगमयितृत्वव्यपदेशेभ्यः सन्मात्रब्रह्मप्राप्तौ तदनुपपत्ते
ब्रह्मैव सन्ब्रह्माप्येतीति चैवं वक्तुं न्याय्यं। सर्वभेदनिरासेन सन्मात्रप्रतिपत्तिं वक्ष्यति। न चादृष्टो मार्गो ग
मनायोपतिष्ठते स एनमविदितो न भुनक्तीति श्रुत्यंतरात् देवपथो देवैरर्चिरादिभिर्गमयितृ
त्वेनाधिकृतैरुपलक्षितः पंथा देवपथ उच्यते ब्रह्म गंतव्यं तेन चोपलक्षित इति ब्रह्मपथः। एतेन प्रतिपद्य
मानां गच्छंतीति ब्रह्म इमं मानवं मनुसंबंधिनं मनोः सृष्टिलक्षणमावर्तं नावर्तंते आवर्तंतेऽस्मिन्जननमर

णत्वबंधचक्रारूढघटीयंत्रवत्पुनःपुनरित्यावर्त्तंतेसमावर्त्तंतन्नप्रतिपद्यंतेनावर्त्तंतइतिद्विरुक्तिःसफलाया
विद्यायाःपरिसमाप्तिप्रदर्शनार्था॥ ॥रहस्यप्रकरणेप्रसंगादारण्यकत्वसामान्याच्च यज्ञेक्षतउत्पन्नेव्याहृ
तयःप्रायश्चित्तार्थाविधातव्यास्तदभिज्ञस्यचर्त्विजोब्रह्मणोमौनमित्यतइदमारभ्यते एषहवैएषवायुर्योयं
पवतेअयंयज्ञोहवैइतिप्रसिद्धार्थावद्योतकौनिपातौवायुप्रतिष्ठोहियज्ञःप्रसिद्धःश्रुतिषुस्वाहावातेधा अयंवैयज्ञो स्या
योऽयंपवतइत्यादिश्रुतिभ्यः॥वातएवहिचलनात्मकत्वात्क्रियायाःसमवायी वातएवयज्ञस्यारंभकोवातः
प्रतिष्ठेतिचश्रवणादेषहयन्गच्छंश्चलन्निदंसर्वंजगत्पुनातिपावयतिशोधयतिनह्यचलतःशुद्धिरस्तिदो
षनिरसनंहिचलतोदृष्टंनस्थिरस्ययद्यस्माच्चयन्नेषइदंसर्वंपुनातितस्मादेषएवयज्ञोयत्पुनातीति।
तस्यास्यैवंविशिष्टस्ययज्ञस्यवाक्चमंत्रोच्चारणेव्यापृतामनश्चयथाभूतार्थज्ञानेव्यापृतंतेएतेवाङ्मन
सीवर्त्तनीमार्गौयाभ्यांवर्त्तनीभ्यांयज्ञस्तायमानःप्रवर्त्ततेतेवर्त्तनीप्राणापानपरिचलनवत्याहिवाचश्चि
त्तस्यचोत्तरोत्तरक्रमोयद्यज्ञइतिहिश्रुत्यंतरमतोवाङ्मनसाभ्यांयज्ञोवर्त्ततइतिवाङ्मनसेवर्त्त
नीउच्येतेयज्ञस्यतयोर्वर्त्तन्योरन्यतरांवर्त्तनींमनसाविवेकविज्ञानवतासंस्करोतिब्रह्मर्त्विग्वाचावर्त्तन्या
होताध्वर्युरुद्गातेत्येतेत्रयोप्यृत्विजोन्यतरांवाग्लक्षणांवर्त्तनींवाचैवसंस्कुर्वंतितत्रैवंसतिवाङ्मनसेवर्त्त
५ उं धौ नीसंस्कार्येयज्ञेसब्रह्मायत्रयज्ञेयस्मिन्कालेउपाकृतेप्रारब्धेप्रातरनुवाकेशस्त्रेपुरापूर्वंपरिधानीया
याऋचोब्रह्मैतस्मिन्नंतरेकालेव्यवदतिमौनंपरित्यजतियदितदान्यतरामेववाग्वर्त्तनींसंस्कुर्वंतिब्र स्रो
ह्मणासंस्क्रियमाणामनोवर्त्तनीहीयतेविनश्यतिछिद्रीभवत्यन्यतरासयज्ञोवाग्वर्त्तन्यैवान्यतरयावर्त्ति ष्क्षा
तुमशक्नुवन्रिष्यतिकथमित्याहसयथैकपात्पुरुषोव्रजन्गच्छन्नध्वानंरिष्यतिरथोवाएकेनचक्रे उ.ध॥
णवर्त्तमानोगच्छन्रिष्यत्येवमस्ययजमानस्यकुब्रह्मर्त्विग्यज्ञोरिष्यतिविनश्यतियज्ञंरिष्यंतंयजमानोनुरि

तै २

ष्यति यज्ञप्राणो हि यजमानो ऽतो सुतरां यज्ञरेषे रेषस्तस्य स तं सुभिक्षुनाद्वारां पापीयान्पापतरो भवत्यथ पुनर्यो
त्र ब्रह्मा विद्वान्मौनं परिगृह्य वाग्विसर्गमकुर्वन्वर्त्तते यावत्परिधानीयायाजान्यवं इति तथैवं सर्वेऽत्रर्त्विजः स ए
व वर्त्तनीयं संस्कुर्वंति न ह्रीयतेन्यतरापि किमित्यत आह । पूर्वोक्तविपरीतो दृष्टांतः एवमस्य पद्भ्यः सुवर्त्तनी स्यं
वर्त्तमानः प्रतितिष्ठति रथो वा ऽस्मिनो ऽविनश्यद्वर्त्तते यथा यज्ञं प्रतितिष्ठंतं यजमानोनुप्रतितिष्ठति स यजमा
न एवं मौनविज्ञानवद्ब्रह्मोपेतं यज्ञमिष्ट्वा श्रेयान्भवति श्रेष्ठो भवतीत्यर्थः ॥ ॥ अत्र ब्रह्मणो मौनं विहितं अथ त
या द्भंगेन्यस्मिंस्मिंश्च होत्रादिकमरेषे व्याहृतिहोमः प्रायश्चित्तमिति तदर्थं व्याहृतयो विधातव्या इत्यत आह प्रजाप
तिर्लोकानभ्यतपल्लोकानुद्दिश्य तत्सारजिघृक्षया ध्यानलक्षणं तपश्चचार तेषां तप्यमानानां लोकानां रसान्
सार रूपान्प्रावृहद् उपहृतवान्गृहीतवानित्यर्थः कान् अग्निं पृथिव्या वायुमंतरिक्षादादित्यं दिवः स पुनरप्येता अ
भ्यग्न्याद्यास्तिस्रो देवता उद्दिश्याभ्यतपत्ततोपि सारं रसं त्रयीं विद्यां जग्राह स एतां पुनरभ्यतपत्त्रयीं विद्यां तस्यां
तप्यमानायां रसं प्रावृहदिति व्याहृतीमृग्भ्यो जग्राह भुव इति यजुर्भ्यः स्वरिति व्याहृतिं सामभ्यः
एवं लोकदेववेदरसा महाव्याहृतयो यतस्ततस्त्रयज्ञीय ऋक्संबंधिन्यस्य यज्ञस्य संबंधाद् ऋग्भ्य इत्यर्थः यद्यृक्तः रेषं दि.
भूः स्वाहेति गार्हपत्ये जुहुयात् कुर्यात्तत्र प्रायश्चित्तिः । कथमृचामेव तदिति क्रियाविशेषणं रसेनर्चां वी
र्येणौजसा त्रयाणां यज्ञस्य ऋक्संबंधिनो यज्ञस्य विरिष्टं क्षतरूपमुल्वणं संदधाति प्रतिसंधत्ते अथ यदि यजु
ष्टो यज्ञनिमित्तो रेषः भुवः स्वाहेति दक्षिणाग्नौ जुहुयात्तथा सामनिमित्ते रेषे स्वः स्वाहेत्याहवनीये जुहु
यात्तथा पूर्ववद्यज्ञं संदधाति । ब्रह्मनिमित्ते रेषे त्रिवर्गैरग्निषु तिस्र आहुतीर्जुहुयात् व्याहृतिविधायाः सा
रस्य प्रयोजनं ब्रह्मत्वमित्यनयैव त्रय्या विद्ययेति श्रुतेः न्यायेऽतरं वा मृग्यं ब्रह्मत्वं निमित्ते रेषे तद्यथा ल
वणेन सुवर्णं संदध्यात् क्षारेण टंकणादिना खलु सुवर्णं कुर्यात् । कारणं हि तत्सुवर्णं नरं जसीतमवधात्संधा
नं संदध्यात् कृतेन तथा त्रपु त्रपुणा सीसं सीसेन लोहं लोहेन दारु दारु चर्मणा चर्म बंधनेनैवमेषां लो

तथा चासिति ६

प ४

कामानां मासां देवता । नामस्या त्रय्या विद्याया वीर्येण रसाख्येनोजसा यज्ञं विरिष्टं संदधाति भेषजकृतो ह वा
एष यज्ञो रोगार्त इव पुरुषश्चिकित्सकेन सुशिक्षितेन एष यज्ञो भवति । कोऽसौ यत्र यस्मिन्यज्ञे एवंविद्यथोक्तकर्म
व्याहृतिहोमप्रायश्चित्तविद्ब्रह्मर्त्विक् भवति स यज्ञ इत्यर्थः । किंच एष ह वा उदक्प्रवण उदङ्निम्नो दक्षिणो
श्रेयो यज्ञो भवति उत्तरमार्गप्रतिपत्तिहेतुरित्यर्थः । यत्रैवंविद्ब्रह्मा भवति एवंविदं ह वै ब्रह्माणमृत्विजं प्रत्येषानु
गाथा ब्रह्मस्तुतिपरा यतो यत आवर्तते कर्म प्रदेशात् ऋत्विजां यज्ञः क्षतीभवन् तत्र यज्ञस्य क्षतिरूपं प्रति
संदधाति प्रायश्चित्तेन गच्छति परिपालयतीत्येतत् मानवो ब्रह्मा मौनाचरणान्मननाद्वा ज्ञानवत्त्वादतो ब्रह्मै
वैक ऋत्विक् कुरून् कर्तॄन् योद्धॄनारूढानश्वा वडवा यथाभिरक्षति एवंविद्ध वै ब्रह्मा यज्ञं यजमानं सर्वांश्चर्त्विजोऽभिर
क्षति तत्कृतदोषापनयनाद्यत एवंविशिष्टो ब्रह्मा विद्वांस्तस्मादेवंविदमेव यथोक्तव्याहृत्यादिविदं ब्रह्माणं कुर्वीत नाने
वंविदं कदाचनेति द्विरभ्यासोऽध्यायपरिसमाप्त्यर्थः ॥ श्री ॥ गोविन्दभगवत्पूज्यपादशिष्यस्य परमहंसपरिव्राजका
चार्यस्य श्रीशंकरभगवतः कृतायां छान्दोग्योपनिषट्टीकायां चतुर्थः प्रपाठकः समाप्तः ॥ ॥ सगुणब्रह्मविद्यायां
उत्तरा गतिरुक्ता अथेदानीं पञ्चमेऽध्याये पञ्चाग्निविदो गृहस्थस्य ऊर्ध्वरेतसां च श्रद्धालूनां विद्यान्तरशीलिनां तामेव गति
मनूद्यान्या दक्षिणादिकसंबन्धिनी केवलकर्मिणां धूमादिलक्षणा पुनरावृत्तिरूपा तृतीया च ततः कष्टतरा संसा
रगतिर्वैराग्यहेतोर्वक्तव्येत्यारभ्यते । प्राणः श्रेष्ठो वागादिभ्यः प्राणो वाव संवर्गः प्राणो ब्रह्म प्राण आकाशः इत्यादि
बहुशोऽतीतेऽतीते ग्रन्थे प्राणग्रहणं कृतं स कथं श्रेष्ठो वागादिषु सर्वैः संहत्यकारित्वाविशेषे कथं च तस्योपासन
मिति तस्य श्रेष्ठतादिगुणविविदिषया इदमनन्तरमारभ्यते ॥ यो ह वै ज्येष्ठं च प्रथमं वयसा श्रेष्ठं च गुणैरभ्यधि ॥३१॥
कं वेद स ज्येष्ठश्च ह वै श्रेष्ठश्च भवति फलेन पुरुषं प्रलोभ्याभिमुखीकृत्याह । प्राणो वाव ज्येष्ठश्च वयसा वा
गादिभ्यो गर्भस्थेऽपि पुरुषे प्राणस्य वृत्तिर्वागादिभ्यः पूर्वं लब्धात्मिका भवति यया गर्भो विवर्धते चक्षुरादिस्थाना
वयवनिष्पत्तौ सत्यां पश्चाद्वागादीनां वृत्तिलाभ इति प्राणो ज्येष्ठो वयसा भवति श्रेष्ठत्वं तु प्रतिपादयिष्यति सुह

इत्यादिनिदर्शनेनातः प्राण एव ज्येष्ठश्च श्रेष्ठश्चास्मिन्कार्यकारणसंघाते यो ह वै वसिष्ठं वसिष्ठतममाच्छादयितृ
तमं वसुमत्तमं वा यो वेद स तथैव वसिष्ठो ह भवति स्वानां ज्ञातीनां कस्तर्हि वसिष्ठ इत्याह । वाग्वाव वसिष्ठो वा
ग्मिनो हि पुरुषाः वसंत्यभिभवंत्यन्यान्वसुमत्तमाश्चातो वाग्वसिष्ठो यो ह वै प्रतिष्ठां वेद स चास्मिंल्लोके मुष्मिं
श्च परे प्रतितिष्ठति ह का तर्हि प्रतिष्ठेत्याह । चक्षुर्वाव प्रतिष्ठा चक्षुषा हि पश्यन्समे च दुर्गे च प्रतितिष्ठति यस्मा
दतः प्रतिष्ठा चक्षुः यो ह वै संपदं वेद सं हास्मै दैवाश्च मानुषाश्च कामाः संपद्यंते ह का तर्हि संपदित्याह । श्रो
त्रं वाव संपद्यस्माच्छ्रोत्रेण वेदा गृह्यंते तदर्थविज्ञानं च ततः कर्माणि क्रियंते ततः कामसंपदित्येवं कामसं
पद्धेतुत्वाच्छ्रोत्रं वाव संपद्यो ह वा आयतनं वेदायतनं ह स्वानां भवत्याश्रयो भवतीत्यर्थः किं तदाय
तनमित्याह । मनो ह वा आयतनमिंद्रियोपहृतानां विषयाणां भोक्त्रर्थानां प्रत्ययरूपाणां मन आयतनमा
श्रयोऽतो मनो ह वा आयतनमित्युक्तं ॥ अथ ह प्राणा एवं यथोक्तगुणाः संतोऽहंश्रेयसि अहं श्रेयानस्म्यहं श्रेयान
ना। स्मीत्येतस्मिन्प्रयोजने व्यूदिरे नाना विरुद्धं वादिरुक्तवंतस्ते हैवं विवदमाना आत्मनः श्रेष्ठताविज्ञानाय
प्रजापतिं पितरं जनयितारं कंचिदेत्योचुरुक्तवंतः हे भगवन्को नोऽस्माकं मध्ये श्रेष्ठोऽभ्यधिको गुणैरित्ये
वं पृष्टवंतः तान्पिता ह उवाच यस्मिन्वो युष्माकं मध्ये उत्क्रांते शरीरमिदं पापिष्ठमेवातिशयेन जीवतोपि
समुत्क्रांतप्राणं ततोपि पापिष्ठतरमेवातिशयेन दृश्येत कुणपमस्पृश्यमशुचि दृश्येत स वो युष्माकं श्रेष्ठ इ
त्यवोचत्काक्वा तद्दुःखं परिजिहीर्षुस्ततो हैवमुक्तेषु पितृप्रोक्तेषु सा ह वागुच्चक्रामोत्क्रांतवती सा चोत्क्रम्य
संवत्सरमात्रं प्रोष्य स्वव्यापारान्निवृत्ता सती पुनः पर्येत्येतरान्प्राणानुवाच कथं केन प्रकारेणाशकत शक्त
वंतः यूयं मदृते मां विना जीवितुं धारयितुमात्मानमिति ते होचुर्यथा कला इत्यादि कला मूका लोकेऽव

दंतोवावलुविंतिकथंप्राणाः प्राणेनपश्यंतश्चक्षुषाश्रृण्वंतः श्रोत्रेणध्यायंतोमनसा सर्वंकरणचेष्टां
कुर्वंतइत्यर्थः एवंवयमजीविष्मइत्यर्थः। आत्मनोऽश्रेष्ठतांप्राणेषुबुध्वाप्रविवेशहश्रोत्रं वाक्पुनःस्वव्या
पारेषुप्रवृत्ताबभूवेत्यर्थः समानमन्यच्चक्षुर्होच्चक्रामश्रोत्रंहोच्चक्राममनोहोच्चक्रामेत्यादिपर्यायवाक्या
अमनसोऽप्ररूढमनसइत्यर्थः। एवंपरीक्षितेषुवागादिषुअथानंतरंसमुख्यः प्राणउच्चिक्रमिषन्तुरं
ग्रंस्तुमिलन्किमकरोदित्युच्यते यथालोकेसुहयः शोभनोऽश्वः पड्वीशशंकून्पादबंधनकीलकान्प
रीक्षणायारूढेनकशयाहतः। सौसंखिदेत्समुत्खनेत्उत्पाटयेदेवमितरान्वागादीन्प्राणान्स
मखिदत्समुद्धृतवांस्तेप्राणाः संचालिताः संतः स्वस्वस्थानेस्थातुमनुत्सहमानाअभिसमेत्यमुख्यंप्रा
णंतमूचुर्हेभगवन्नेधिभगवान्नःस्वामीयस्मात्त्वंनोऽस्माकंश्रेष्ठोसिमाचास्माद्देहादुत्क्रमीरिति। अ
थहैनंवागादयः प्राणस्यश्रेष्ठतांकार्येणापादयंत आहुर्बलिमिवहरंतोराज्ञेविशः। कथंवाक्ताव
दुवाच यदहंवसिष्ठास्मियदितिक्रियाविशेषणंयत्ववसिष्ठश्चगुणास्मीत्यर्थः त्वंतद्वसिष्ठोसितेन
वसिष्ठश्चगुणेनत्वंवसिष्ठोसितद्गुणस्त्वमित्यर्थः। अथवातच्छब्दोपिक्रियाविशेषणंएवचक्षुरुतस्त्वमि
त्यर्थः। अथवातच्छब्दोपिक्रियाविशेषणंखेतच्चक्षुरुतत्वदीयोसौवसिष्ठश्चगुणोऽहमात्ममेतिमया
लिमतइत्येतत्तथाश्रोत्रंचक्षुर्योऽयंचक्षुःश्रोत्रमनःसु ॐ तेरिदंवचःसाक्रमितिदंवागादिषुमुख्यंप्रा
णंप्रत्यलिप्तितंयस्मान्नवैलोकेवाचोनचक्षूंषिनश्रोत्राणिनमनांसीतिवागादीनिकरणान्या ॥३८॥
चक्षतेलौकिकाआगमज्ञावाकिंतर्हिप्राणाइत्येवाचक्षतेकथयंतियस्मात्प्राणोह्येवैतानिसर्वाणि
वागादीनिकरणजातानिभवंतिअतोमुख्यंप्राणंप्रत्यनुरूपमेववागादिभिरुक्तमितिप्रकरणार्थः

उपपद्यत इति ।ननु कथमिदं युक्तं चेतनावंत इव पुरुषा अहंश्रेयसे विवदंतोन्योन्यं स्पर्धेयुरिति।
नहि चक्षुरादीनां वाग्व्यपेक्ष्य प्रत्येकं वदनं संभवति तथाऽपगमो देहात् पुनः प्रवेशो ब्रह्मगमनं प्रा
णस्तुतिर्वोपपद्यते। तत्राग्न्यादिचेतनावद्देवताधिष्ठितत्वाद्वागादीनां चेतनावत्त्वं तावत्सिद्धं। आग
मतः तार्किकैः क समयविरोध इति चेद्देहस्यैकस्मिन्ननेकचेतनावत्त्वेनेश्वरस्य निमित्तकारणत्वा
भ्युपगमाद्येतावदीश्वरस्याभ्युपगच्छंतीति। किं कास्ति मनआदिकार्यकरणानामाध्यात्मिकानां बाह्या
नां च पृथिव्यादीनां ईश्वराधिष्ठितानामेव नियमेन प्रवृत्तिर्भवतीति तथा देवता अस्माभिरग्न्या
द्याश्चेतनावत्योपि देवता आध्यात्मिकेषु करणेष्वभ्युपगम्यंते। किं तर्हि कार्यकरणवतीनां हिता सांज्ञाणे
लौकिकदेवतानामध्यात्माधिष्ठितानि देवसंघकोटिविकल्पानामध्यक्षतामात्रेण नियंतेश्वरोऽभ्युप
गम्यते। सत्यकरणोऽपाणिपादो जवनो ग्रहीता पश्यत्यचक्षुः स शृणोत्यकर्ण इत्यादिमंत्रवर्णा
द्धिरण्यगर्भं पश्यत जायमानं हिरण्यगर्भं जनयामास पूर्वमित्यादिवच्चेतनश्चरीयाः पठंति
लोकाः कर्मफलसंबंधी ह देहे तद्विलक्षणो जीव इति विद्यामो वागादीनां चेह संवादः कल्पितो विद्व
षोऽन्वयव्यतिरेकाभ्यां प्राणश्रेष्ठतानिर्धारणार्थं। यथा लोके पुरुषा अन्योन्यमात्मनः श्रेष्ठतां
ये विवदमानाः कंचिद्विद्वांसमुपासाद्य पृच्छंति को नः श्रेष्ठो गुणैरिति तेनोक्ता वा एकैकल्पनेनादः
कार्यं साधयितुं घटत येनादः कार्यं साध्यते स वः श्रेष्ठ इत्युक्तास्तथैवोद्यक्तं तत्र आत्मनोन्यस्य श्रैष्ठ्यं
वा श्रेष्ठतां निर्धारयंति तथेमं संव्यवहारं वागादिषु कल्पितवती श्रुतिः। कथं नाम विरुद्धान्वागादीना

मथुनीमग्रहणमितित्रिःपदंनामानिइतिसर्वाचानामकः साहाद

मेवैकस्याःसाक्षेविजीवनंदृष्टंनतुप्राणस्येतिप्राणश्रेष्ठतांप्रतिपद्येवेति।तथाचश्रुतिः।कौषीतकिनां
जीवतिवागपेतोमूकान्हिपश्यामोजीवतिचक्षुरपेतोअन्धान्हिपश्यामोजीवतिश्रोत्रापेतोबधि
रान्हिपश्यामोजीवतिमनोपेतोबालान्हिपश्यामोजीवतिबाहुच्छिन्नोजीवत्युरुच्छिन्नइत्याद्या॥ ।।
सहोवाचमुख्यःप्राणःकिंमेन्नंभविष्यतीतिमुख्यंप्राणंप्रष्टारमिवकल्पयित्वा॥वागादीन्प्रतिवक्तॄनि
वकल्पयन्तःश्रुतिःपराहयत्किंचिदिदंलोकेन्नजातंप्रसिद्धमाश्वस्य:श्वालिःसहाद्याकुनित्यःसहन्ना
कुनिर्दिष्टसिःसर्वप्राणिनांयदन्नंतत्तवान्नमितिहसुर्वागादयइतिप्राणस्यसर्वमन्नंप्राणोत्तासर्वस्या
न्नस्यैवंप्रतिपत्त्यर्थकल्पितारव्यायिकारूपाद्याकृत्यस्वेनरूपेणाह।तद्वैएतदघ्वेकिंचिल्लोकेप्रा
णिभिरन्नमद्यतेतदन्नस्यप्राणिस्यतदन्नंप्राणेनैवतदद्यतेइत्यर्थः।सर्वप्रकारचेष्टाव्याप्तिगुणप्रद
र्शनार्थमनइतिप्राणस्यप्रत्यक्षंनाम'प्राक्उपसर्गपूर्वत्वेहिविशेषगतिरेवस्यात्तथायसर्वान्नाना
मत्तेतितस्मान्नेवंविदिहवैकिंचनाकिंचिदपिप्राणिभिराद्यंसर्वैरन्नंनन्नमनाद्यंनभवतिसर्वमेवंवि
दन्नंभवतीत्यर्थः।प्राणास्तत्वाद्विदुषः।प्राणादादरत्वदेतिप्राणेस्वमात्रीयत्वमेवंविदोहवाउ
दतिसूर्यःएवंविधस्तमात्ततिश्रुत्यंतरात्सहोवाचपुनःप्राणःपूर्ववदेवकल्पनाकिंमेवासोभविष्यत
त्यापइतिहोचुर्वागादयोयस्मात्प्राणस्यवासआपस्तस्माद्वाएतदशिष्यतोत्स्यालोद्यमानालुकर्व
तांघत्राह्मणाविद्वांसस्तत्कुर्वंतिकिमद्भिर्वासःस्थानीयाभिःपुरस्ताद्भोजनपूर्वकमुपरिष्टाच्चाद्यूसी ॥३५॥
डनातूर्ध्वंचपरिदधातिपरिधानंकुर्वंतिमुख्यस्यप्राणस्यलंभुकोलंभनग्नीलोवासोलभतिवाससो
लब्धैवलवतीत्यर्थः।अनग्नोहभवतिवासोलम्भुकत्वेनार्थसिद्धैवाग्नतेत्यनाग्नोभवतीत्युत्तरीय

स२

सियानंनं
हवैएवंवि
यथातृप्तिप्रा
णविदिप्राण
हमिमिसर्व
त्तात्मकेःसु
र्णिआनामें
गौए

वासोर्थी पूर्वमाचमनविधाने॰ तत्रानग्नतार्थं निधानेऽचमना स्यासिद्धः

वा न स्यादिति वासो ऽलंकुर्वीतेनार्थं सिद्धेवानग्नते नग्नोऽस्यवतीचकेत्येतद्वक्ष्यमाणस्य कुर्यादवतश्चयदाचमनं शुद्ध्यर्थं नि
श्रीतं तस्मिन्प्राणस्य वासइति दर्शनमात्रमिदं विधीयते अद्भिः परिदधातीति नाचमनांतरं यथालौकिके प्राणिशिरघ्राणान
मन्नं प्राणस्य विदत्तं नमात्रं तद्द्वि किं मेऽन्नं किं मे वास इत्यादिश्रीदिप्रश्नप्रतिवचनयोस्तत्त्वचाघ्राणाचमनमपूर्वं ता
दर्थ्येन क्रियेत तदा कृत्याघ्रान्नमात्रं तत्प्राणस्य तिलक्ष्यत्वेन विहितं स्यात् उँ तुल्ययोर्विज्ञानार्थयोः प्रश्नप्रतिवच
नयोः प्राक्करणस्य विज्ञानार्थत्वाद्वासोर्थं वासोदर्यजरतीयो न्यायो न युक्तः कल्पयितुं यद्यप्रतिसिद्धमाचमनं प्राय
त्यार्थं प्राणस्यानग्नतार्थं चेत्तदवतीत्युच्यते न तथा वयमाचमनमुत्पत्यार्थं ब्रूमः किंत प्रायत्यार्थाचमन
साधनत्वात्ताप्याः प्राणस्यवास इति दर्शनं चोद्यत इति ब्रूमस्तत्राचमनं स्यान्नग्नतार्थं च प्रसंगदोषचोदनानु
पपन्नाः वासोर्थे एवाचमने तद्दर्शनं स्यादिति चेन्न वासोज्ञानार्थे वाक्ये आचमनस्य तदर्थत्वमन्यार्थं वेतिप्र लं
माणाभावात्तदेतस्मात् प्राणदर्शनं स्तूयते कथं तद्वेत्प्राणदर्शनं सत्यकामो जाबालो गोश्रुतये नाम्ना वैयाघ्र
पद्याय व्याघ्रपदोपत्याय वैयाघ्रपद्यस्तस्मै गोश्रुतये उक्त्वापो वाचान्यदपि वक्ष्यमाणं वचः किं तद्वाचेत्या
ह यद्यप्येतच्छुष्काय स्थाणवे तद्दर्शनं ब्रूयात्प्राणविज्जायेरन्नस्य पघोरन्नेवाह्निन्स्थाणोः शाखाः प्ररोहेयुः पला
शानि पत्राणि किमु जीवते पुरुषाय ब्रूयादिति यथोक्त प्राणदर्शनविदेदं मंथाख्यं कर्मारभ्यते उपथा
नंतरं यदि महत्त्वं जिगमिषेत् तुमिच्छेन्महत्त्वप्राप्तिं यदि कामयेदित्यर्थस्तस्येदं कर्म विधीयते। महत्त्वे
हि सति श्रीरुपनमते श्रीमतो हि अर्थप्राप्तिघनं ततः कर्मानुष्ठानं ततश्च देवयानं पितृयाणं वा पंथानं प्रतिपत्स्य
त इत्येतत्प्रयोजनमुरीकृत्य महत्त्वं च प्रेप्सोरिदं कर्म न विषयोपभोगकामस्य तस्यायं कालादि विधिरुच्यते ऽ
मावास्यायां दीक्षित्वा उपसद्व्रती तद्वत् भूमिशयनादि नियमं कृत्वा तत् पौरूपंस ग्रवच नं ब्रह्मचर्यमित्यादिधर्मवा
न्हुत्वा त्यर्थानिष्टुद्देश्यमेवकर्मजातं सर्वमुपादत्ते तद्विकारत्वान्मंथकर्मणउपसद्व्रती त्युक्तं तरात्यया
मात्रास्तक्षणवस्तु द्विकारपंतभपन्नपादत्तेपोर्णमास्यां रात्रौ कर्मारभते सर्वौषधस्य ग्राम्यारण्यानामोष
धीनां यावच्छक्यं स्वल्पमल्पमुपादाय तद्विदुषी त्यात्मेवपिष्टं दधिमधुनोरौदुंबरे कंसाकारे चमसाकारे वा

पात्रेऽश्मं यंतराम्नद्दिपो पमथ्यायतः स्थापयित्वा ज्येष्ठाय श्रेष्ठाय स्वाहेत्यग्नावावसंसंध्ये आज्यस्यावापस्थाने
हुत्वा स्रुवलग्नं मथे संपातमवनयेत् संस्रवमधः पातयेत् समानमन्यत् ॥ वसिष्ठाय प्रतिष्ठायै संपदे आयतना
य स्वाहेति प्रत्येकं तथैव संपातमवनयेत् ॥ कु चाथ प्रतिसृप्यानेरीषदपसृत्यांजलौ मंथमाधाय जपति मंत्रं
मंत्रं अमो नामास्यमा हि ते ऽम इति प्राणस्य नामान्नेन हि प्राणः प्राणितीति देहस्य यतो मंथद्रव्यं प्राणस्यान्नत्वा
प्राणं चेन्नः स्तूयते ऽमो नामासीति कुतो यतो मा सहि यस्मात्ते तव प्राणभूतस्य व सर्वं समस्तं जगदिदम
मा ता ऽमो नामासीत्यर्थः । स हि प्राणभूतो मंथो ज्येष्ठः श्रेष्ठश्चात एव राजा दीप्तिमानधिपतिश्चाधिष्ठाय पालयिता
मा सर्वस्य सम्मो ऽमिति मंथः प्राणो ज्येष्ठ्यादिगुणभूगमात्मनेगमसि चाहं ममैवेदं सर्वं जगदसानिति वा निप्राणव
दिति द्वादशमंत्रपरिसमाप्त्यर्थौ थानंतरं खलु एतया वक्ष्यमाणयर्चा पच्छः पादशः आचामति भक्षयति मंत्रस्यैकैकेन
प्र पादेनैकैकं ग्रासं भक्षयति तद्भोजनं सवितुः सर्वस्य सवितुः प्राणमादित्यं चैकीकृत्योच्यते आदित्यस्य रूपीम
हि प्रार्थयेमहि मंथरूपं येनान्नेन सावित्रं पालोजनेनोपलक्षितेन वयं सवितृस्वरूपापं नात्मत्वमेत्य स्थिप्रायः ।
देवस्य सवितुः सवद्भूतिसर्वदेवासंबंधश्रेष्ठं घं घरशस्य तमं सर्वान्नेस्यः सर्वधातमं सर्वस्य जगतो धारयितृतमं मनति न
ध्यायेन विधानं तममिति द्वा सर्वथा भोजनदिवेषणं तु रं त्वरं तूर्णं भगो धीमित्येतद्भगस्य देवस्य संतुष्टौ महि विंतये रि
महि विनिष्टभोजनेन संस्कृताः शुद्धात्मानः संतः स्वरूपमिच्छ्यामि क्रियते अथवा भगस्य श्रियः कारणं महत्वंप्रा
शुकर्मकृतवं वातो वयं तद्रीमं महीति सर्वं च मंथालेपं च्य पिबति निर्णिज्य प्रक्षाल्य कंसं कंसाकारं चमसं चमसा
कारं चौडुंबरं पात्रं पीत्वा चाचम्य पश्चादग्नेः प्राक्शिराः संविशति चर्मणि वाजिने स्थंडिले केवलायां वा भूमौ वा ॥५०॥
यमो वाग्यतः संनित्यर्थो प्रसाद्धेन प्रसक्तेन तासिद्धयते क्रिया घ्रनिष्टस्वप्नदर्शनेन तु यथा तथा संयतचित्तः
संनित्यर्थः ॥ स एवंभूतो यदि स्त्रियं पश्येत् स्वप्नेषु तदा विद्यात्समृद्धं ममेदं भकर्मेति तदेतस्मिन्नर्थे एष
श्लोको मंत्रोऽपि भवति यदाकर्मसु काम्येषु कामार्थेषु स्त्रियं स्वप्नेषु स्वप्नदर्शनेषु स्वप्नकालेषु पश्यति समृ या
द्धिं तत्र जानीयात्कर्मणां फलनिष्पत्तिर्भविष्यतीति जानीयादित्यर्थस्तस्मिंस्त्रियादिप्रशस्तस्वप्नदर्शने सतीत्य
स्वरूपमिति शेषः

मन्चत्रिष्ट: पंपिभेत्युर्थ इत्युक्त: स आह ४

लिप्राय: द्विरुक्ति: कर्मसमाप्त्यर्था ॥ ॥ब्रह्मादिस्तंबपर्यंता: सांसारिगतयो वक्तव्या वैराग्यहेतोर्मुमुक्षूणामित्यत आ
आख्यायिकारभ्यते। श्वेतकेतुर्नामतः ह इत्यैतिह्यार्थः अरुणस्यापत्यमारुणिस्तस्यापत्यमारुणेयः पंचा
लानां जनपदानां समितिं सभामेयाय आजगाम तं गतवंतं ह प्रवाहणो नाम तो जीवलस्यापत्यं जैवलिरु
वाच हे कुमारानुशिष्टो चासि त्वं अनुशिष्टवानन्वशिष्टस्त्वा पिता किं त्वमनुशिष्टोऽसि भगव इति स पृष्टो ह। तं होवाच
यदनुशिष्टोऽसि कथय यदितोऽस्माल्लोकादूर्ध्वं यत्प्रजा प्रयंति यद्गच्छंतीति तत्किं जानीषे इत्यर्थो न भगव इत्याह। इतरो न जाने ह
तद्यच्छसि एवं तर्हि वेत्थ जानीषे यथा येन क्रमेण पुनरावर्तंते इति न भगव इति प्रत्याह वेत्थ यथासौ लोकः पितृसं
बंधियं प्राप्य पुनरावृत्ते वेत्थ पथोर्मार्गयोः सह प्रयाणयोर्देवयानस्य पितृयाणस्य च व्यावर्त्तनं वकुलिः प्रयद्धि न भूयसे पो
ति सैन भगव इत्याह। वेत्थ पथोर्मार्गयोः सह प्रयाणयोर्देवयानस्य पितृयाणस्य च व्यावर्त्तना व्यावर्तनमितरेतरवियोग
स्थानं सह गच्छतामित्यर्थः न भगव इति वेत्थ यथा येन क्रमेण पंचम्यां पंचसंख्याकायामाहुतौ हुतायामाहुतिनिर्वृत्ता आहु
तिसाधनाश्चापः पुरुषस्यैव वचसः पुरुषशब्दवाच्या लिखान्यासां हूयमानायां क्रमेण पंचम्यामाहुतौ हुतौ ता: पुरुषवचसः
पुरुषशब्दवाच्या भवंति पुरुषाख्यां लभंत इत्यर्थः। इत्युक्तो नैव भगव इत्याह। नैवाहमत्र किंचन जानामीत्यर्थः। अथैवमज्ञः स
न्किमनु ह मा त्वमनुशिष्टोऽस्मीत्यवोच अवोचथाः कथं वानस्मीसि यो हीमानि मया पृष्टानीत्यर्थः ज्ञातानि न विद्यात् न विजानीया
त्कथं स विद्वत्सु अनुशिष्टोऽस्मीति ब्रुवीतेत्येवं स श्वेतकेतू राज्ञा आयासितः सन् पितुरर्धं स्थानमेयाय गतवांस्तं च पि
तरमुवाचाननुशिष्यानुशासनमकृत्वैव मा मां किल भगवान् समावर्तनकाले अब्रवीत् उक्तवान् अनुशिष्टोऽसि इत्यन
नुशिष्य पंच मा इतियतः पंच पंचसंख्याकान्प्रश्नान् राजन्यबंधू राजन्या बंधवोऽस्येति राजन्यबंधुः स्वयं दुर्वृत्त इत्यर्थः अप्रा
क्षीत् पृष्टवांस्तेषां प्रश्नानां नैकंचन एकमपि नाशकं न शक्तवानहं विवक्तुं विवेचनेनार्थतो निर्णेतुमित्यर्थः। स होवाच
पिता यथा मा मां त्वं तदागतमात्रमेवैतान्प्रश्नानवदः कथितवानसि तेषां नैकंचनाशकं विवक्तुमिति। तथा अहं
जानीहि वेत्थ याज्ञानेन लिंगेन मम तद्विषयमज्ञानं जानीहीत्यर्थः। कथं यथाहमेषां प्रश्नानामेकंचन एकमपि न वे

दी।

इति यथा त्वं मे षां न जानीषे तथाहमप्येतान् न जानामीत्यर्थः अतो मय्यन्यथाभावो न कर्तव्यः कुत एतदेवं यतो १
हं न जानीयां यद्यहमिमान्प्रश्नान्वेदिष्यं विदितवानस्मि कथं वै ते तुभ्यं प्रियाय पुत्राय समावर्तनकाले पुरा
नावक्ष्यं नोक्तवानस्मि सः क्रुद्धः सह गौतमो गोत्रतो गौतमो राज्ञो जैबलेर्नरेन्द्रस्थानमेयाय गतवांस्तस्मै
ह गौतमाय प्राप्तायार्हामर्हणां चकार कृतवान् स च गौतमः कृतातिथ्यः उषित्वा परेद्युः प्रातःकाले स
भागे सभां गते राजन्युदेयाय तं ह उदयनं भागः पूजासेवा सह भागेन वर्तमानो वा स सभागः पूज्यमानोऽन्यैः स्वयं गौ
तमः उदेयाय राजानमुद्गतवांस्तं होवाच गौतमं राजा मानुषस्य भगवन्गौतम मनुष्यसंबंधिनो वित्तस्य ग्रामा
देर्वरं वरणीयं कामं वृणीथाः प्रार्थयेथाः स होवाच गौतम तवैव तिष्ठतु राजन्मानुषं वित्तं यामेव कु
मारस्य मम पुत्रस्यान्ते समीपे वाचं पंच प्रश्नलक्षणामभाषथा उक्तवानसि तामेव वाचं मे मह्यं ब्रूहि कथये
त्युक्तो गौतमेन राजा सह कृच्छ्री दुःखी बभूव कथं न्विदमिति स ह कृच्छ्रीभूतोऽप्रत्याख्येयं ब्राह्मणं मन्वानो न्या
येन विद्या वक्तव्येति मत्वा तं ह गौतमं चिरं दीर्घकालं वसेत्याज्ञापयांचकार। आज्ञप्तवान्यत्पूर्वं प्रत्याख्यातवान् स राजा
राजा विद्यां यच्च पश्चाच्चिरं वसेत्याज्ञप्तवान्तन्निमित्तं ब्राह्मणं क्षामयति हेतुवचनोक्त्या तं होवाच राजा सर्व
विद्यो ब्राह्मणोऽपि सन्न्यायेन प्रकारेण सामा ह गौतमावदस्त्वं तामेव विद्यां लक्षणां वाचं मे ब्रूहीति तथा
हं करिष्य इत्यर्थः। तत्रास्ति वक्तव्यं यथा येन प्रकारेणेयं विद्या प्राक् त्वत्तः पूर्वं ब्राह्मणान्न गच्छति न गतवती न
तीन ब्राह्मणा अनया विद्ययानुशिष्टवंतः स एतत्प्रसिद्धं लोके यतस्तस्मादु पुरा पूर्वं सर्वेषु लोकेषु क्षत्र
स्यैव क्षत्रजातेरेवानया विद्यया प्रशासनं प्रशास्तृत्वं शिष्याणामभूद्बभूव। क्षत्रियपरंपरयैवेयं विद्ये ४९॥
तावंतं कालमागता तथाप्यहमेतां तुभ्यं वक्ष्यामि च संप्रदानादूर्ध्वं ब्राह्मणान्गमिष्यति अतो मया युक्तं
क्तं तत्क्षंतुमर्हसीत्युक्त्वा तस्मै स होवाच विद्यां राजा। पंचम्यामाहुतावित्ययं प्रश्नः प्राथम्येन निर्णीयते क्रि
या४ पा१
ये३

× ततउक्रामतद्भूयास्येमेवपूर्ववद्दिवंतर्पयत ४

यतेयें तदपाकरणमन्वितरेषामपाकरणेन्वितरेषामपाकरणेमत्तुकृत्वंलवेदित्यग्निहोत्राहुत्योः कार्यारंसोयः उँ
सउक्रोयाजसनेयके। तं प्रतिप्रश्नाउक्रांतिराहुत्योर्गतिःप्रतिष्ठा तृप्तिः पुनरावृत्तिर्लोकंप्रत्युत्थायी तितेषां चापाकरणाहु
केतत्रैवतेवाएते आहुतीहुतेउक्रामतस्तेंतरिक्षमाविशतः तेंऽतरिक्षमेवाहवनीयंकुर्वातेवायुंसमिधंमरीचीरेव
शुक्रामेवं माहुतिंतेंतरिक्षंतर्पयतः स्तेततआवर्तेते इमामाविश्यतर्पयित्वापुरुषमाविश्यतस्तत्रियमाविश्य
लोकंप्रत्युत्थायीलवतीति तत्राग्निहोत्राहुत्योः कार्यारंलमात्रमेवंप्रकारंसूवतीत्युक्तमिलहुतं कार्यारंलम
ग्निहोत्रापूर्वेविपरिणामलक्षणंपंचधाप्रविश्याग्नित्वेनोपासनमुत्तरमार्गप्रतिपत्तिसाधनं विधित्सन्नाह
सोवावलोकइत्यादि।इहसायंप्रातरग्निहोत्राहुतीहुतेपयआदिसाधनेश्रद्धापुरःसरेआहवनीया
ग्निसमिद्धमार्चिरंगारविस्फुलिंगलाविलेककंहिकारकालीवितेचांतरिक्षंक्रमेणोक्रम्यद्युलोकंप्रविश्य
द्योस्थलमलंतेश्रद्धाहुत्वास्याश्रद्धात्वेचाद्भश्रद्धाचाहृवाचोक्तयोऽरथिकरणोग्निरन्यत्र्तसंबद्धस मिदादित्यो
साधमवायित्वादाभेनिर्दिश्यते सोवावलोकोग्निर्गौतमयथाग्निहोत्राधिकरणंआहवनीयइहतस्याग्नेर्द्युलो
काख्यस्यादित्यएवसमित्तेनदीप्तोसोलोकोदीप्यतेतत्समिंधनात्समिदादित्यारश्मयोधूमस्तदुत्थानात्स
धो मिंधोप्रधूमाउत्तिष्ठतिअहरर्चिः प्रकाशसामान्यादादित्यकार्यंचाह्नचंद्रमाअंगाराःप्रशमे लिंग्य
प त्वेरर्चिषाप्यस्ममेंगारालिंगइड्यं तेन नक्षत्राणि विस्फुलिंगाश्चंद्रमसोऽवयवाइवप्रविकीर्णत्वसामान्यात्त
स्मिन्नेतस्मिन्यथोक्तलक्षणेग्नौदेवायजमानप्राणाःइन्द्रादिरूपाअधिदेवतंश्रद्धामग्निहोत्राहुतिपरिणा
मावस्थारूपाःसूक्ष्माआपःश्रद्धा सावित्ताः श्रद्धाउच्यंते पर्जन्यामाहुतावापःपुरुषवसोत्सवंतस्यपरोक्षं
न्यतयाश्रद्धेरश्रुतचात्श्रद्धावापःश्रद्धामेवारस्त्यप्रणीयप्रचरंतीतिविज्ञायते। तांश्रद्धाम्सूरूपां
जुह्वति। तस्याआहुतेः सोमोराजासंपश्रद्धाराहुत्वाच्यानांधुलोकाग्नौहुतानांपरिणामःसोमोऽराजा
अथैतंसवायित्वासापद्यतेयायासोअग्न्यादित्वावनाहुत्योः सापदेवव ७

संभवति यथा ऋग्वेदादिपुष्परसा ऋगादिमधुकरोपनीतास्त आदित्ये यशआदिकार्यं रोहितादिरूपलक्षण
मारभंत इत्युक्तं। तथेमा अग्निहोत्राहुतिसमवायिन्यः सूक्ष्माः श्रद्धाशब्दवाच्या अपो द्युलोकमनुप्रविश्य चां
द्रं कार्यमारभंते फलरूपमग्निहोत्राहुत्योः यजमानाश्च तत्कर्त्तार आहुतिमया आहुतिभावनाभाविता आ
हुतिरूपेण कर्मणा कृष्टाः श्रद्धा अप्सु समवायिनो द्युलोकमनुप्रविश्य सोमभूता भवंति । तदर्थं हि तैरग्निहोत्रं
हुतमत्र चाहुतिपरिणाम एवं पंचाग्निसंबंधक्रमेण प्राधान्येन विवक्ष्यते उपासनार्थं न यजमानानां गति
स्तां च विदुषां धूमादिक्रमेणोत्तरत्र वक्ष्यति विदुषां चोत्तरां विद्याकृतां द्वितीयहोमपर्यायार्थमाह ॥ ॥
पर्जन्यो वाव पर्जन्य एव गौतमाग्निः पर्जन्यो नाम वृष्ट्युपकरणाभिमानी देवताविशेषस्तस्य वायुरेव समि
द्वायुना हि पर्जन्योग्निः समिध्यते पुरोवातादिप्राबल्ये वृष्टिदर्शनात् अभ्रं धूमो धूमकार्यत्वाद्धूमवदुपलक्ष्य
त्वाद्वा विद्युदर्चिः प्रकाशसामान्यादशनिरंगाराः काठिन्याद्विद्युत्संबंधाद्वा ह्रादनयो विस्फुलिंगा ह्रा
दयो नयो गर्जितानि बहुत्वविप्रकीर्णसामान्यात्तस्मिन्नेतस्मिन्नग्नौ देवाः पूर्ववत्सोमं राजानं जुह्वति
तस्या आहुतेर्वर्षं संभवति । श्रद्धाख्या आपः सोमाकारपरिणताः द्वितीयपर्याये पर्जन्याग्निं प्राप्य
वृष्टित्वेन परिणमंते ॥ ॥ पृथिवी वाव गौतमाग्निरित्यादि पूर्ववत्तस्याः पृथिव्याख्यस्याग्नेः संवत्सर ए
व समित् संवत्सरेण हि कालेन समिद्धा पृथिवी व्रीह्यादिनिष्पत्तये भवत्याकाशो धूमः पृथिव्या इवोत्थि
त आकाशो दृश्यते । यथाग्नेर्धूमो रात्रिरर्चिः पृथिव्या ह्यप्रकाशात्मिकाया अनुरूपा रात्रिस्तमोरूप ।५४२।
त्वादग्नेरिवानुरूपमर्चिर्दिशो अंगारा उपशांतत्वात्सामान्यादवांतरदिशो विस्फुलिंगाः क्षुद्रत्वसामा
न्यात्तस्मिन्नित्यादि समानं तस्या आहुतेरन्नं व्रीहियवादि संभवति ॥ पुरुषो वाव गौतमाग्निस्तस्य वा

हि

गेवसमिद्धावाह्निमुखेनसमिध्यतेपुरुषस्येनमुखः प्राणोधूमोधूमइवमुखान्निर्गमानात्अर्चिर्लोहितत्वा

च्चक्षुरंगारास्तत्आश्रयत्वात्श्रोत्रंविस्फुलिंगाविप्रकीर्णत्वात्समानमन्यत्अन्नंजुहोतिव्रीह्यादिसंस्कृतंतस्या

आहुतेरेतःसंभवति॥ ॥योषावावगौतमाग्निस्तस्याउपस्थएवसमित्तेननहिसापुत्राद्युत्पादना

यसमिध्यते यदुपमंत्रयतेसधूमः स्त्रीसंभवात्उपमंत्रणस्य योनिरर्चिर्लोहितत्वाद्यदंतःकरोतितेंगारा

अग्निसंबंधादभिनंदाःसुखलवाविस्फुलिंगाः क्षुद्रत्वात्तस्मिन्नेतस्मिन्नग्नौदेवारेतोजुह्वतितस्याआ

हुतेर्गर्भःसंभवतीत्येवंश्रद्धासोमवर्षान्नरेतोहवनपर्यायक्रमेणआपएवगर्भीभूतास्तत्रासामाहुतिस पा

समवायित्वात्प्राधान्यविवक्षाआपःपंचम्यामाहुतौपुरुषवचसोभवंतीति नचापएवकेवलाःसो

मादिकार्यमारभंतेनचापोत्रिवृत्कृताःसंतिन च त्रिवृत्कृतत्वेपि विशेषसंज्ञालाभोवैशेष्यात्पृथिवीयमिमा आपो

यमग्निरित्यन्यतमबाहुल्यनिमित्तस्तस्मात्समुदितान्येवभूतान्यपूर्वाहुत्यात्कर्मसमवायीनिसोम

वृष्ट्यन्नरेतोदेहेषुबहुरूपंवक्तारास्यपपिपार्थिवं तत्रपंचम्यामाहुतौहुतायांतुआपःपुरुषवचसोभवंती

तिव्याख्यातएकःप्रश्नः। यदुधवालोकादिमांप्रत्यावृत्तयोराहुत्योःपृथिवीपुरुषंस्त्रियंक्रमेणाविश्य

सु लोकंप्रत्युत्थायीभवतीतिवाजसनेयकेऽप्युक्तंतत्प्रासंगिकमिहोच्यते। एवंचप्रथमप्रश्नउक्तेऽथचमेवं

विस्थयदितोधिप्रजाःप्रयंतीतितस्यवायमुपक्रमः सगर्भोपांपंचमःपरिणामविशेषाआहुतिकर्मसमवायि

नीनांश्रद्धाशब्दवाच्यानामुल्बावृतउल्बेनजरायुणावृतोवेष्टितोदशवामासानवावाखिलान्मासानंतर्माताकुः रु

कुक्षौशयित्वायावद्वाकालेनन्यूनेनातिरिक्तेनवाथानंतरंजायतेउल्बादिततइत्यादिवैराग्यहेतोरिदं

मुच्यते कष्टंहिमातुःकुक्षौमूत्रपुरीषवातपित्तश्लेष्माद्यभिपूर्णेतदनुलिप्तस्यगर्भस्य उल्बाशुचिपट

सोमादिकार्यारंभकाण्यापउच्यंते द्रवप्रत्ययबहुलत्वात्कलाहुत्यांपं८ १रेतोरूपाआपोगालीत्तत्राहुतौहोचंपंचम्यामाहुतौ

७

टावृतस्य लोहितरेतोशुक्रविबीजौ जस्य मातुरशितपीतरसानुप्रवेशेन विवर्द्धमानस्य निरुद्धशक्तिबल
वीर्यतेजःप्रज्ञाचेष्टस्य शयनं ततो योनिद्वारेण पीड्यमानस्य कष्टतरा। निःसृतिर्जन्मेति वैराग्यं ग्राह
यति। मुहूर्त्तमप्यसह्यं दशावायैवं मासान्नतिदीर्घकालमंतः आपीड्येति। स एवं जातो यावदायुषं पुनः
पुनः घटीयंत्रवद्गमनागमनाय कर्म कुर्वन्कुलालचक्रवद्वा तिर्यग्भ्रमणाय यावत्कर्मणोपात्तमायु
स्तावज्जीवति। तमेवं क्षीणायुषं प्रेतं मृतं दिष्टं कर्मणा निर्दिष्टं परलोकं प्रति यदि चेज्जीवं
न्वैदिके कर्मणि ज्ञाने वाधिकृतस्तदेवं मृतमितोस्माद्ग्रामाद् अग्नये अग्न्यर्थमृत्विजो हरंति पुत्रा
वांत्यकर्मणे। यत एवेत आगमं तोऽग्नेः सकाशाच्छ्रद्धाद्याहुतिक्रमेण यतश्च पंचभ्योऽग्निभ्यः संभूत उ
त्पन्नो भवति। तस्मा एवाग्नये हरंति स्वामेव योनिमग्निमापादयंतीत्यर्थः॥ ॥वेत्थ यदि
तोऽधिप्रजाः प्रयंतीत्ययं प्रश्नः प्रत्युपस्थितोऽपाकर्तव्यतया तत्र लोकं प्रत्युत्थायीनामविकृतानां
गृहमेधिनां ये इत्थमेवं यथोक्तं पंचाग्निदर्शनेन धूमादिक्रमेण जाताग्निस्वरूपा पंचाग्न्या
त्मान इत्येवं विदुर्विजानीयुः कथमवगम्यते इत्थं विदुरिति गृहस्था एवोच्यंते नान्य इति गृहस्थानां
ये तु च नित्थंविदः केवलेष्टापूर्त्तदत्तपरास्ते धूमादिना चंद्रं गच्छंतीति वक्ष्यति ये चारण्योपलक्षिता
वैखानसाः परिव्राजकाश्च श्रद्धा तप इत्युपासते। तेषां चेत्थंविद्भिः सहार्चिरादिना गमनं वक्ष्यति पारिशे
ष्यादग्निहोत्राहुतिसंबंधाद्गृहस्था एव ये इत्थं विदुरिति। ननु ब्रह्मचारिणोऽप्यगृहीता ग्राम ॥४३॥
ऋत्यारण्यसत्यावानुपलक्षिता विद्यंते। कथं पारिशेष्यासिद्धिः नैष दोषः पुराणस्मृतिप्रामाण्यादूर्ध्व
रेतसां नैष्ठिकब्रह्मचारिणामुत्तरेणार्यम्णः पंथाः प्रसिद्धो तस्तेप्यरण्यवासिभिः सह गमिष्यंति

पकुर्वाणकाः स्वस्वाध्यायग्रहणार्थास्तिन वि ऽशेषनिर्दिष्टा इति । अनन्तरे नस्वंवेदुत्तरमार्गप्रतिपत्तिकारणंपु
राणस्मृतिप्रामाण्यादिष्यत इत्येविलमनर्थकं प्राप्तं । नगृहस्थानामयमर्थवर्ध्येग गृहस्थाः निर्थविदस्तेषांस्वस्ना
वतो दक्षिणतो धूमादिः पंथाः प्रसिद्धस्तेषांयस्त्वर्थंविदुः स गुणवान्यत् ब्रह्मविदुरथयद्वैवास्मिंकुर्वीतिय
द्विनार्विषमेवेति लिंगादुत्तरेणतेगळ्तिनाहैर्नूर्ध्वरेतसां गृहस्थानां च समानेआश्रमिवे ऊर्ध्वरेतसामेव
उत्तरेणपथागमनंनगृहस्थानामिति । ननु कममग्निहोत्रादिवैदिककर्मकवाकुल्येयात सतिनैष्ठदोषोभूत
क्षितेऽशत्रुमित्रसंयोगनिमित्तहितेषारागद्वेषौतथाधर्माधर्मौ हिंसानुग्रहनिमित्तो हिंसान्तमाब्रह्मचर्या	या
दिवर्ज्यकस्त्रुद्धिकारणमपरिहार्यं तेषामतोऽभूतासंभूतत्वान्नुत्तरेणपथागमनं । हिंसानृतमायाऽब्र
ह्मचर्यादिपरिहाराच्च शुद्धात्मानोहीतरे । शत्रुमित्ररागद्वेषादिपरिहाराच्च विरजसस्तेषांयुक्तः उत्तरः पंथाः ।
तथा च पौराणिकाः । येप्रजामीषिरेवाथतेश्मशानानि भेजिरे । येप्रजांनेषिरेवात्रतेऽमृतत्वंहिभेजिरे
मानेन	इत्यादु रिस्थविदां गृहस्थानामरण्यवासिनांवसैमार्गेऽमृतत्वे फळेचसत्यमरण्यवासिनां विधानर्थ
कं प्राप्तं । तथा चश्रुतिविरुद्धैरोधानतत्रदक्षिणायंतिनाविधाद्धांसस्तपस्विनइति । एषसरतमविदि
तानगृहुनरःक्तीतिर्यविरुद्धनात्भूतसंकुवस्थानस्यानेमृतवचनेन विवक्षितचात्तत्रैवोक्तं पौराणिकैरास्तस्य
वस्थानमनन्तत्वं हि साध्यतेहूति । यज्ञाद्यंतिकमम्रूतत्वंतदपेक्षयानतत्रदक्षिणायंति । सएनमविदित
नसुनक्तीयाघाः श्रुतयक्षुत्यतोनविरोधिनं इतिचेन्नेनमानवमिति विशेषणात्तेषामितनप्नुनरावृत्तिर
स्तीतिचा । यदिक्षेपकांतेनैवनावत्तेरन्निमंमानवमितिहेतिचविशेषणमनर्थकं स्यादिममित्येत्या
कृतिमात्रमुच्यतेऽइति चेन्नानावृत्तिग्राह्येनैनेवनिन्यानावृत्त्यर्थस्यप्रतीतत्वादाकृतिकल्पनाथन
र्थिकाऽतइममिहेतिचविशेषणार्थंवचायान्यत्रावृत्तिः कल्पनीया । नवसदेकमेवाद्वितीयमितियेवं

नचपुनरावृत्तिरास्तीमंमानवमादर्शनाचरितस्यादिरुतिविरोधः ४

प्रत्ययवतां मूर्द्धन्यानाड्यार्चिरादिमार्गेणगमनं ब्रह्मलोकस ब्रह्मप्राप्येति तस्मान्तत्सर्वमसत्कल्पं तस्य
प्राणानुत्क्रामंत्यत्रैव समवनीयंत इत्यादिस्फुटैः इति श्रुतेस्योन तस्माज्जीवाद्युत्क्रमिषोः प्राणा
नोत्क्रामंति सहैव गच्छंतीत्यर्थः कुत्स्यतद्युतिवेन्नात्रैव समवनीयंत इति विशेषणानर्थक्यात्सर्वे
प्राणाऽनुत्क्रामंतीति प्राणे गमनस्य प्राप्तत्वात्तस्मादुत्क्रामंतीत्यनात्मविदो यदापि मोक्षस्य संसा
रगतिवैलक्षण्यात्प्राणानां जीवेन सहगमनमाशंक्य तस्मान्नोत्क्रामंतीत्युच्यते। तदाप्यत्रैव समव
नीयंत इति विशेषणमनर्थकं स्यान्नत्वप्राणो वियुक्तस्य गतिरुपपद्यते जीवस्य सर्वगतत्वात्स्व
दात्मनो निरवयवत्वात्प्राणसंबंधमात्रमेवच्छिन्नत्वादिस्फुलिंगवज्जीवस्य सदकारणमियतस्तद्विवि
८ गजीवत्वं गतिर्वा। नत्वाकथाकल्पयितुं शक्तुतयस्य बेल्मांगान्नवसतोऽणुत्वयवत्स्फुटितो जीवा
त्वयः सद्रूपत्कृत्ज्जीवमाच्छतीति सगुणब्रह्मलोपासकस्य प्राणैः सहगमनागमनसापेक्षमेवचा
मृतत्वं नासान्नेहि इति गम्यते। तदपराजितापूस्तदैरंमदीयंसरइत्याद्युक्तात्तेषामेवैष ब्रह्मलोक
इति विशेषणाद्तः पंचाग्निविदो गृहस्था ये चेमेरण्ये वा नप्रस्थाः परिव्राजकाश्च सहनैष्ठिक ब्रह्म
चारिभिः श्रद्धां तप इत्येवमाद्युपासते श्रद्धयाना स्तपस्विनश्चेत्यर्थः। उपासनन्त्रा हि स्तत्रार्या
र्थः। इष्टापूर्ते दत्तमित्युपासत इति प्रवृत्तत्वं त्राद्यैव सत्ये स्थ ब्रह्म हिरण्यगर्भात्मकमुपासते
सर्वविषममविरक्तिमानिनीदेवतामतिसंयत्वं प्रतिपद्यंते समानमन्यद्यत्कृतार्थं गतिव्याख्यानेनेष ॥४४॥
दृष्टदेवयानः पंथाः यारव्यातः सत्यलोकावसानो नाड्याद्यदिर्यदंतरा पितरं मातरं चेति मंत्रवर्णा
दृष्टेयं षीं तत्र स्वै स्तावनाथैऽपि प्रथमे गृहस्थाग्रामे ग्राम इति गृहस्थानां साधारणविशेषणा
मरण्यवासिनं स्यो यथा वानप्रस्थाः परिव्राजकानामरण्यविशेषणं गृहस्थेभ्यो व्याद्

शापंयस्त्वान्वितं तस्मात्रयो ब्रह्म यंनमृतत्वमेती

४१८

त्यर्थः। तद्वदिष्टापूर्त्ते इष्टमग्निहोत्रादि वैदिकं कर्म पूर्त्तं वापीकूपतडागादिकरणं दत्तं बहिर्वेदि यथाशक्त्यर्हे
भ्योऽर्थसंविभागो दत्तमित्येवंविधं परिचरणं परित्राणं धूमोपासत इति धूमाद्यस्य प्रकारदर्शनार्थं वा ते दर्शनवर्जि
तं चाद्ये धूमाभिमानिनीं देवतां तां नाम लिसं संभवंति प्रतिपद्यंते। ये तयाति वाहिता धूमाद्रात्रिं रात्रिदेवतां रात्रेरपरप
क्षदेवतामेवमेव कृष्णपक्षाभिमानिनीमपरपक्षाद्यान्षण्मासान् दक्षिणा दक्षिणां दिशमेति सविता तान्मासान् दक्षि
णायनमासाद्यभिमानिनी देवताः प्रतिपद्यंत इत्यर्थः। संघचारिण्यो हि षण्मासदेवता इति मासानिति बहुवचन
प्रयोगस्तासु नैते कर्मिणः प्रवृत्ताः संवत्सरं संवत्सराभिमानिनीं देवतां नाभिप्राप्नुवंति। कुतः पुनः संवत्सरप्राप्ति
प्रसंगो यतः प्रतिषिध्यते। अस्ति हि प्रसंगः संवत्सरप्राप्तेः संवत्सरस्यैकस्यावयवत्वेन दक्षिणोत्तरायणयोरत अर्चिरा
दिमार्गप्रवृत्तानामुदगयनमासेभ्योऽवयविनः संवत्सरस्य प्राप्तिरुक्ता। अतः इहापि तदवयवभूतानां दक्षि
णायनमासानां प्राप्तिं श्रुत्वा तदवयविनः संवत्सरस्यापि पूर्ववत्प्राप्तिरापन्नेत्यतस्तस्य प्राप्तिः प्रति
षिध्यते नैते संवत्सरमभिप्राप्नुवंति मासेभ्यः पितृलोकं पितृलोकादाकाशमाकाशाच्चंद्रमसमेष सो
मः। तैः प्राप्यते चंद्रमा य एष दृश्यते। तत्र सोमो राजा ब्राह्मणानां तदन्नं देवानां तं देवा भक्ष
यंतीति श्रुतेर्धूमादिना गताः चंद्रलोकं ताः कर्मिणो देवैर्भुज्यंते। नन्वनर्थायेष्टादिकारणं यच्चान्नं
स्ते ता देवैर्भक्ष्यंते। नैष दोषोऽन्नमित्युपकरणमात्रत्वस्य विवक्षितत्वान्न हि ते कवलोत्क्षेपेण देवैर्भक्ष्यंते
किं तर्ह्युपकरणमात्रं देवतानां संभवंति ते स्त्रीपशुभृत्यादिवद्दृष्टश्चान्नशब्द उपकरणेषु स्त्रियोऽन्नं पशवो
ऽन्नं विशोऽन्नं राज्ञामित्यादि। न च तेषां स्त्र्यादीनां पुरुषोपभोग्यत्वेऽप्युपभोगो नास्तीति तस्मात्कर्मिणो देवाना
मुपभोग्या अपि संतः सुखिनो देवैः क्रीडंति। शरीरं च तेषां सुखोपभोगयोग्यं चंद्रमंडल आप्यमारभ्य
ते। तदुक्तं पुरस्तात् श्रद्धाख्या आपो द्युलोकाग्नौ हुताः सोमो राजा संभवंतीति। ता आपः कर्मसमवायि
न्यः इतरैश्च भूतैरनुगता द्युलोकं प्राप्य चंद्रत्वमापन्नाः शरीराद्यारंभिका इष्टाद्युपासकानां भवंति

ॐ

तवंत्याथां वरी शरीरारब्धयीतावग्नौ कृतायामग्निना नदह्यमाने शरीरे तद्भूतात्मापो धूमेन सह ऊर्ध्वं यजमा
नमावेष्ट्य चंद्रमंडलं प्राप्य कूष्मांडत्तिकास्थानीया बाह्यशरीरारंभिका भवंति । तदारब्धेन च शरीरेणेष्टापू
र्तादिफलमुपभुंजाना आसते । यावत्तदुपभोगनिमित्तस्य कर्मणः क्षयः संपतंत्यनेनेति संपातः कर्मणः
क्षयो यावत्संपातं यावत्कर्मणः क्षय इत्यर्थः । तावत्तस्मिंश्चंद्रमंडले उषित्वा ऽथानंतरमेतमेव वक्ष्यमाण
मध्वानं मार्गं पुनर्निवर्तंते पुनर्निवर्तंत इति प्रयोगात् पूर्वमप्यसकृच्चंद्रमंडलं गतानिवृत्ताश्चासन्निति
गम्यते । तस्मादिह लोके इष्टादिकर्मोपचितं च यच्चंद्रं गच्छंति तत्र क्षये चावर्तंते तत्क्षणमात्रमपि तत्र स्थातुं न
लभ्यंते । स्थितिनिमित्तकर्मक्षयात् स्नेहक्षयादिव प्रदीपस्य । तत्र किं येन कर्मणा चंद्रमंडलमारूढास्तस्य
सर्वस्य क्षये तस्मादवरोहंति । किं वा सावशेषस्येति । किं ततो यदि सर्वस्यैव क्षयः कर्मणश्चंद्रमंडलस्थैरे
व मोक्षः प्राप्नोति तिष्ठतु तावत्तत्रैव मोक्षः स्यान्नचेतीति तत आगतस्येह शरीरोपभोगादि न संभवति । ततः
शेषेणेत्यादिस्मृतिविरोधश्च स्यात् नन्विष्टापूर्तदत्तव्यतिरिक्तान्यपि मनुष्यलोके शरीरोपभोगनिमित्तानि
कर्माण्यनेकानि संभवंति । न च तेषां चंद्रमंडलमारूढस्तत्रैकदा क्षीणानीत्यतो विरोधः । न दोषस्तद्वच्च
सर्वेषां कर्मत्वसामान्यादविरुद्धः तद्वत्त तत्रैव मोक्षः स्यादिति दोषाभावो विरुद्धानेकयोन्युपभोगफला
नां च कर्मणामेकैकस्य जंतोरारंभकत्वसंभवान्न चैकस्मिन् जन्मनि सर्वकर्मणां क्षय उपपद्यते ब्रह्म
हत्यादेश्चैकैकस्य कर्मणोऽनेकजन्मारंभकत्वस्मरणात् स्थावरादिप्राप्तानां चात्यंतमूढत्वान्नामुत्कर्षहे
तोः कर्मण आरंभकत्वासंभवात् गर्भस्थानां च समानत्वात् कर्मासंभवे संसारानुपपत्तिस्तस्मान्नैकस्मिन् ज ॥४५॥
न्मनि सर्वेषां कर्मणामुपभोगो यत्तु केचिदुच्यते सर्वकर्माश्रयोपमर्देन प्रायणं कर्मणां जन्मारंभकत्वं
तत्र कानिचित्कर्माण्यनारंभकत्वेन च तिष्ठंतीत्यनिश्चितं जन्मांतरप्यारब्धं तदिति नोपपद्यते । मरणस्य
सर्वकर्माभिव्यंजकत्वात् स्वगोचराभिव्यंजकप्रदीपवदिति तदसत्सर्वस्य सर्वात्मकत्वात् सुपगमात्

ह उपभोगेतोऽक्षीणानि तानि यानि निमित्तानि चंद्रमंडल

तत्सर्वस्य सर्वात्मकत्वेदं त्राकारत्वानिमित्ताव बद्ध्वा सर्वात्मनोपमर्दः कस्यचित्क्वचिदसियन्त्रिवोप
पद्यते। तथा कर्मणामपि सा त्रयाणां वैलक्ष्ये यथा च पूर्वानुस्मृत मनुष्य मयूर कैमर्कटादि जन्मलिः संस्कृता
विरुद्धानेक वासनाः मर्कट च प्रापकेण कर्मणा मर्कट जन्मारभ्यमाणेन नोपमृद्यंते तथा कर्माण्यपि पूर्व
जन्म प्राप्ति निमित्तानि नोपमृद्यंत इत्युक्तं यदि हि सर्वाः पूर्वा जन्म लब्धवासना उपमृद्येरन्मर्कट
जन्म निमित्तेन कर्मणा मर्कट जन्मन्यारब्धे मर्कटस्य जातमात्रस्य मातुः शाखायाः शाखांतरगमने मातुरुद
रस्य लग्नत्वादि कौशलं न प्राप्नोति तज्जन्मन्यनभ्यस्तत्वात् न चातीतानंतरजन्मनि मर्कटत्वमेवासीत्
तस्येति शक्यं वक्तुं तं विद्याकर्मणी समन्वारभेते पूर्वप्रज्ञा चेति श्रुतेः तस्माद्वासनावन्नावशेष कर्मोप
मर्द इति शेषकर्मसंभवः। यत एवं ततः शेषेण परिभुक्त कर्मणः संसारोपपद्यत इति न कश्चिद्विरोधः।
कोसावशेषाः यं प्रति निवर्तत इत्युच्यते। यथेतं यथागतं निवर्तते। ननु मासेभ्यः पितृलोकं पितृलोकादा
काशमाकाशाच्चंद्रमसमिति गमनक्रम उक्तो न तथा निवृत्तिः किं तर्हि आकाशाद्वायुमित्याद्याः कथं यथेत
मित्युच्यते नैष दोषः आकाशप्राप्तेस्तुल्यत्वात् पृथिवीप्राप्तेश्च न चात्र यथेतमेवेति नियम
त्तेनैवमपि निवर्तते पुनर्निवर्तंत इति तु नेतु नियमोऽतउपलक्षणार्थमेतद्यथेतमिति अतो लौकिक
माकाशं तावत्प्रतिपद्यते। यास्तेषां चंद्रमंडले शरीरारंभिका आपः आसन् तास्तेषां तत्रोपभोगनिमि
त्तानां कर्मणां क्षये विलीयंते घृतसंस्थानमिवाग्निसंयोगेन विलीनाः अंतरिक्षस्था आकाशभूता इव
सूक्ष्मा भवंति ताः अंतरिक्षाद्वायुर्भवंति वायुप्रतिष्ठा वायुभूता इतश्चामुतश्चोह्यमानास्ताभिः सह क्षी
णकर्मा वायुभूतो भवति वायुर्भूत्वा ताभिः सहैव धूमो भवति धूमो भूत्वाभ्रं भवति अभ्रमात्ररूपो भवति अभ्रं भू
त्वा ततः सेचनसमर्थो मेघो भवति मेघो भूत्वा उन्नतेषु देशेषु प्रवर्षति वर्षधारारूपेण शेषकर्मा पततीत्यर्थः।

रेष्वज्ञाता नरैस्ततः सिकृदेतस्संबंधोकुलेसएवबदुसा स्थाकारणा ७

तद्ब्रीहियवा ॐषधिवनस्पतयस्तिलमाषा इत्येवं प्रकारा जायंते द्रीणकर्मणामनेकत्वाद्बहुवचन
निर्देशो मेघाद्यादिषु पूर्वेष्वेकरूपत्वादेकरूपत्वादेकवचननिर्देशः यस्मादिति हि दुर्गनदीसमुद्रार
ण्यमरुदेशादिसंनिवेशस्य हेतुर्वर्षधाराभिः पतितानाम् ततस्तस्मात्खलु दुर्निष्प्रपतरं दुःनि
ःक्रमणं दुर्निःसरणं यतो गिरितटादुदकस्रोतसोह्यमाना नदीं प्राप्नुवंतितता समुद्रं ततो मकरादि
तिर्भक्ष्यंते सोप्यन्यैन तत्रैव वसहम करणोस मुद्रे विलीनाः समुद्रांसो निर्जलधरैराकृष्टाः पुनर्वर्षधाराभिर्म
रुद्देशे निःक्षावरे वा गम्यंते पतिताः स्ति ष्ठंति कदाचिद्व्याघ्रमृगादिपीतास्तद्धितात्माः स्वैस्तेपन्यैरित्येवं प्रका
राः परिवर्तेरन् कदाचिद्दस्त्वेनस्थावरेषु जातास्तत्रैव स्थितेः पिस्थावराणामित्यतो
दुर्निःक्रमणत्वमथवातोस्माद्ब्रीहियवादिता वा तभि दुर्निःप्रपततरं दुर्निर्गमनतरं दुर्निर्गमनतरं
को दुर्निष्प्रपतरमिति तिक एवं ब्रीहियवादिभावो दुर्निष्प्रपरं तु तरस्तस्मादस्य पिदुर्निष्प्रपतरं तस्ता
नस्मिन्देहसंबंधो दुर्निष्प्रपततर इत्यर्थः यस्मात् घोरे मरेतो सिवद्भिः पुरुषरहितैः स्थिरैर्वासहिता
अंतराले विशीर्यंते अनेकत्वादन्नादानां कदाचित्कानृतापि क्षीयवृत्या रेतः सिंचितस्तैतयस्सदारे
यो तः सिकूसावंगतानां कर्मिणो रत्निलासः कथं योषाहमन्नमपि त्रिअनुशायिभिः संसक्तं यस्य रेतः सिंचति तका
लेयोषितितद्रूपस्वत दाकृतिरेवल वतितदवयवाकृतिस्तूय स्वं स्वं य इत्युच्यते रेतोरूपेणायोषिति गर्भा
शयें ततः प्रविश्यो नुशायी रेतसा रेतस्मिं स्तोगाकृतिता वितता सर्वेष्वंगेष्वस्य तेजः संस्तूतमिति अयं तरा ४६॥
त दतो रेतस्मिंगाकृतिरेवलव तीत्यर्थः तथाहि पुरुषात्पुरुषो जायते गोर्गवाकृतिरेव न जात्यंतराकृति
स्तस्माद्धकृतं तद्रूपं एवलव तीति ये नुशयिन्ये नुशायित्यस्यं रमंडल्ल मन्यारूह्येवपापकर्मभिर्व्रीहियवा
दितावं प्रतिपद्यंते तैर्वीहियवादि देहमुपात्तमिति तदुपभोगनिमित्तात्मयेव्रीहियवादिस्तंबदेहविनात्मेयथा
+२ पुनर्मनुष्यादितावं तेषां नानुशायिनामि दुर्निःप्रपतरं कस्मात्कर्मणाम्हिते १+

कर्मार्जितं देहांतरं नवं नवं जलूकावत्संक्रमते सविज्ञानं इत्थं सविज्ञानो भवति सविज्ञानमेवान्ववक्रामतीति श्रु
त्यंतराच्चोपसंहृतकरणाः संतो देहांतरं गच्छंतीति तथापि स्वच्छत्वद्देहांतरप्राप्तिनिमित्तकर्मोद्भावितवा
सनाजनितेन सविज्ञाना एवं देहांतरं गच्छंतीति श्रुतिप्रामाण्याद्यथाग्निरादिना धूमादिनावगमनंस्य प्रबोध्
तविज्ञानेन लब्धवृत्तिकर्मनिमित्तत्वाज्जमनस्य न तथानुशयिनां व्रीह्यादिभावेन जातानां सविज्ञाना
नामेवरतस्मिंश्चयोपि देहसंबंधेऽपपद्यते। न हि व्रीह्यादिलवनकंडनपेषणादौ वसविज्ञानानां स्थि
तिरस्ति। ननु चंद्रमंडलादपवरोहतां देहांतरगमनस्य तुल्यत्वाज्जलूकावत्सविज्ञानतैव युक्ता तथा
वसति चोरानकारं नुसवद्गृष्टाधूमादीनां दिकारिणां चंद्रमंडलादारस्य प्राप्तोयावद्व्रीहिलपणादिजन्म तथाव
प्र॰ मो॰ ८ सत्यनथायैवेष्टापूर्तोपासनं विहितं स्यात् श्रुतेश्चाप्रामाण्यं प्राप्तं वैदिकानां कर्मणामनर्थानुबंधित्वान्न
वृष्ट्यारोहणपतनवद्विज्ञोषणसंसर्वाद्देहाद्देहांतरप्रतिपत्तिः सो: कर्मणो लब्धवृत्तित्वात् कर्मणोद्भावितेन विज्ञा
नेन सविज्ञानेन सविज्ञानत्वं युक्तं॥ इत्यत्रोच्यते आरोहतः इव तत्स्वर्गे जिघृक्षतो तथा विरादिभोनागच्छतां सवि
८ ज्ञानवत्वं धूमादिनावचंद्रमंडलमारुरुक्षतां न तथा चंद्रमंडलादवरुरुक्षतां वृष्ट्यादिवपततां सचेतनत्वं
यथा मुद्गराद्यभिहतानां वदतिघातवेदनानिमित्तसंमूर्छितप्रतिबद्धकरणानां स्वदेहेनैव देहांतराद्देहां
तरं नीयमानानां विज्ञानशून्यता दृष्टा तथा चंद्रमंडलान्मानुषादिदेहात्तिर्यग्भवदतिघातवेदनानिमि
त्तसंमूर्छितप्रतिबद्धकरणानामंतरं प्रत्यवरुरुक्षतां स्वर्गभोगनिमित्तकर्मक्षयानंतरं दितां देहानां प्र
तिबद्धकरणानामपरित्यक्तदेहबीजलूतादिसिरादिर्मूर्छिताइवाकाशादिक्रमेणेमामवरूह्य कर्मनि
मित्तजातिस्थावरदेहैः संश्लिष्यं प्रतिप्रतिबद्धकरणतयानुद्भूतविज्ञानाएवं तथा लवनकंडनपेषण
संस्कारसक्तपारस्यादिपरिणामरेतःसेचनकालेषु मूर्छितवदेव देहांतरारंभकस्य कर्मणोऽलब्धवृत्तित्वा

इहिंसन्सर्वभूतान्यन्यत्रतीर्थेभ्य इति श्रुतेः शास्त्रचोदितहिंसाया

दृष्टबीजलतासंबंधापरित्यागेनैव सर्वास्ववस्थासु वर्तंत इति जलौघकाबल्यं न विरुध्यते तत्राश्लेषविज्ञानं ह्यद्धि
तवदेवेत्यदोषो नन्ववैदिकानां कर्मणां हिंसायुक्तत्वेनोभयहेतुत्वं चंद्रमंडलमनुमातुं हिंसायाः शास्त्रचोदितत्वा
देहिंसायाः नाधर्महेतुत्वमभ्युपगम्यते यथधर्महेतुत्वे मंत्रे विषादिवत्तदपनयोपपत्तेर्न दुःखकार्यारंभकत्वो
पत्तेर्वैदिकानां कर्मणां मंत्रेणेव विषलक्षणास्येति तत्र तथत्वनुशयिनां य इह लोके रमणीयं शोभनं चरणं
शीलं येषां ते रमणीयचरणा रमणीयचरणेनोपलक्षितः शोभनोनुशयः पुण्यं कर्म येषां ते रमणीयच
रणा उच्यंते। क्रौर्यानृतमायावर्जितानां हि शक्यमुपलक्षयितुं शुभानुशयसद्भावस्तेनानुशयेन पुण्येन कर्म
णा चंद्रमंडले भुक्तशेषेणाभ्याशो ह क्षिप्रं यत्ते इति क्रियाविशेषणं ते रमणीयां क्रौर्यादिवर्जितां योनिमा
पद्येरन्प्राप्नुयुर्ब्राह्मणयोनिं वा क्षत्रिययोनिं वा वैश्ययोनिं वा स्वकर्मानुरूपेणाथ पुनर्ये तद्विपरीताः कपूय
चरणोपलक्षितकर्माणोऽशुभानुशया अभ्याशो ह यत्ते कपूयां यथाकर्म योनिमापद्येरन्कपूयामेव धर्मसंबं
धवर्जितां जुगुप्सितां योनिमापद्येरन्स्वकर्मानुरूपेणैव येतु रमणीयचरणा द्विजातयस्ते स्वकर्मस्थाश्चेदि
ष्टादिकारिणस्ते धूमादिना गच्छंत्यागच्छंति च पुनः पुनर्घटीयंत्रवद्विद्यां चेत्प्राप्नुयुस्ततोर्चिरादिना गच्छं
नो ति। यदा तु न विद्यासेविनो नापीष्टादिकर्म सेवंते तदा तयोः पथ्योः कयोर्विधूमादिलक्षणयोर्न कतरेणान्यतरे
णचनापियंति तानीमानि भूतानि क्षुद्राणि दंशमशककीटादीन्यसकृदावर्तीनि भूतानि भवंति। उभ
यमार्गपरिभ्रष्टा ह्यसकृज्जायंते म्रियंते चेत्यर्थः। तेषां जननमरणसंततेरनुकरणमिदमुच्यते। जायस्व
म्रियस्वेति ईश्वरनिमित्तचेष्टोच्यते। स्वतो जननमरणलक्षणेनेव कालक्षेपो भवति न तु क्रियासु भोगेषु वा का ४७।
लोऽस्तीत्यर्थः। एतत्क्षुद्रजंतुलक्षणं तृतीयं प्रकृतौ वा कौ पंथानाववपद्य स्थानं संसरणं तां येनैवं दक्षिणमार्गगा।

श्वयोनिं वा सूकरयोनिं वा चांडालयोनिं वा स्व

अपिपुनरागच्छंत्यनग्निचित्कृतानांज्ञानकर्मणोरगमकत्वेनदक्षिणेनपथेतितेनासौलोकोनसंपूर्यते।पंचमस्तुप्रश्नःपंचम्या
मित्यग्निविद्ययाव्याख्यातः।प्रथमोदक्षिणोत्तरमार्गयोर्व्यामपाकृतोदक्षिणोत्तरयोःपथोर्व्यावर्तनापिमृतानामग्नेःप्र
क्षेपःसमानस्ततोव्यावर्तनान्येऽर्चिरादिनायंत्यन्येधूमादिना।पुनरुत्तरदक्षिणायनेषण्मासान्प्राप्नुवंतःसंपुज्यपुन
र्व्यावर्तंतेअन्येसंवत्सरमन्येमासेभ्यःपितृलोकमितिव्याख्यातापुनसेहरावृत्तिरपिक्षीणानुशयानांचंद्रमंडलादाका
शादिक्रमेणोक्ताऽमुष्यलोकस्याऽपूरणंस्वशब्देनैवोक्तंतेनासौलोकोनसंपूर्यतइतियस्मादेवंकष्टासंसारगति
स्तस्माज्जुगुप्सेतयस्माच्चजन्ममरणजनितवेदनानुभवकृतक्षणाःक्षुद्रजंतवोध्वांतेचघोरेदुरुत्तारेऽप्लवेत्रिताः
सागरइवागाधेऽप्लवेनिराशाश्चोत्तरणंप्रतितस्माच्चैवंविधांसंसारगतिंजुगुप्सेतबीभत्सेतघृणीभवेन्माभूदेवंवि
धेसंसारमहोदधौघोरेपातइतितस्यैतस्मिन्नर्थेएषश्लोकः।पंचाग्निविद्यास्तुतये।स्तेनोहिरण्यस्यब्राह्मणसुवर्ण
स्यहर्तासुरांपिबन्ब्राह्मणःसन्गुरोश्चतल्पंदारानावसन्ब्रह्महाब्राह्मणस्यहंताचेत्येतेपतंतिचत्वारःपंचमश्च
पतितैःसहाचरन्नितिअथपुनर्हयएतान्यथोक्तान्पंचाग्नीन्वेदसहतैरप्याचरन्महापातकिभिःसनपाप्मनालिप्य
तेशुद्धएवतेनपंचाग्निदर्शनेनपावितोयस्मात्पूतःपुण्योलोकःप्राजापत्यादिर्यस्यसोयंपुण्यलोकोभवति
यएवंयथोक्तंसमस्तंपंचभिःप्रश्नैःपृष्टमर्थजातंवेदद्विरुक्तिःसमस्तप्रश्ननिर्णयाप्रदर्शनार्था॥ ॥दक्षिणेन
पथागच्छतामन्नसावत्तेस्तेदेवानांअन्नंतंदेवाभक्षयंतीतिक्षुद्रजंतुलक्षणाचकष्टासंसारगतिरुक्ता।त
दुभयदोषपरिजिहीर्षयावैश्वानरात्मभावप्रतिपत्त्यर्थमुत्तरोग्रंथआरभ्यतेअत्स्यन्नंपश्यसिप्रियमित्यादि
लिंगादाख्यायिकात्सुखावबोधार्थाविद्यासंप्रदानन्यायप्रदर्शनार्थाचप्राचीनशालइतिनामतउपमन्यो
रपत्यंऔपमन्यवः।सत्ययज्ञोनामतःपुलुषस्यापत्यंपौलुषिः।तथेंद्रद्युम्नोनामतोभल्लवेरपत्यंभाल्लविस्तस्या
पत्यंभाल्लवेयजनइतिनामतःशार्कराक्ष्यःशर्कराख्यस्यापत्यंशार्कराख्योबुडिलोनामतोऽश्वतराश्वस्या

पत्यंआश्वतराश्विःपंचापितेहैतेमहाशालामहागृहस्थाविस्तीर्णाभिःशालाभिःसंयुक्ताःसंपन्नाइत्यर्थःमहा
श्रोत्रियाःश्रुताध्ययनवृत्तसंपन्नाइत्यर्थः।तएवंभूताःसंतःसमेत्यसंभूयक्वचिन्मीमांसांविचारणांचक्रुःकृत
वंतइत्यर्थः।कथं।कोनोस्माकमात्माकिंब्रह्मेत्यात्मब्रह्मशब्दयोरितरेतरविशेषणविशेष्यत्वंब्रह्मे
त्यध्यात्मपरिच्छिन्नमात्मानंनिवर्तयत्यात्मेतिचात्मव्यतिरिक्तस्यादित्यादिब्रह्मणउपास्यत्वंनिवर्तयति।अभेदे
नात्मैवब्रह्मब्रह्मैवात्मेत्येवंसर्वात्मावैश्वानरोब्रह्मसआत्मेत्येतत्सिद्धंभवति।मूर्धैवसुतेजइत्यादिलिं
गात्तेहमीमांसंतोपिनिश्चयमलभमानाःसंपादयांचक्रुःसंपादितवंतआत्मनउपदेष्टारमुद्दालको
वैप्रसिद्धोनामतःभगवंतःपूजावंतोयमारुणिररुणस्यापत्यंसंप्रतिसम्यगिममात्मानंवैश्वानरमध्ये
तिस्मरतीतिहंतेदानीमभ्यागच्छामेत्येवंनिश्चित्यतंहाभ्याजग्मुस्तेहागतवंतआरुणिःस
हतान्दृष्ट्वैवतेषामागमनप्रयोजनंबुद्ध्वासंपादयांचकारकथंप्रक्ष्यंतिमांवैश्वानरमिमेमहाशालामहा
श्रोत्रियास्तेभ्योहंनसर्वमिवप्रष्टव्यंप्रतिपत्स्येवक्तुंनोत्सहेऽतोहंताहमिदानीमन्यमहमेषामभ्यनुशासानि
वक्ष्याम्युपदेष्टारमित्येवंसंपाद्यतान्होवाचाश्वपतिर्वैनामतोभगवंतोयंकैकयःकेकयस्यापत्यंकैकेयःसंप्र
तिसम्यगिममात्मानंवैश्वानरमध्येतीत्यादिसमानंतेभ्योहराजाप्राप्तेभ्यःपृथक्पृथगर्हाण्यर्हणा
निपुरोहितैर्भृत्यैश्चकारयांचकारकारितवान्सहतान्येद्युःराजाप्रातःसंजिहानःगत्वाविनयेनोपगम्येदं
धनंमत्तउपादद्ध्वमितिसतैःप्रत्याख्यातोमयिदोषंपश्यंतिनूनंयतोनप्रतिगृह्णंतिमत्तोधनमितिमन्वा
नःआत्मनःसद्वृत्ततांप्रतिपिपादयिषन्नाह।नमेममजनपदेस्तेनःपरस्वहर्ताविद्यते।नकदर्योऽदातासत्य ॥५०॥
वितिविभवे।नमद्यपोद्विजोत्तमःसन्नानाहिताग्निःशतगुर्नाविद्वानधिकारानुरूपंनस्वैरीपरदारेषु
गंताऽतएवस्वैरिणीकुतःदुराचारिणीनसंभवतीत्यर्थः।तैश्चनवयंधनेनार्थिनइत्युक्तआहाल्पमत्वेति

या

धनं न गृह्णंतीति यक्ष्यमाणो वै कतिचिदहोभिर्यक्ष्ये भगवंतोऽहमस्मि तदर्थं क्लृप्तं धनं मया यावदेकैक
स्मै यथोक्तमृत्विजे धनं दास्यामि तावत्प्रत्येकं भगवद्भ्योऽपि दास्यामि वसंतु भगवंतः पश्यंतु च मम यागमित्यु
क्तास्ते होचुर्येन हैवार्थेन प्रयोजनेन यं पुरुषं प्रति चरेद्गच्छेत्पुरुषः तं हैवार्थं वदेदिदं मे प्रयोजनमागमनस्येत्ये
वं न्यायः सतां वयं च वैश्वानरज्ञानार्थिन आत्मानमेवेमं वैश्वानरं संप्रत्यध्येषि सम्यग्जानासि तस्मात्तमेव नो
ऽस्मभ्यं ब्रूहीत्युक्तस्तान्होवाच प्रातर्वो युष्मभ्यं प्रवक्तास्मि प्रतिवाक्यं दातास्मीत्युक्तास्ते ह राज्ञो
ऽभिप्रायज्ञाः समित्पाणयः समिद्भारहस्ता अपरेद्युः पूर्वाह्णे राजानं प्रतिचक्रमिरे गतवंतो यत एवं महाशा
ला महाश्रोत्रिया ब्राह्मणाः संतो महाशालत्वाद्यभिमानं हित्वा समिद्भारहस्ता जातितो हीनं राजानं विद्यार्थि
नो विनयेनोपजग्मुस्तथान्यैर्विद्योपादित्सुभिर्भवितव्यं तेभ्यश्चाददाद्विद्यां विवक्षुरनुपनीयैवोपनयनमकृत्वैवै
तान्यथायोग्येभ्यो विद्यामिदमदात् तद्वदन्येनापि विद्यादातव्येत्याख्यायिकार्थः एतद्वैश्वानरविज्ञान
मुवाचेति वक्ष्यमाणेन संबंधः ॥१॥ ॥ स कथमुवाचेत्याह औपमन्यव कं त्वमात्मानं वैश्वानरं त्वमुपास्स इति पप्र
च्छ। न्यायमुपन्यायमाचार्यः शिष्यं पृच्छतीति नमपदेशायदक्ष्यतेन मोपसीदत ततस्तेनक ऊर्ध्वं वक्ष्यामीति
न्यायदर्शनादन्यत्राप्याचार्यस्याप्रतिभानं वक्तिनिषेधप्रतिलोमाद नार्थः प्रश्नो दृष्टो जातः तत्रात्रोः हौषतदा सु
कृतः एष इदागादिति। दिवमेव द्युलोकमेवाहं वैश्वानरमुपासे भगवो राजन्निति होवाच ॥ एष वै सुतेजा
शोभनं तेजो यस्य सोऽयं सुतेजा इति प्रसिद्धो वैश्वानर आत्मा आत्मनोऽवयवभूतत्वाद्यं च मामन्मात्मानमात्मैकदे
शमुपास्से तस्मात्सुतेजसो वैश्वानरस्योपासनात्तव सुतं प्रसुतमासुतं च सोमरूपं कर्मणि प्रसुतं प्रकर्षेण सु
तमासुतं वा अहर्गणादिषु तव कुले दृश्यते तीव्र कर्मिणस्तु कुलीना इत्यर्थः अत्यन्तं दीप्ताग्निः सन्नन्नमत्सि पुत्र

गो१

न

पौत्रादि प्रियमिष्टं मन्यो ऽस्यत्यन्नं पश्यति च प्रियं सव त्यस्यापि सुतं प्रसुतमासुतमित्यादिकर्मणि ब्रह्मवर्चसं कु
ले यः कश्चिदेनं यथोक्तमेवं वैश्वानरमुपास्ते मूर्धा त्वेष वैश्वानरस्य घनसमस्तो वैश्वानरो ऽतः समस्तबुद्ध्या वैश्वान
रस्योपासना। मूर्धा शिरः ते विपरीतग्राहिणो व्यपतिष्यद्विपतितमभविष्यद्यद्यदि मां नागमिष्यो नागतो ऽस्
विष्यः साधुकार्षीर्यन्मामागतो ऽसीत्यभिप्रायः॥ ॥अथ होवाच सत्ययज्ञं पौलुषिं हे प्राचीनयोग्य त्वं कमात्मा
नमुपास्से इति आदित्यमेव भगवो राजन्निति होवाच शुक्लनीलादिरूपत्वाद्विश्वरूपत्वमादित्यस्य सर्वरू
पत्वाद्वा सर्वाणि हि रूपाणि त्वाष्ट्राणि यतो ऽतो वा विश्वरूप आदित्यस्तदुपासनात्तव बहु विश्वरूपमिहामुत्रार्थं
मुपकरणं दृश्यते कुले किं च वामनु प्रवृत्तो ऽश्वतरीरथो ऽश्वतरीरथो दासी निष्को दासीसहितो निष्को नि
ष्को हारो दासी निष्को ऽस्यन्नमित्यादि समानं चक्षुर्वैश्वानरस्य सविता तस्य समस्तस्योपासनं तु वि दंधो
पर्ययग्रहणेन त्वं विष्यो यन्मां नागमिष्य इति पूर्ववत्॥ ॥अथ होवाचेन्द्रद्युम्नं भाल्लवेयं वैयाघ्रपद्य कं
त्वमात्मानमुपास्स इत्यादि समानं पृथग्वर्त्मात्मा नानावर्त्मानियस्य वायोरावहप्रवहादिभिर्भे
दैर्वर्तमानस्य सो ऽयं पृथग्धर्मात्मा वायुस्तस्मात्पृथग्वर्त्मात्मनो वैश्वानरस्योपासनात्पृथग्बलि
दिशः त्वां बलयो वस्त्रान्नादिलक्षणा बल्य आयन्त्यागच्छन्ति पृथग्रथश्रेणयो रथपंक्तयो ऽपि त्वाम
नुयन्त्यश्नन्नमित्यादि समानं प्राणस्त्वेष आत्मन इति होवाच प्राणस्ते उदक्रमिष्यदुत्क्रान्तो ऽभविष्यद्यद्य ॥४७॥
न्मां नागमिष्य इति॥ ॥अथ होवाच जनमित्यादि समानमेष वै बहुल आत्मा वैश्वानरो बहुलत्व
माकाशस्य सर्वगतत्वाद्बहुलो ऽन्नपानादिगुणोपासनाद्धि त्वं बहुलो ऽसि प्रजया पुत्रपौत्रादिलक्षणया धनेन च
हिरण्यादिना संदेहस्त्वेष संदेहो मध्यमं शरीरं वैश्वानरस्य देहे रुपचयार्थत्वान्मांसरुधिरास्थ्यादि

ध्य
श्चवकृळं शारीरं तत्संदेहस्तेन त्वच्छरीरं व्यशीर्यद्वीर्णमभविष्यद्यन्मां नागमिष्य इति ॥ ॥अथ होवाचा बुडिलमाश्वत
राश्विंति मित्यादि समानमेष वै रयिरात्मा वैश्वानरो धनरूपोऽश्वोऽन्नं ततो धनमिति। तस्माद्रयिमान् धनवांस्त्वं
पुष्टिमांश्च शरीरे पुष्टेनैश्वान्नेन निमित्तेन चाद्धस्ति स्त्वेव यैष आत्मनो वैश्वानरस्य बस्तिर्मूत्रसंहारस्था
नं बस्तिस्ते व्यभेत्स्यद्भिन्नो लविष्यद्यन्मां नागमिष्य इति ॥ ॥अथ होवाचोद्दालकमित्यादि समानं पृथिवीमेव
चस्वं गवो राजन्निति होवाचैष वै प्रतिष्ठा पादौ वैश्वानरस्य पादौ ते व्यम्लास्येतां विम्लानावलविष्यतां श्लथी
भूतौ यन्मां नागमिष्य इति ॥ ॥तान्यथोक्तवैश्वानरदर्शनवतो होवाचैते यूयं वै खल्वित्यनर्थको यूयं पृथ
गिवाऽपृथक्सन्तमिममेकं वैश्वानरं विद्वांसोऽन्नमत्थ परिच्छिन्नबुद्ध्या यथा हस्तिदर्शन इव जात्यंधा यस्त्वेतमेव
यथोक्तावयवैर्द्युमूर्धादिभिर्विशिष्टमेकं प्रादेशमात्रं प्रदेशैर्द्युमूर्धादिभिः पृथिवीपादान्तैरध्यात्ममभिमीयते ज्ञा
यत इति प्रादेशमात्रं मुखादिषु वा करणेष्वत्तृत्वेनाभिमीयत इति प्रादेशमात्रो द्युलोकादिपृथिवीपर्यन्तप्रदेशपरिमा
णो वा। मात्रो वा प्रादेशमात्रः। प्रकर्षेण शास्त्रेणादिश्यत इति प्रादेशा द्युलोकादयस्तावत्परिमाणः प्रा
देशमात्रः। शाखान्तरे तु मूर्धादिचिबुकप्रतिष्ठ इति प्रादेशमात्रं कल्पयन्ति। इह तु न तथाऽभिप्रेतः। तस्य
ह वाए तस्यात्मन इत्याद्युपसंहाराद्यगात्मतयाभिविमीयत इत्यभिविमानस्तमेतमात्मा
नं वैश्वानरं विश्वान्नरान्नयति पुण्यपापानुरूपां गतिं सर्वात्मैष ईश्वरो वैश्वानरः एव वा विश्वात्मा स्वाद्विश्वे वैश्वानरः
वा नरैः प्रत्यगात्मतया प्रविभज्य नीयत इति विश्वानरो वैश्वानरस्तमेवमुपास्ते यस्सोऽन्नमत्त्यन्नादिस सर्वेषु लोकेषु द्यु
लोकादिषु सर्वेषु भूतेषु चराचरेषु सर्वेष्वात्मसु शरीरेन्द्रियमनोबुद्धिषु तेषु ह्यात्मा कल्पनया व्यपदि
श्यते। प्राणिनामन्नमत्ति वैश्वानरवित्सर्वात्मा सन्नन्नमत्ति न यथाज्ञः पिण्डमात्राभिमानः सन्नित्यर्थः।
कस्मादेवं यस्मात्तस्य ह वै प्रकृतस्यैव एतस्यात्मनो वैश्वानरस्य मूर्धैव सुतेजाश्चक्षुर्विश्वरूपः प्राणः पृथ
ग्वर्त्मा संदेहो बहुलो बस्तिरेव रयिः पृथिव्येव पादौ वचथवा विध्यर्थमेतद्धनमेवमुपास्य इत्यथेदानीं

वैश्वानरस्य विदोजनेग्निहोत्रं संपादयिष्यन्नाह। एतस्य वैश्वानरस्य सो कुरूर एव वेदिः आकारसामान्या
ल्लोमानि बर्हिः विधामिवो रसिलोमान्यास्तीर्णानि हृदयं तेहृदयं गार्हपत्यो हृदयाद्धि मनः प्रणीतमिवा
नंतरीसवति अतोन्वाहार्यपचनोग्निर्मन आस्यं मुखमाहवनीय इवाहवनीयो हूयते ह्यस्मिन्नन्नमिति॥
तत्त्रैवं सति यद्भक्तं भोजनकाले आगमद्भोजनार्थं तद्धोमार्थं होमीयं तद्धोतव्यमग्निहोत्रसंपि
पादयिषन्नाह। एतस्य वैश्वानरस्य लो कुरूर एव वेदिः आकारसामान्यात् लोमान्याल्लोमानि बर्हिः॥ तत्त्रैवं
सति यद्भक्तं भोजनकाले आगतं भोजनार्थं तद्धोमार्थं होमीयं तद्धोतव्यमग्निहोत्रसंपन्मात्रस्य विवक्षितत्वा
न्नाग्निहोत्रांगेतिकर्तव्यताप्राप्तिरिह स होतो कायां प्रथमामाहुतिं जुहुयात्तां कथं जुहुयादित्याह प्राणाय
स्वाहेत्यनेन मंत्रेणाहुतिशब्दाद्वदानप्रमाणमन्नं प्रक्षिपेदित्यर्थस्तेन प्राणस्तृप्यति प्राणे तृप्यति चक्षु
स्तृप्यति चक्षुरादित्यो द्यौश्चेत्यादि तृप्यति यच्चान्यद्यौश्चादित्यश्च स्वामित्वेनाधितिष्ठतस्तच्च तृप्यति
तस्यानुतृप्तिमनु स्वयं भुंजानस्तृप्यत्येव प्रत्यक्षं किंच प्रजादिभिश्च तेजः शारीरगता दीप्तिरुज्ज्वलत्वं प्राग
ल्भ्यं वा ब्रह्मचर्यसंवृत्तत्वाः स्वाध्यायनिमित्तं तेजः॥ ॥अथ यां द्वितीयां तृतीयां चतुर्थीं पंचमीं तिसमानं मन्यत्॥
स यः कश्चिदिदं वैश्वानरदर्शनं यथोक्तमविद्वान्सन्नग्निहोत्रं प्रसिद्धं जुहोतीति यथांगारानाहुतियोग्या
नपोह्यानाहुतिस्थानेसस्मनि जुहुयात्ताहृक् तत्तुल्यं तस्य तदग्निहोत्रहवनं स्याद्वैश्वानरप्रसिद्धं विदोग्नि
होत्र विंदीमपेक्ष्यतीति प्रसिद्धाग्निहोत्रनिंदया वैश्वानरविदोग्निहोत्रं स्तूयते। इतश्चैतद्विशिष्टमग्निहोत्रं क
थं मथयस्त देव विद्वानग्निहोत्रं जुहोति तस्य यथोक्तवैश्वानरविज्ञानवतः सर्वेषु सर्वेषु लोकेषु ... ॥५०॥
कार्थं कृतमन्नमत्तीत्यप्यनयोरेकार्थत्वात् किंच तद्यथा इषीकातूलमग्नौ प्रोतं प्रदह्यते एवं ह
येतत्प्रदह्येत द्विप्रमेवं हास्य विदुषः सर्वात्मस्तस्य सर्वान्नानामत्तुः सर्वे निरवशिष्टाः पाप्मानो धर्माधर्मा

स्याऽनेकजन्मसंचितस्य प्राक् ज्ञानोत्पत्तेः ज्ञानसहभाविनश्च प्रदूयंते प्रदह्येरन्वर्तमानशरीरारंभकपाप्मव
र्जं सर्वं प्रतिमुक्तेषुवत्प्रवृत्तफलत्वात्तस्य न दाहो यस्तदेवं विद्वानग्निहोत्रं जुहोति भुंक्ते स यद्यपि चंडाळायोच्छिष्टानर्हायो
च्छिष्टं प्रयच्छेद्यात्प्रतिषिद्धमुच्छिष्टदानं यद्यपि कुर्यादात्मनि हैवास्य चंडालदेहस्थे वैश्वानरे तद्धुतं स्यान्नाधर्मनिमि
त्तमिति विद्यामेव स्तौति तदेतस्मिन्नर्थे ऽयं श्लोको मंत्रोप्येष भवति यथेह लोके क्षुधिता बुभुक्षिता बाला मा
तरं पर्युपासते कदा नो माताऽन्नं प्रयच्छतीत्येवं सर्वाणि भूतान्यन्नादान्येवंविदोऽप्यस्य सर्वं विद्ध्यग्निहोत्रं तद्भोजनमुपास
ति कदा नु सोऽश्यत इति यद्येनं सर्वं विद्वद्भोजनेन तृप्तं भवतीत्यर्थो द्विरुक्तिरध्यायपरिसमाप्त्यर्था ॥ ॥इति
अगरू श्रीगोविंदभगवत्पूज्यपादशिष्यस्य परमहंसपरिव्राजकाचार्यश्रीशंकरभगवतः कृतौ छांदोग्योपनिषद्विवरणे पंचम
पाठकः समाप्तः ॥ ॐ नमः परमात्मने ॥ श्वेतकेतुर्हारुणेय आसेत्याद्यध्यायस्य संबंधः सर्वं खल्विदं ब्रह्म तज्जला
नीत्युक्तं ॥ कथं तस्माज्जगदिदं जायते तस्मिन्नेव च लीयते अनिति च तेनैवेत्येतदुक्तं च यं अनंतरं चैकस्मिन्नुक्ते वि
दुषि सर्वं जगद्भुक्तं भवतीत्युक्तं । तदेकत्वे सत्यात्मनः सर्वभूतस्थस्योपपद्यते नात्मभेदे । कथं च तदेकत्वमिति । तदर्थोऽयं
षष्ठोऽध्याय आरभ्यते । पितापुत्राख्यायिका विद्यायाः सारिष्ठत्वप्रदर्शनार्था । श्वेतकेतुरिति नामतो । ह इत्यैतिह्यार्थः ।
आरुणेयारुणस्य पौत्र आस बभूव तं पुत्रं हारुणिः पिता योग्यं विद्याभाजनं मन्वानस्तस्योपनयनकालमप्यप
श्यन्नुवाच । हे श्वेतकेतो अनुरूपं गुरुं कुलस्य नो गत्वा वस ब्रह्मचर्यं । न चैतद्युक्तं तद्यदस्मत्कुलीनो हे सोम्य अननूच्या
नधीत्य ब्रह्मबंधुरिव भवतीति । ब्राह्मणान्बंधून्व्यपदिशति न स्वयं ब्राह्मणवृत्त इति । तस्मातः प्रवासोऽनुमीयते
पितुर्येन स्वयं गुणवान्सन्पुत्रं नोपनेष्यति । स पित्रोक्तः श्वेतकेतुर्ह द्वादशवर्षः सन्नुपेत्याचार्यं यावच्चतुर्विंशतिव
र्षो बभूव तावत्सर्वान्वेदानधीत्य तदर्थं च बुध्वा महामना महन्मनो गंभीरं यस्य सोऽसममात्मानमन्यैर्मन्यमानं म
नो यस्य सोऽयं महामना । अनूचानमात्मानं मन्यत इत्येवंशीलो यः सोऽनूचानमानी स्तब्धोऽप्रणतस्वभाव
एयाय गृहं तमेवंभूतं महामनसं ननु रूपं शीलं स्तब्धं मानिनं । पुत्रं दृष्ट्वा पितोवाच । धर्मावतारचिकीर्षया श्वेतकेतो य
न्विदं महामना अनूचानमानी स्तब्धश्चासि कः स ते तिशयः प्राप्तः उपाध्यायात् उत तमादेशमादिश्यत इत्यादेशः के

च्येतद्येनवापरं ब्रह्मादिशब्दैतैः स आदेशः। तमप्राक्ष्यः पृष्टवानस्याचार्यं तमादेशं विशि
वलब्धास्त्वाचार्योपदेशगम्यश्च्येतद्येनवापरं ब्रह्मादिश्यते स आदेशः तमादेशं विशि
नष्टि। येनादेशेनश्रुतेनाश्रुतमप्यन्यच्छ्रुतं भवत्यमतं मतमतर्कितं तर्कितं भवत्यविज्ञातमनिश्चितं निश्चितं भवतीति। सर्वा
नपि वेदानधीत्य सर्वं चान्यद्वेद्यमधिगम्याप्यकृतार्थ एव भवति। यावदात्मतत्त्वं न जानाति। इत्याख्यायिकातोवगम्य
ते। तदेतदद्भुतं श्रुत्वाह। कथं न्वेतदप्रसिद्धमन्यविज्ञानेनान्यद्विज्ञातं भवतीति एवं लक्षणं वस्तूपलभ्यत इत्येवं मन्वानः पृ
च्छति। कथं नु केन नु प्रकारेण हे भगवः स आदेशो भवतीति। यथा स आदेशो भवति तच्छृणु हे सोम्य यथा लोके ए
३ केन मृत्पिण्डेन रुचककुम्भादिकारणभूतेन विज्ञातेन सर्वमन्यत्तद्विकारजातं मृन्मयं मृद्विकारजातं विज्ञातं स्यात्। ननु
कथं मृत्पिण्डे कारणे विज्ञाते कार्यमन्यद्विज्ञातं स्यात्। नैष दोषः कारणेनानन्यत्वात्कार्यस्य यन्मन्यसे अन्यस्मिन्विज्ञाते
न्यन्न विज्ञायत इति। सत्यमेवं स्याद्यद्यन्यत्कारणात्कार्यं स्यान्न त्वेवमन्यत्कारणात्कार्यं। कथं तर्हीदं लोके इदं कारण
मयमस्य विकार इति। शृणु वाचारम्भणं वागारम्भणं वागालम्बनमित्येतत्। कोसौ विकारो नामधेयं नामैव नामधेयं
४ स्वार्थे धेयप्रत्ययो वागालम्बनमात्रं नामैव केवलं न विकारो नाम वस्त्वस्ति परमार्थतो मृत्तिकेत्येव मृत्तिकैव तु सत्यं वस्त्व
स्ति यथा सोम्यैकेन लोहमणिना सुवर्णपिण्डेन सर्वमन्यद्विकारजातं कटकमुकुटकेयूरादि विज्ञातं स्याद्वाचा
रम्भणमित्यादि समानं। यथा सोम्यैकेन नखनिकृन्तनेनोपलक्षितेन कार्ष्णायसपिण्डेनेत्यर्थः। सर्वं कार्ष्णायसं कार्ष्णा
यसविकारजातं विज्ञातं स्यात्समानमन्यत्। अनेकदृष्टान्तोपादानं दार्ष्टान्तिकानेकभेदानुगमार्थं। एवं
तर्थैवं सोम्य स आदेशो यो मयोक्तो भवतीत्युक्तवति पितर्याहेतरो। न वै नूनं भगवन्तः पूज्यावन्तः गुरवो मम ये
एतद्यद्भवदुक्तं वस्तु नावेदिषुर्न विज्ञातवन्तो नूनं। यद्यदवेदिष्यन्विदितवन्त एतद्वस्तु कथं मे गुणवते भक्ता
यानुगतायैवं नावक्ष्यन्नोक्तवन्तः तेनाहं मन्ये न विदितवन्त इत्यवाच्यमपि गुरोर्न्यग्भावमवादीत्पुनर्गुरुकुलं ५१॥
प्रति प्रेषणभयात्। अतो भगवांस्त्वेव मे मह्यं तद्वस्तु येन सर्वज्ञत्वं ज्ञातेन मे स्यात्तद्ब्रवीतु कथयत्वित्युक्तः पितोवाच।
तथास्तु सोम्येति॥ ॥सदेव सदित्यस्तितामात्रं वस्तु सूक्ष्मं निर्विशेषं सर्वगतमेकं निरञ्जनं नित्यं निरवयवं विज्ञानं
यदवगम्यते सर्ववेदान्तेभ्य एवशब्दोऽवधारणार्थः किं तदवध्रियत इत्याह। इदं जगन्नामरूपक्रियावद्विकृतमुपलभ्यते

यत्तः सदेवासीदित्यासीच्छब्देन संबध्यते कदा सदेवेदमासीदित्युच्यते । येदं जगतः प्रागुत्पत्तेः ॥ किं नेदानीमिदं सत्
येनाग्र आसीदिति विशेष्यते । न । कथं तर्हि विशेषणमिदानीमपीदं सदेव किंतु नामरूपविशेषणवदिदं शब्दबुद्धि
विषयं चेतीदं च भवति प्रागुत्पत्तेस्त्वग्रे केवलसच्छब्दबुद्धिविषयमेवेतीदं सदेवेति । प्रागुत्पत्तेस्त्वग्रे केवलसच्छब्दबुद्धिमा
मा त्रगम्यमेवेति सदेवेदमग्र आसीदित्यवधार्यते । न हि प्रागुत्पत्तेर्नामवद्रूपवद्वेदमिति ग्रहीतुं शक्यं वस्तु
सुषुप्तकाल इव । यथा सुषुप्तादुत्थितः सत्त्वमात्रमवगच्छति सुषुप्ते सन्मात्रमेव केवलं वस्त्विति । तथा प्रागु
त्पत्तेरित्यभिप्रायो यथेदमुच्यते । लोके पूर्वाह्णे घटादि सिसृक्षुणा कुलालेन मृत्पिंडं प्रसारितमुपलभ्य ग्रामां
तरं गत्वा प्रत्यागतोऽपराह्णे तत्रैव घटशरावाद्यनेकभेदभिन्नं कार्यमुपलभ्य मृदेवेदं घटशरावादि केवलं पूर्वा
ह्ण आसीदिति । तथेहाप्युच्यते सदेवेदमग्र आसीदिति । एकमेवेति स्वकार्यपतितमन्यन्नास्तीत्येकमेवेत्युच्य
ते । अद्वितीयमिति मृद्व्यतिरेकेण मृदो यथान्यद्घटाद्याकारेण परिणमयितृ कुलालादि निमित्तकारणं दृष्टं
२ आषं तथा सद्व्यतिरेकेण सतः सहकारिकारणं द्वितीयं वस्त्वन्तरं प्राप्तं प्रतिषिध्यतेऽद्वितीयमिति । नास्य द्वितीयं वस्त्व
ना न्तरं विद्यत इत्यद्वितीयम् । ननु वैशेषिकपक्षेऽपि सत्सामानाधिकरण्यं सर्वस्योपपद्यते द्रव्यगुणादिषु सच्छब्दबुद्ध्य
नुवृत्तेः । सद्द्रव्यं सद्गुणः सत्कर्मेत्यादिदर्शनात् । सत्यमेवं स्यादिदानीम् । प्रागुत्पत्तेस्तु नैवेदं कार्यं सदेवासीदि
त्य भ्युपगम्यते वैशेषिकैः प्रागुत्पत्तेः कार्यस्यासत्त्वाभ्युपगमात् । न चैकमेव सदद्वितीयं प्रागुत्पत्तेरिच्छन्ति । तस्माद्वै
शेषिकपरिकल्पितात्सतोऽन्यत्कारणमिदं सदुच्यते मृदादिदृष्टान्तेभ्यः तत्र हैतस्मिन्प्रागुत्पत्तेर्वस्तुनिरूपणे
वैनाशिका आहुर्वस्तु निरूपयन्तोऽसत् सदभावमात्रं प्रागुत्पत्तेरिदं जगदेकमेवाद्वितीयमासीदिति । सद
भावमात्रं हि प्रागुत्पत्तेस्तत्त्वं कल्पयन्ति बौद्धाः । न तु सत्प्रतिद्वन्द्वि वस्त्वन्तरमिच्छन्ति । यथा सच्चासदिति गृह्यमाणं यथा
भूतं तद्विपरीतं तत्त्वं भवति [illegible] द्वितीयत्वं चोच्यते तैर्बौद्धैर्न युक्तं तेषां सावा भावमात्रमभ्युपगच्छतां मसत्त्वमात्रो
+ नवतीति नैय्यायिकाः [illegible] सदभावमात्रं प्रागुत्पत्तेरिदं दासीमतं बौद्धैकैः कथं प्रागुत्पत्तेरिदमासीदसदेकमेवाद्वितीयं चेति [illegible]
संख्यासंख्यो

सद्ग्रहणनिवृत्तिपरत्वाद्वाक्यस्य सदित्ययं शब्दः प्रयुक्तः ३ कथं२

भ्युपगमोऽप्ययुक्त एवाभ्युपगंतुर्नरस्याभ्युपगमानुपपत्तेरिदानीमभ्युपगंताऽभ्युपगम्यते न प्रागुत्पत्तेरि[illegible] तिरे १
ष्ट प्रागुत्पत्तेः सद्भावस्य प्रमाणाभावात् प्रागुत्पत्तेरसदेवेति कल्पनानुप[illegible]पत्तिः ननु नैव स्वाभाकृतेः शब्दा
र्थत्वे सदेकमेवाद्वितीयमिति पदार्थवाक्यार्थोपपत्तिस्तदनुपपत्तौ वेदवाक्यमप्रमाणं प्रसज्येतेति चेन्नैष दोषः स
दाकृतिवाचकमेकमेवाद्वितीयमित्येतौ च सत्त्वाद्येन समानाधिकरणौ तथेदमासीदिति च तत्र नञ् सद्वाक्ये प्र
युक्तः सद्वाक्यमेवावलंब्य सद्वाक्यार्थविषयां बुद्धिं सदेकमेवाद्वितीयमासीदित्येवंलक्षणां ततः सद्वाक्यार्थान्निनि
वर्त्तयत्यश्वारूढ इवाश्वालंबनोऽश्वं तदभिमुखविषयान्निवर्त्तयति तद्वन्न तु पुनः सद्भावमेवाभिधत्तेऽतः पुरु
षस्य विपरीतग्रहणनिवृत्त्यर्थमपरमिदमसदेवेत्यादिवा। कथं प्रयुज्यते दर्शयित्वा हि विपरीतग्रहणं ततो नि
वर्त्तयितुं शक्यत इत्यर्थः तस्मादसदादिवाक्यस्य प्रामाण्यं च सिद्धमित्यदोषः। तस्मादसतः सर्वाभावरूपात्सद्वि
द्यमानमजायत समुत्पन्नमऽबलावक्रांदसः तदेतद्विपरीतग्रहं महावैनाशिकपक्षं दर्शयित्वा प्रतिषेधति। कुतस्तु
प्रमाणात् खलु हे सोम्यैवं स्यादसतः सज्जायेत इत्येवं कुतोऽसवेन्न कुतश्चित्प्रमाणादेवं संभवतीत्यर्थो यदपि बीजोपम
र्दृन्तु रोकायमानो दृष्टोऽसावादेवेति तदुपपत्त्युपगमविरुद्धं तेषां। कथं येतावद्बीजावयवा बीजसंस्थानविनि सं
ष्टास्तेऽकुरेऽप्यनुवर्त्तंत एव। न तेषामुपमर्दोऽकुरजन्मनि यत्पुनरोऽनैवबीजाकारसंस्थानं तद्बीजावयवव्यतिरेकेणाव
स्तुभूतं न वैनाशिकैरभ्युपगम्यते यदंकुरजन्मन्युपमृद्यते। अथ तदस्त्यवयवव्यतिरिक्तं वस्तुभूतं। तथा च सत्यभ्यु
पगमविरोधोऽथ संवृत्याभ्युपगतं बीजसंस्थानरूपमुपमृद्यत इति चेत्। केयं संवृतिर्नाम। किमसावभाव उत ।।५२।।
भाव इति। यद्यभावो दृष्टांतोऽभावोऽथ भावः। तथापि नाभावादंकुरोत्पत्तिः। बीजावयवेभ्यो ह्यंकुरोत्पत्तिः अवय
वा अप्युपमृद्यंत इति चेन्न। तदवयवेष्वप्यतुल्यत्वात् यथा वैनाशिकानां बीजसंस्थानरूपोऽवयवी नास्ति तथावयवा
अपि नैव संति तेषामप्युपमर्दानुपपत्तिः बीजावयवानामपि सूक्ष्मा अवयवास्तदवयवानामप्यन्ये सूक्ष्मतरा इ

वयवाइत्येवंप्रसंगस्यानिवृत्तेः सर्वत्रोपमर्दानुपपत्तिः। सद्बुद्ध्यनुवृत्तेः सत्वाऽनिवृत्तिश्चेतिसद्वादिनांसतएवसदु
त्पत्तिः सेत्स्यति। नत्वसद्वादिनांदृष्टांतोस्त्यसतः सदुत्पत्तेः मृत्पिंडाद्घटोत्पत्तिर्दृश्यतेसद्वादिनां। तद्भावेभावात्त
दभावेचाभावाद्यभावादेवघटस्तूत्पद्येत। घटार्थिनामृत्पिंडोनोपादीयेत। भावव्याद्बुद्ध्यनुवृत्तिश्च घटा
दौप्रसज्येत। नत्वेतदस्ति। तो नासतः सदुत्पत्तिः। यदप्याकुंभबुद्धिर्घटबुद्धेर्निमित्तमितिमृद्बुद्धिर्घटबुद्धेः का
रणमुच्यते। नतुपरमार्थतएवमृद्घटोवास्तीति। तदापिमृद्बुद्धिर्विद्यमानाविद्यमानायाएवघटबुद्धेः का
रणमितिनासतः सदुत्पत्तिर्मृद्घटबुद्ध्योर्निमित्तनैमित्तिकतया आनंतर्यमात्रं नतुकार्यकारणत्वमिति
चेन्न। बुद्धीनांनैरंतर्येगम्यमानेवैनाशिकानांबहिर्दृष्टांताभावात्। कुतस्तुखलुसोम्यैवंस्यादितिहो
वाच। कथंकेनप्रकारेणासतः सज्जायेतेति। असतः सदुत्पत्तौनकश्चिदपिदृष्टांतप्रकारोस्तीत्यभिप्रायः। ए
वमसद्वादिपक्षमुन्मथ्योपसंहरतिसत्वेवसोम्येदमग्रआसीदितिस्वपक्षसिद्धिः। ननुसद्वादिनोपिस
तः सदुत्पद्यतइतिनैवदृष्टांतोस्तिघटाद्घटांतरोत्पत्त्यदर्शनात्। सत्यमेवं। नसतः सदंतरमुत्पद्यते। किंतर्हि
सदेवसंस्थानांतरेणावतिष्ठते। यथासर्पः कुंडलीभवति। यथाचमृच्चूर्णपिंडघटकपालादिप्रकारैः। यद्येवंस
देवसर्वप्रकारावस्थं कथंप्रागुत्पत्तेरिदमासीदित्युच्यते। ननुनश्रुतंत्वयासदेवेत्यवधारणमिदंशब्दवाच्य
स्यकार्यस्य। प्राप्तंतर्हिप्रागुत्पत्तेः सदेवासीन्नेदंशब्दवाच्यमिदानींमिदंजातमिति। नसतएवेदंशब्दबुद्धिवि
षयतयावस्थानाद्यथामृदेवपिंडघटादिशब्दबुद्धिविषयत्वेनावतिष्ठते। तद्वन्ननुयथामृद्वस्त्वेवंपिंडघ
टाद्यपि। तद्वत्सद्बुद्धेरन्यबुद्धिविषयत्वात्कार्यस्यसतोन्यद्वस्त्वंतरंस्यात्कार्यजातंयथाश्वाद्गौर्नपिंडघटाद
नाममितरेतरव्यभिचारेपिमृत्वाव्यभिचाराद्घटोपिघटः। पिंडंव्यभिचरतिपिंडश्चघटं। तथापिंडघटौमृत्वंन

व्यभिचरतः तस्मान्मृन्मात्रं पिंडघटौ व्यभिचरति त्विश्वं गोरश्वो वा गा तस्मान्मृदादिसंस्थानमात्रं घटादयः एवं सत्यै
संस्थानमात्रमिदं सर्वमिति युक्तं प्रागुत्पत्तेः सदेवेति। वाचारंभणमात्रं चाद्विकारसंस्थानस्य ननु निरवयवं सन्नि वं२
ष्कलं निष्क्रियं शांतं निरवद्यं निरंजनं स बाह्याभ्यंतरो ह्यजः इत्यादिश्रुतिभ्यो निरवयवस्य कथं विकारसंस्थान
मुपपद्यते। नैष दोषः रज्ज्वाद्यवयवेभ्यः सर्पादिसंस्थानवद्बुद्धिपरिकल्पितेभ्यः सदवयवेभ्यो विकारसंस्थानो
पपत्तेः वाचारंभणं विकारो नामधेयं मृत्तिकेत्येव सत्यमेवं सदेव सत्यमिति श्रुतेरेकमेवाद्वितीयं परमार्थतः इदंबु
द्धिकालेपि। तत्सदैक्षत ईक्षां ईक्षणं दर्शनं कृतवत्तदतश्च न प्रधानं सांख्यपरिकल्पितं जगत्कारणं प्रधान
स्याचेतनत्वात्कल्पगमा इदं तु सच्चेतनमीक्षितृत्वात् तत्कथमैक्षत इत्याह। बहु प्रभूतं स्यां भवेयं प्रजायेय प्रक
र्षेणोत्पद्येय। यथा मृद्घटाद्याकारेण। यथा वा रज्ज्वादि सर्पाद्याकारेण बुद्धिपरिकल्पितेन। असदेव तर्हि सर्वं यत्
गृह्यते रज्जुरिव सर्पाद्याकारेण। न। सत एव द्वैतभेदेनान्यथा गृह्यमाणत्वान्नासत्त्वं कस्यचिदि
ति ब्रूमः। यथा सतो न्यद्वस्त्वंतरं परिकल्पयन्पुनस्तस्यैव प्रागुत्पत्तेः प्रध्वंसाच्चोर्ध्वमसत्त्वं ब्रुवते तार्किकाः न तथा
अस्माभिः कदाचित्क्वचिदपि सतोन्यदभिधानमभिधीयते वस्तु वा तदेव तद्यदन्यबुद्ध्या। यथा रज्जुरेव सर्पबुद्ध्या सर्प
इत्यभिधीयते। यथा वा पिंडघटादि मृदोन्यबुद्ध्या पिंडघटादिशब्देनाभिधीयते लोके। रज्जुविवेकदर्शि
नां तु सर्पाभिधानबुद्धी निवर्तेते। यथा च मृद्विवेकदर्शिनां घटादिशब्दबुद्धी तद्वत्सद्विवेकदर्शिनामन्य ५३॥
विकारशब्दबुद्धी निवर्तेते। यतो वाचो निवर्तंते अप्राप्य मनसा सह। अनिरुक्तेऽनिलयने इत्यादिश्रुति
भ्यः। एवमीक्षित्वा तत्तेजोऽसृजत तत्तेजः सृष्टवत्। ननु तस्माद्वा एतस्मादात्मन आकाशः संभूत इति श्रुत्यंतर
आकाशाद्वायुस्ततस्तृतीयं तेजः श्रुतमिह कथं प्राथम्येन। तस्मादेव तेजः सृज्यते। ततः एव
मभिधेयं यत्परिकल्प्यते सदेव तु सर्वमभिधान ६

याकाशमिति विरुद्धं । नैष दोषः आकाशवायुसर्गानंतरं तत्तेजोऽसृजतेति कल्पनोपपत्तेरथवा । विवक्षितं त्विह सृ
ष्टिक्रमः । सत्कार्यमिदं सर्वमतः सदेकमेवाद्वितीयमित्येतद्विवक्षितं मृदादिदृष्टांतादृत्यवा त्रिवृत्करणस्य विव
क्षितत्वात्तेजोबन्नानामेव सृष्टिमाचष्टे । तेज इति प्रसिद्धं लोके दग्धृ पक्तृ प्रकाशकं रोहितं चेति । तत्सृष्टं तेज ऐक्षत
तेजोरूपसंस्थितं सदैक्षतेत्यर्थः बहु स्यां प्रजायेयेति पूर्ववत् तदपोऽसृजत आपो द्रवाः स्निग्धाः स्यंदिन्यः शुक्लाश्चेति
प्रसिद्धा लोके । यस्मात्तेजसः कार्यभूता आपस्तस्माद्यत्र क्व च देशे काले च शोचति संतप्यते स्वेदते प्रस्विद्य
ते वा पुरुषस्तेजस एव तत्तदापोऽधिजायंते । ता आप ऐक्षंत पूर्ववदेवाबाकारसंस्थं सदैक्षतेत्यर्थः बह्व्यः स्याम ।
प्रसूताः स्याम समेव प्रजायेमहि उत्पद्येमहीति । ता अन्नमसृजंत पृथिवीलक्षणं । पार्थिवं ह्यन्नं यस्मा हि
दप्कार्यमन्नं तस्माद्यत्र क्व च वर्षति देवो तत्र तत्रैव भूयिष्ठं प्रभूतमन्नं भवति । अतो अद्भ्य एव तदन्नाद्य
मधिजायते । ता अन्नमसृजंतेति पृथिव्युक्ता पूर्वमिह तु दृष्टांते अन्नं च तदाद्यं चेति विशेषणा[illegible]द्व्रीहियवाद्य
च्यते अन्नं च गुरु स्थिरं धारणं कृष्णं च रूपतः प्रसिद्धं । ननु तेजःप्रभृतिषु ईक्षणं न गम्यते । हिंसादिप्रति
षेधाभावात् त्रासादिकार्यानुपलंभाच्च । तत्र कथं तत्तेज ऐक्षतेत्यादि । नैष दोषः । ईक्षितृकारणपरि
णामित्वात्तेजःप्रभृतीनां सत एवेक्षितुर्नियतक्रमविशिष्टकार्योत्पादकत्वाच्च तेजःप्रभृती हि तत ऐक्षि
तृवदुच्यते । ननु सतोऽप्युपचरितमेवेक्षितृत्वं । न । सदीक्षणस्य केवलशब्दगम्यत्वान्न शक्यमुपचरितं कल्प
यितुं । तेजःप्रभृतीनां चानुमीयते मुख्येक्षणाभावादित्युक्तमुपचरितं कल्पयितुं । ननु सतोऽपि मृद्वत्कारणत्वा
दचेतनत्वं शक्यमनुमातुं अतः प्रधानस्यैवाचेतनस्य सतश्चेतनार्थत्वान्नियतकालक्रमविशिष्टकार्योत्पाद
कत्वाच्च तत ऐक्षत तेज ऐक्षतेति शक्यमनुमातुं मुख्यमुपचरितमेवेक्षणं । दृष्टश्च लोके ऽचेतने चेतनवदुपचारो यथा
कूलं पिपतिषतीति तद्वत्सतोऽपि न्याय्यं स्यात् । न । तत्सत्यं स आत्मेति तस्मिन्नात्मोपदेशादात्मोपदेशो ह्युपप

रितइतिचेद्यथाममात्माभद्रसेन इति सर्वार्थकारिण्यनात्मन्यात्मोपचारस्तद्वन्मसदस्मीति सत्यत्वात्सिसंघ
स्यतस्यतावदेवचिरमितिमोक्षोपदेशाद्द। सोप्युपचार इतिचेत्प्रधानान्मनोसिसंबंधस्य मोक्षसामीप्यंवर्त्तं। तइति
मोक्षोपदेशोप्युपचरितएवयथालोके ग्रामंगंतुंप्रस्थितः प्राप्तवानहंग्राममितिब्रूयात्त्वरापेक्षयातद्वन्नयेनेअ विज्ञातेन
विज्ञातंविज्ञातंभवती। उपक्रमात्तस्यैकस्मिन्विज्ञाते सर्वंविज्ञातंभवतितदनन्यत्वात्सर्वस्याद्वितीयवचनाच्च। नचा
न्यद्विज्ञातव्यमवशिष्टंश्रावितंश्रुत्यान्तुमेयंवालिंगतोस्ति'येनमोक्षोपदेशोऽकपा। वरितस्या सर्वस्यचप्रपाठकार्थ
स्योपचरितचपरिकल्पनायांवृथाश्रमःपरिकल्पयितुःस्यात्पुरुषार्थसाधनविज्ञानस्यतर्केणैवाधिगतत्वात्त
स्य'तस्माद्वेदप्रामाण्यान्नयुक्तःश्रुतार्थपरित्यागोऽतश्चेतनावत्कारणंजगतइतिसिद्धं॥ ॥तेषांजीवाविष्टानां
खल्वेषांपक्ष्यादीनांभूतानामेषामितिप्रत्यक्षनिर्देशान्नतुतेजःप्रभृतीनां। तेषांत्रिवृत्करणस्यवक्ष्यमाणत्वादस
तित्रिवृत्करणेप्रत्यक्षनिर्देशानुपपत्तेर्देवताशब्दप्रयोगाच्चतेजःप्रभृतिषुइमास्तिस्रोदेवताइतितस्मात्तेषांखल्वेषां
भूतानांपक्षिपशुस्थावरादीनांत्रीण्येवनातिरिक्तानिबीजानिकारणानिभवंति। कानितान्युच्यंते आंडजमंडाज्जातं
अंडजमेवांडजंपक्ष्यादिपक्षिसर्पादिभ्योहिपक्षिसर्पादयोजायमानादृश्यंतेतेनपक्षीपक्षिणांबीजंसर्पःसर्पाणां। त
थान्यदप्यंडाज्जातंतज्जातीयानांबीजमित्यर्थः। नन्वंडाज्जातमंडजमुच्यतेऽतोंऽडमेवबीजमितियुक्तंकथमंडजंबीजमि
त्युच्यते। सत्यमेवंस्याद्यदित्वदिच्छातंत्राश्रुतिःस्यात्तंत्रातुश्रुतिःयतआहांडजादेवबीजंनांडादीतिदृश्यते
तिचांडजाद्यवतावत्तज्जातीयसंतत्यवाविनांडाद्यवांतराभावेऽतोंडजादीन्येवबीजान्यंडजादीनांतथाजीवाज्जातंजीवजं
जरायुजमित्यर्थःयेतत्पुरुषपश्वादयःउद्भिज्जमुद्भिनत्तीत्युद्भित्स्थावरंततोजातमुद्भिज्जंधानावोद्भित्ततोजायतइ
त्युद्भिज्जंस्थावरबीजंस्थावराणांबीजमित्यर्थः। स्वेदजसंशोकजयोरंडजोद्भिज्जयोरेवयथासंभवमंतर्भावः ॥५४५
वंचावधारणंत्रीण्येवबीजानीत्युपपन्नंभवति। सेयंप्रकृतासदाख्यातेजोबन्नयोनिर्देवतोदैक्षतेक्षितवती
यथापूर्वंबहुस्यामिति। तदेवबहुभवनंप्रयोजनंनाद्यापिनिर्वृत्तमित्यतःईक्षांपुनःकृतवतीबहुस्व

छां

नमेव प्रयोजनमूरीकृत्य कथं। हंतेदानीमहमिमा यथोक्तास्तेजआबन्नास्तिस्रो देवता अनेन जीवेनेति स्वबुद्धि
स्थं पूर्वसृष्ट्यनुभूतप्राणधारणमात्मानमेव स्मरंत्याह अनेन जीवेनात्मनेति। प्राणधारणकर्त्रात्मनेति वचना
त्स्वात्मनोऽव्यतिरिक्तेन चैतन्यस्वरूपतयाविशिष्टेनेत्येतद्दर्शयति। अनुप्रविश्य तेजोबन्नभूतमात्रासंसर्गेण
लब्धविशेषविज्ञाना सती नाम च रूपं च नामरूपे व्याकरवाणि विस्पष्टमाकरवाणि। असौनामायमिदंरूप इति
व्याकुर्यामित्यर्थः। ननु न युक्तमिदमसंसारिण्याः सर्वज्ञाया देवताया बुद्धिपूर्वकमनेकशतसहस्रानर्था
श्रयं देहमनुप्रविश्य दुःखमनुभविष्यामीति संकल्पनमनुप्रवेशश्च स्वातंत्र्ये सति। सत्यमेवं न युक्तं स्या
द्यदि स्वेनैवाविकृतेन रूपेणानुप्रविशेयं दुःखमनुभवेयमिति संकल्पितवती। न त्वेवं। कथं तर्हि। अनेन
जीवेनात्मनानुप्रविश्येति वचनात्। जीवो हि नाम देवताया आभासमात्रं बुद्ध्यादिभूतमात्रासंसर्गजनित आ
दर्श इव प्रविष्टः पुरुषप्रतिबिंबो जलादिष्विव च सूर्यादीनाम् अचिंत्यानंतशक्तिमत्या देवताया बुद्ध्यादिसंबंध ता८
श्चैतन्याभासो देवतास्वरूपविवेकाग्रहणनिमित्तः सुखी दुःखी मूढ इत्याद्यनेकविकल्पप्रत्ययहेतुः। छायामा
त्रेण जीवरूपेणानुप्रविष्टत्वाद्देवता न दैहिकैः स्वतः सुखदुःखादिभिः संबध्यते। यथा पुरुषादित्यादय आदर्शोदका
दि छायामात्रेणानुप्रविष्टा आदर्शोदकादिदोषैर्न संबध्यंते। तद्वद्देवतापि। सूर्यो यथा सर्वलोकस्य चक्षुर्न लिप्यते
चाक्षुषैर्बाह्यदोषैः। एकस्तथा सर्वभूतांतरात्मा न लिप्यते लोकदुःखेन बाह्यः। आकाशवत्सर्वगतश्च नित्य इति
हि काठके। ध्यायतीव लेलायतीवेति च वाजसनेयके। ननु छायामात्रश्चेज्जीवो मृषैव प्राप्तः। तथा परलोकेहलोका
दिकं तस्य। नैष दोषः। सदात्मना सत्यत्वाभ्युपगमात्। सर्वं च नामरूपादि सदात्मनैव सत्यं विकारजातं। स्वतस्त्व
नृतमेव वाचारंभणं विकारो नामधेयमित्युक्तत्वात्। तथा जीवोपीति। यक्षानुरूपो बलिरिति हि न्यायप्रसिद्धिर
तः सदात्मना सर्वव्यवहाराणां सर्वविकाराणां च सत्यत्वं। सतोऽन्यत्वे चानृतत्वमिति न कश्चिद्दोषस्तार्किकैरि

हानुबंधंप्रषकंस्राको 'यथेतरेतरविरुद्धार्थं दैतिवाराः स्वबुद्धिविकल्पमात्रा अतत्वनिष्ठा इतिकाक्यं वक्तुं से
वंति सा देवता अनुप्रविश्य स्वात्मावस्थे बीजभूते अव्याकृते नामरूपे व्याकरवाणीति। इदं हितात्तासां च
तिसृणां देवतानामेकैकां त्रिवृतं त्रिवृतं करवाणि एकैकस्यास्त्रिवृत्करणे एकैकस्याः प्राधान्यं द्वयोर्द्वयोर्गु
णभावोऽन्यथा हि रज्ज्वा इव एकगुणमेव त्रिवृत्करणं स्यान्न तु तिसृणां पृथक् पृथक् त्रिवृत्करणमित्येवं हि तेजोबन्ना
नां पृथङ्नामप्रत्ययलाभः स्यात्तेज इदमिमा आपोऽन्नमिदमिति च। सति च पृथङ्नामप्रत्ययलाभे देवतानां स
म्यग्व्यवहारप्रसिद्धिः प्रयोजनं स्यादेवमीक्षित्वा सेयं देवतेमास्तिस्रो देवता अनेनैव यथोक्तेनैव जीवेन
सूर्यबिंबवदंतः प्रविश्य वैराजं पिंडं प्रथमं देवादीनां च पिंडाननुप्रविश्य यथासंकल्पमेव नामरूपे व्याकरोत्
सोनामायमिदंरूप इति। तासां च देवतानां गुणप्रधानभावेन त्रिवृतं त्रिवृतमेकैकामकरोत्कृतवती देवता॥ ति
ष्ठतु तावद्देवतादिपिंडानां नामरूपाभ्यां व्याकृतानां तेजोबन्नमयत्वेन त्रिधात्वं यथा तु बहिरिमाः पिंडेभ्यस्तिस्रो
१० कै देवतास्त्रिवृत्त्रिवृदेकैका भवति तन्मे मम निगदतो विजानीहि विस्पष्टमवधारयोदाहरणतः। यत्तद्देवतानां त्रिवृत्क
रणमुक्तं तस्यैवोदाहरणमुच्यते। उदाहरणं नामैकदेशप्रसिद्ध्याऽशेषप्रसिद्ध्यर्थमुदाह्रियत इति। तदेतदाह
यदग्नेस्त्रिवृत्कृतस्य रोहितं रूपं प्रसिद्धं लोके। तदत्रिवृत्कृतस्य तेजसो रूपमिति विद्धि। तथा यच्छुक्लं रूपमग्नेरेव
तदपामत्रिवृत्कृतानां। यत्कृष्णं तस्यैवाग्ने रूपं तदन्नस्य पृथिव्या अत्रिवृत्कृताया इति विद्धि। तत्रैवं रूपत्रयव्यतिरे
केणाग्निरिति यन्मन्यसे च। तस्याग्नेरग्नित्वमिदानीमपागादपगतं। प्राग्रूपत्रयविवेकविज्ञानाद्यग्निबुद्धि
रासीत्ते। साग्निबुद्धिरपगताग्निशब्दश्चेत्यर्थः। यथा दृश्यमानरक्तोपधानसंयुक्तः स्फटिकोऽगृह्यमाणः प
द्मरागोऽयमिति शब्दबुद्ध्योः प्रयोजको भवति। प्रागुपधानस्फटिकयोर्विवेकविज्ञानात्तद्विवेकविज्ञाने तु प
द्मरागशब्दबुद्धी निवर्त्तेते तद्विवेकविज्ञातुस्तद्वत्। ननु किमत्र बुद्धिशब्दकल्पनया क्रियते। प्राग्रूपत्रय
विवेककरणादग्निरेवासीत्तदग्नेरग्नित्वं रोहितादिरूपविवेककरणादपागादिति युक्तं। यथा तंतुपकर्षणे पटा ॥५५॥

भावो नैव। बुद्धिग्राह्यमात्रमेव ह्यग्निर्यत्तदाह। वाचारंभणमग्निर्नाम विकारो नामधेयं नाममात्रमित्यर्थो आतो ऽग्नि
बुद्धिरपि कृषेव। किं तर्हि तत्र सत्यं। त्रीणि रूपाणीत्येव सत्यं नाणुमात्रमपि रूपत्रयव्यतिरेकेणास्ति सत्यमस्तीत्यव
धारणार्थः। तथा यदादित्यस्य यच्चंद्रमसो यद्विद्युत इत्यादि समानं। न्नलु यथा तु खलु सौम्येमास्तिस्रो देवतास्त्रि
वृत्त्रिवृदेकैका भवति तन्मे विजानीहीत्युक्त्वा तेजस एव खलु त्रिरप्युदाहरणैरग्न्यादिभिस्त्रिवृत्करणं प्रदर्शितं। ना
बंनयोरुदाहरणं दर्शितं। त्रिवृत्करणे ऽप्यदोऽबंनविषयाण्युदाहरणान्येवमेव चेद्रष्टव्यानीति मन्यते श्रुतिः।
तेजसत्ता लक्षणमुपलक्षणार्थं मूर्तरूपत्वात्। विस्पष्टार्थत्वोपपत्तेश्च। गंधरसयोरनुदाहरणं त्रयाणामसंभवान्न हि गंधरसौ
सि तेजोऽस्त्वः। शब्दस्पर्शयोरनुदाहरणं विभागेन दर्शयितुमशक्यत्वाद्यादि सर्वं जगत्त्रिवृत्कृतमित्यग्न्यादिवत्त्रीणि रूपाणि
त्येव सत्यमग्नेरग्नित्ववदपागाज्जगतो जगत्त्वं। तथान्नस्याप्यप्शुंगत्वादप इत्येव सत्यं वस्त्येवं वाचारंभणमात्रमन्नं। त
थापामपि तेजःशुंगत्वाद्वाचारंभणत्वं तेज इत्येव सत्यं तेजसोऽपि सच्छुंगत्वाद्वाचारंभणत्वं। सदित्येव सत्यमित्येषोऽर्थो विव
क्षितो। ननु वाय्वंतरिक्षे तु त्रिवृत्कृते तेजःप्रभृतिष्वनंतर्भूतत्वादवशिष्येते एवं गंधरसशब्दस्पर्शाश्चावशिष्टाः। इति
विज्ञाते कथं सता विज्ञातेन सर्वमन्यदविज्ञातं विज्ञातं भवेत्तद्विज्ञाते तेनैव प्रकारांतरं वाच्यं। नैष दोषो रूपवद्द्रव्ये सर्वस्य दर्शनात्। कथं
तेजसि तावद्रूपवति शब्दस्पर्शयोरप्युपलंभाद्वाय्वंतरिक्षयोस्तत्र स्पर्शशब्दगुणवतोः सद्भावोऽनुमीयते। तथा बन्न
योरूपवतो रसगंधयोस्तत्र सर्वस्वेति रूपवतां त्रयाणां तेजोबन्नानां त्रिवृत्करणप्रदर्शनेन सर्वं तदंतर्भूतं। सद्विकारत्वात्त्र
यवद्रूपाण्यपि विज्ञातं मन्यते श्रुतिर्न हि मूर्तं रूपवद्द्रव्यं प्रत्याख्याय वाय्वाकाशयोस्तद्गुणयोर्गंधरसयोर्वा ग्रहणम
कर४ स्ति। अथवा रूपवतामपि त्रिवृत्करणं प्रदर्शनार्थमेव मन्यते श्रुतिः। यथा तु त्रिवृत्कृते त्रीणि रूपाणीत्येव सत्य
यं तथा पंचीकरणेऽपि समानो न्याय इत्यतः सर्वस्य सद्विकारत्वात् सता विज्ञातेन सर्वमिदं विज्ञातं स्यात् सदेकमेवा
द्वितीयं सत्यमिति सिद्धमेव भवति। तदेतदेकस्मिन्सति विज्ञाते सर्वमिदं विज्ञातं भवतीति वह्न्यादौ तदेतद्विद्वांसो
विदितवंतः पूर्वे इति श्रुतिमाहात्म्यार्थं महाशाला महाश्रोत्रिया आहुः ह स्म वै किल किमुक्तवंत इत्याह। न नोऽस्माकं कुले

घेदानीं यथोक्तविज्ञानवतां कश्चन न कश्चिदश्रुतममतमविज्ञातमुदाहरिष्यतीति नोदाहरिष्यति। सर्वं विज्ञातमे
वास्मत्कुलीनानां सद्विज्ञानवत्त्वादित्यभिप्रायः। ते पुनः कथं सर्वं विज्ञातवन्त इत्याह। एभ्यस्त्रिभ्यो रोहितादि
रूपेभ्यस्त्रिवृत्कृतेभ्यो विज्ञातेभ्यः सर्वमप्यन्यच्छिष्टमेवमेवेति वि॰दांचक्रुर्विज्ञातवन्तो यस्मात्तस्मात्सर्वज्ञा
एव सद्विज्ञानात्पूर्व आसुरित्यर्थः। अथवैभ्यो विदांचक्रुरित्यग्न्यादिभ्यो दृष्टान्तेभ्यो विज्ञातेभ्यः सर्वमन्यदपि विदां
चक्रुरित्येतत्कथं। यदन्यद्रूपेण संदिह्यमानं कपोतादिरूपं रोहितमिव यद्गृह्यमाणमभूत्तेषां पूर्वे
षां ब्रह्मविदां तत्तेजसो रूपमिति विदांचक्रुस्तथा यच्छुक्लमिवाभूद्गृह्यमाणं तदपां रूपं। यत्कृष्णमिव गृह्यमाणं तदन्न
स्येति विदांचक्रुरेवमेवात्यंतदुर्लक्ष्यं यदु अप्यविज्ञातमिव विशेषतोऽगृह्यमाणमभूत्तदप्येतासामेव तिसृ
णां देवतानामेव समासः समुदाय इति विदांचक्रुरेवं तावद्बाह्यं वस्त्वग्न्यादिवद्विज्ञातं। तथेदानीं यथा नु खलु हे सो
म्येमास्तिस्रो यथोक्ता देवताः पुरुषं शिरःपाण्यादिलक्षणं कार्यकरणसंघातं प्राप्य पुरुषेणोपयुज्यमानास्त्रि
वृत्त्रिवृदेकैका भवतीति। तन्मे विजानीहि निगदत इत्युक्त्वा आह। अन्नमशितं भुक्तं त्रेधा विधीयते जाठरेणाग्निना
पच्यमानं त्रिधा विभज्यते। कथं तस्यान्नस्य त्रिधा विधीयमानस्य यः स्थविष्ठः स्थूलतमो धातुः स्थूल
तमं वस्तु विभक्तस्य तत्पुरीषं भवति। यो मध्यमो धातुः तद्रसादिक्रमेण परिणम्य
मांसं भवति। योऽणिष्ठोऽणुतमो धातुः स ऊर्ध्वं हृदयं प्राप्य सूक्ष्मासु हिताख्यासु नाडीष्वनुप्रविश्य वागादिकर
णसंघातस्य स्थितिमुत्पादयन्मनो भवति। मनोरूपेण विपरिणमन्मनस उपचयं करोति। तस्मादन्नोपचि
तत्वान्मनसो भौतिकत्वमेव न वैशेषिकतंत्रोक्तलक्षणं नित्यं निरवयवं चेति गृह्यते। यदपि मनोऽस्य दैवं च
क्षुरिति वक्ष्यति तदपि न नित्यत्वापेक्षया। किं तर्हि सूक्ष्मव्यवहितविप्रकृष्टादिसर्वेन्द्रियविषयव्यापकत्वापेक्ष ॥५६॥
या यच्चानित्येंद्रियापेक्षया नित्यत्वं तदप्यापेक्षिकमेवेति वक्ष्यामः। सदेकमेवाद्वितीयमिति श्रुतेः। तथा
पः पीतास्त्रेधा विधीयंते। तासां यः स्थविष्ठो धातुस्तन्मूत्रं भवति। यो मध्यमस्तल्लोहितं भवति। योऽणिष्ठो रसः

सप्राणोभवति।वक्ष्यतिह्यापोमयःप्राणोनपिबतोविच्छेत्स्यतइतितथातेजोशितंतैलघृतादितद्धितंत्रे
धाविधीयतेतस्ययःस्थविष्ठोधातुस्तदस्थिभवति।योमध्यमःसमज्जा॥अस्थ्यंतर्गतःस्नेहो।योणि
ष्ठःसावाक्तैलघृतादिभक्षणाद्धिवाग्विशदाभाषणसमर्थाभवतीतिप्रसिद्धंलोके।यतएवंअन्नमयं
हिसोम्यमनआपोमयःप्राणस्तेजोमयीवाक्।ननुकेवलान्नभक्षिणआखुप्रभृतयोवाग्मिनःप्राणवंतश्च।
तथाब्मात्रभक्ष्याःसामुद्रामीनमकरप्रभृतयोमनस्विनोवाग्मिनश्च।तथास्नेहपायिनामपिप्राणवत्त्वंमन
स्वित्वंवानुमेयं।यदिसंति।तत्रकथंअन्नमयंहिसोम्यमनइत्याद्युच्यते।नैषदोषः।सर्वस्यत्रिवृत्कृतत्वात्स
र्वत्रसर्वोपपत्तेः।नह्यत्रिवृत्कृतमन्नमश्नातिकश्चिदापोवाअत्रिवृत्कृताःपीयंते।तेजोवाअत्रिवृत्कृतमश्नाति
कश्चिदित्यन्नादानामाखुप्रभृतीनांवाग्मित्वंप्राणवत्त्वंचेत्याद्यविरुद्धं।इत्येवंप्रत्यायितःश्वेतकेतुराह
भूयएवपुनरेवमामांभगवानन्नमयंहिसोम्यमनइत्यादिविज्ञापयतुदृष्टांतेनावगमयतु।नाद्या
पिममास्मिन्नर्थेसम्यङ्निश्चयोजातो।यस्मात्तेजोबन्नानांमयत्वेनाविशिष्टेदेहएकस्मिन्नुपयुज्यमा
नान्यन्नाप्तेजांस्यणिष्ठानुरूपेणमनःप्राणवाचमुपचिन्वंतीतिस्वजात्या।नतिक्रमेणेतिदुर्विज्ञेयमि
त्यभिप्रायो।तस्यएवंव्याघाह।तमेवमुक्तवंतंतथास्तुसोम्येतिहोवाचपिता॥शृणुतत्रदृष्टांतंयथैतदु
पपद्यतेयस्त्वमसि।दध्नःसोम्यमथ्यमानस्ययोणिमाअणुभावःसऊर्ध्वःसमुदीषतिसंभूयोर्ध्वंनवनीतभावं
नगच्छति।तत्सर्पिर्भवति।यथायंदृष्टांतःएवमेवखलुसोम्यान्नस्याद्यमानस्यभुज्यमानस्यौ
दर्येणाग्निनावायुसहितेनखजेनेवमथ्यमानस्ययोणिमासऊर्ध्वःसमुदीषतितन्मनोभवति।मनोव
स ६२ यवैःसंयुक्तमनउपचिनोतीत्यर्थः।अपांसोम्यपीयमानानांयोणिमासऊर्ध्वःसमुदीषति।सप्रा
णोभवती।एवमेवखलुसोम्यतेजसोश्यमानस्ययोणिमासऊर्ध्वःसमुदीषतिसावाग्भवत्यन्नं

न तो

हि सोम्य मन आपोमयः प्राणस्तेजोमयी वागिति युक्तमेवमयोक्तमित्यभिप्रायोऽतः सर्वमेवं मनस्त्वं न मयमित्यत्र नै
कांतेन मम निश्चयो जातोऽतो भूय एव मा भगवान्मनसोऽन्नमयत्वं दृष्टांतेन विज्ञापयत्विति। तथा सोम्येति होवाच पिता॥
अंनस्य भुक्तस्य योऽणिष्ठो धातुः स मनसि शक्तिमधात्। साऽन्नोपचिता मनसः शक्तिः षोडशधा प्रविभज्य पुरुषस्य कला
त्वेन निर्दिदिक्षिता। तया मनस्यन्नोपचितया शक्त्या षोडशधा प्रविभक्तया संयुक्तस्तद्वान्कार्यकरणसंघातल
क्षणो जीवविशिष्टः पुरुषः षोडशकल उच्यते। यस्यां सत्यां द्रष्टा श्रोता मंता बोद्धा कर्ता विज्ञाता सर्वक्रियासमर्थः पु
रुषो भवति हीयमानायां च यस्यां सामर्थ्यहानिर्वक्ष्यति चान्नस्यायी द्रष्टेत्यादि। सर्वस्य कार्यकरणस्य सामर्थ्यं म से
नःकृतमेव मानसेन हि बलेन संपन्ना बलिनो दृश्यंते लोके। ध्यानाहाराश्च केचिदन्नस्य सर्वात्मकत्वादतोऽन्नकृतं मानसं
वीर्यं षोडशकला यस्य पुरुषस्य सोऽयं षोडशकलः पुरुषः एतच्च श्रद्धत्स्व यदि कर्तुमिच्छसि। पंचदशसंख्याकान्यहानि मा
शीरशनं मा कार्षीः। काममिच्छातोऽपः पिब। यस्मादपः पिबतोऽपस्ते प्राणो न विच्छेत्स्यत इति न विच्छेदमापत्स्यते। यस्मादा
पोमयो विकारः प्राण इत्यवोचाम। नहि कार्यं स्वकारणोपष्टंभमंतरेणाविच्छिद्यमानं स्थातुमुत्सहते। स हैवं श्रुत्वा मानसो
ऽन्नमयत्वं प्रत्यक्षीकर्तुमिच्छन्पंचदशाहानि नाशीरशनं न कृतवानथ षोडशेऽहनि हैनं पितरमुपससादोपगतवानुपग
म्योवाच किं ब्रवीमि भो इति। इतर आह। ऋचः सोम्य यजूंषि सामान्यधीष्वेत्येवमुक्तः पित्राह। न वै मा मां तान्यृगादीनि प्रतिभां
ति। मम मनसि न दृश्यंत इत्यर्थो हे भो भगवन्निति। तमेवमुक्तवंतं पितोवाच। शृणु तत्र कारणं येन ते तान्यृगादीनि न प्रतिभां
ति। तं होवाच यथा लोके हे सोम्य महतोऽभ्याहितस्य परिमाणस्याप्याहितस्योपचितस्येंधनैरग्नेरेकोंगारः खद्योतमात्रः ख
द्योतमात्रपरिमाणः शांतस्य परिशिष्टोऽवशिष्टः स्याद्भवेत्। तेनांगारेण ततोऽपि तत्परिमाणादीषदपि न बहु दहेदेव
मेव खलु सोम्य ते तवान्नोपचितानां षोडशानां कलानामेका कलावयवोऽवतिष्टाऽवशिष्टा स्यात्तया त्वं ख ५७॥
द्योतमात्रांगारतुल्ययैतर्हीदानीं वेदान्नानुभवसि न प्रतिपद्यसे। श्रुत्वा चैवमेव मम वाक्यमथान्नं मे विज्ञास्यस्यशा
नं भुंक्ष्व तावत्स ह तथैवाशाशितवान्। तथानंतरं हैनं पितरं शुश्रूषुरुपससाद। तं होपागतं पुत्रं यत्किंचर्ग

नौ हि

दित्युपपन्नमयं यथारूपमर्थं जातवान्पिता । स ह श्वेतकेतुः सर्वं हैव तत्प्रतिपेदे अगाद्यर्थेनाग्रे यत तस्य । तं होवाच मुनि
:पिता । यथा सोम्य महतोऽभ्याहितस्येत्यादि समानमेकमंगारं खद्योतमात्रं परिशिष्टं । तं तृणै
श्चूर्णैश्चोपसमाधाय प्राज्वालयेद्यथा तेनेद्धेनांगारेण ततोपि बहुपरिमाणात्कुर्यादेवं सोम्या न कृत्स्ना
नां सामर्थ्यरूपाणामेका षोडशकलातिशिष्टाभूदिति । शिष्टासीत्संवदन्या हानि असुक्तवतए कैकेनान्नेनैकाकला
चंद्रमस इवापरपक्षे क्षीणासा तिष्ठति शिष्टा कलात वान्नेन तु तेनोपसमाहिता वर्द्धिता प्रचिता प्राज्वालीद्दीर्घ छांद
सं प्राज्वलिता वर्द्धितेत्यर्थः प्राज्वालीदिति वा पाठांतरं तदान्नेनोपसमाहिता स्वयं प्रज्वलितवतीत्यर्थः । तयेदानीं
यावर्द्धितयैतर्हि वेदाननुभवस्युपलभस एवं व्याहृत्यनुवृत्तिस्यामन्नमयत्वं मनसः सिद्धमित्यु
पसंहरति अन्नमयं हि सोम्य मन इत्यादि । यथैतन्मनसोऽन्नमयत्वं तव सिद्धं । तथाऽऽपोमयः प्राणस्तेजोम
यी वागित्येतदपि सिद्धमेवेत्यभिप्रायः । तदेतद्धास्य पितुरुक्तं मनआदीनां मन्नादिमयत्वं विजज्ञौ विज्ञातवान्
श्वेतकेतुरित्यस्याः त्रिवृत्करणप्रकरणसमाप्त्यर्थः ॥७॥ यस्मिन्मनसि जीवेनात्मनानुप्रविष्टः परा देवता
दर्शादिव पुरुषः प्रतिबिंबेन जलमिव सूर्यादिः प्रतिबिंबेस्तन्मनोऽन्नमयं तेजोऽम्मयाभ्यां वाक्प्रा
णाभ्यां संसक्तमधिगतं यन्मयोयस्तच्छजीवो मननदर्शनश्रवणादिव्यवहाराय कल्पते । तदुपरमे च स्वं
देवतारूपमेव प्रतिपद्यते । तदुक्तं श्रुत्यंतरे । ध्यायतीव लेलायतीव सधीः स्वप्नो भूत्वेमं लोकमतिक्रामति ।
स वा अयमात्मा ब्रह्म विज्ञानमयो मनोमय इत्यादि । स्वप्नान्तरादिरमीह्यादि प्राणन्नेव प्राणो भवतीत्यादि तस्या
स्य मनःस्थस्य मनआख्यां गतस्य मनउपरमद्वारेणेंद्रियविषयेभ्यो विनिवृत्तस्य यस्यां परस्यां देवतायां
स्वात्मस्वरूपभूतायां यदवस्थानं । तत्पुत्रायाप्य विरव्यासुरुद्दालको ह किल आरुणिः श्वेतकेतुं पुत्रमुवाचोक्त
वान् स्वप्नांतं स्वप्नमध्यं स्वप्नप्रदर्शनवृत्तिः स्वप्नस्थान रव्या । तस्य मध्यं स्वप्नांतं तस्यासुषुप्तमित्येतदथवा स्व

न्तं स्वप्नसतत्त्वमित्यर्थः। तत्राप्यर्थात् सुषुप्तमेव लभ्यते। स्वमपीतो भवतीति वचनान्न ह्यन्यत्र सुषुप्तात् स्व
मपीतिं जीवस्येच्छन्ति ब्रह्मविदः तत्र स्वादर्शोपनये पुरुषप्रतिबिंब आदर्शं गतो यथा स्वमेव पुरुषमपीतो भव
त्येवं मन आख्यपरमेवैतस्य प्रतिबिंबरूपेण जीवेनात्मनानु मनसि प्रविष्टा नामरूपव्याकरणाय परा दे
वता सा स्वमेवात्मानं प्रतिपद्यते जीवरूपतां मन आख्योपाधिकृतां हित्वा तः सुषुप्त एव स्वप्नान्तं नाम्नाभिवाच्य इति अवगम्य
ते यत्र तु सुषुप्तः स्वप्नान् पश्यति तत्स्वप्नान्तं दर्शनं सुखदुःखसंयुक्तमिति पुण्यापुण्यकार्यं। पुण्यापुण्ययो
र्हि सुखदुःखारम्भकत्वं प्रसिद्धं। पुण्यापुण्ययोश्चाविद्याकामोपष्टंभेनैव सुखदुःखतद्दर्शनकार्यारम्भकत्व
मुपपद्यते नान्यथेत्यविद्याकामकर्मभिः संसारहेतुभिः संयुक्त एव स्वप्न इति न स्वमपीतो भवति। अनन्वा
गतं पुण्येनानन्वागतं पापेन तीर्णो हि तदा सर्वान् शोकान् हृदयस्य भवति। तद्वा अस्यैतदतिच्छंदा एष परमा
नंद इत्यादिश्रुतिभ्यः सुषुप्त एव स्वं देवतारूपं जीवत्वविनिर्मुक्तं दर्शयिष्यामीत्याह स्वप्नान्तमेव निगदतो हे
म्यवि जानीहि विस्पष्टं मे वचनादवधारयेत्यर्थः। कदा स स्वप्नान्तो भवतीत्युच्यते। यत्र यस्मिन्काले एतन्नाम भ
वति पुरुषस्य स्वपतः प्रसिद्धं हि लोके स्वपितीति। गौणं चेदं नामेत्याह। यदा स्वपितीत्युच्यते पुरुषस्तदा
तस्मिन्काले सता सदाख्यया प्रकृतया देवतया संपन्नो भवति संगत एकीभूतो भवति मनसि
प्रविष्टं मन आदिसंसर्गकृतं जीवरूपं परित्यज्य स्वं सद्रूपं सत्यं परमार्थं स्वमपीतोऽपिगतो भवति अत
स्तस्मात् स्वपितीत्येनमाचक्षते लौकिकाः। स्वमात्मानं ह्यपीतो भवति यस्मादपीतो भवती। गुणनामप्रसिद्धितोपि स्वा
त्मप्राप्तिर्गम्यत इत्यभिप्रायः। कथं पुनर्लौकिकानां प्रसिद्धा स्वात्मसंपत्तिर्जाग्रच्छ्रमनिमित्तोद्भवत्वात् स्वाप ॥५८॥
स्येत्याह। जागरिते हि पुण्यापुण्यनिमित्तसुखदुःखाद्यनेकायासानुभवाच्छ्रान्तो भवति तस्मादनांकरणा
नामनेकव्यापार। निमित्तम्लानानां स्वव्यापारेभ्य उपरमो भवति। श्रुतेश्च श्राम्यत्येव वाक् श्राम्यति
चक्षुरित्येवमादि। तथाच गृहीता वाग्गृहीतं चक्षुर्गृहीतं श्रोत्रं गृहीतं मन इत्येवमादीनि करणानि प्राणा

स्वाप ३

प्रग्रस्तानिद्राणएवैकोऽस्तंतोदेहेकुलायेयोजागर्त्ति। तदाजीवत्वमापन्नुत्तयेत्स्वंदेवतारूपमात्मानंप्रतिप
द्यते। नान्यत्रस्वरूपावस्थानाछ्रमापनोदः स्यादितियुक्तंप्रसिद्धिर्लौकिकानांस्वंह्यपीतोभवतीति। दृश्य
तेहिलोकेज्वरादि॰रोगग्रस्तानांतद्विनिर्मोकेस्वात्मस्थानांविश्रमणंनांतद्वदिहापिस्यादितियुक्तं। तद्यथा
श्येनोवासुपर्णोवाविपरिपत्यश्रांतःइत्यादिश्रुतेः। तत्रायंदृष्टांतोयथोक्तोर्थे। सयथाशकुनिःपक्षीवा
शकुनिघातकस्यहस्तगतेनसूत्रेणप्रबद्धःपाशितोदिशंदिशंप्रतिबंधनमोक्षार्थीसन्प्रतिदिशंप्रतिपतित्वान्य
त्रबंधनादायतनमाश्रयंविश्रमणायाऽलब्ध्वाऽप्राप्यैवबंधनमेवोपश्रयते। एवमेवयथायंदृष्टांतःख
लुयौहेसोम्यतन्मनस्तत्प्रकृतंषोडशकलमन्नोपचितंमनोनिर्धारितंतत्प्रविष्टस्तेनैवस्तदुपलक्षितोजीव
स्तन्मनइतिनिर्दिश्यते। मंचाक्रोन्नानवस्समनत्वात्श्चोपाधिर्जीवोऽविद्याकामकर्मोपदिष्टांदिशंसुखदुः
खादिलक्षणांजाग्रत्स्वप्नयोःपतित्वागत्वाऽनुभूयेत्यर्थोऽन्यत्रसदाख्यात्स्वात्मनआयतनंविश्रमणस्थान
स्य अलब्ध्वाप्राणमेवप्राणेनसर्वकार्यकरणाश्रयेणोपलक्षिताप्राणइत्युच्यतेसदाख्यापरादेवता। प्रा
णस्यप्राणं। प्राणशरीरोभारूपइत्यादिश्रुतेरतस्तांदेवतांप्राणाख्यामेवोपश्रयते। प्राणोबंधनंयस्य
मनसः। तथाप्राणबंधनंहियस्मात्हेसोम्यमनःप्राणोपलक्षितदेवताश्रयंमनइतितदुपलक्षितोजी
वस्तत्रैवस्वपितीतिनामप्रसिद्धिद्वारेणयज्जीवस्यसत्यंस्वरूपंजगतोमूलंतत्पुत्रस्यदर्शयित्वाऽहाऽन्नादि
कार्यकारणपरंपरयापिजगतोमूलंसद्दिदर्शयिषुरशनापिपासेऽरुचिमिच्छाऽशनायापलोपेनपातुमि
च्छापिपिपासा। तेअशनापिपासे। अशनापिपासयोःसतत्वंविजानीहीतियस्मिन्कालेएतन्नाम
पुरुषोभवतीति। किंतद्विशिष्टमिच्छतीति। तदातस्यपुरुषस्यकिंनिमित्तंनामभवतीत्याह।
यत्रास्यपुरुषेणाशितमन्नंकठिनंपीताश्चापोनयंतेद्रवीकृत्यरसादिभावेनविपरिणमयंते। तदासु

क्रमेणान्नं जीर्यति अथ तदस्य पुरुषस्य नामाशिशिषतीति गौणं । जीर्णे ह्यन्ने भोक्तुमिच्छति सर्वो जन्तुः तत्रापामशित
नेतृत्वादशनाया इति नाम प्रसिद्धमित्येतस्मिन्नर्थे यथा गोनायो गा नयतीति गोनाय इत्युच्यते गोपालः त
था अश्वनायोऽश्वान्नयतीति अश्वनायोऽश्वपाल उच्यते पुरुषनायः पुरुषान्नयतीति राजा सेनापतिर्वा एवं त
द्वा अप आचक्षते । लौकिका अशनायेति विसर्जनीयलोपेन तत्रैवं सत्यद्भिः रसादिभावेन नीतेनाशितेनान्नेन नि
ष्पादितमिदं शरीरं वटकणिकाया इव शुङ्गोऽङ्कुरः उदपतितः तत्रैतमिमं शुङ्गं कार्यं शरीराख्यं वटादिशुङ्ग
वदुत्पतितं हे सोम्य विजानीहि किं तत्र विज्ञेयमित्युच्यते शृणु इदं शुङ्गवत्कार्यं शरीरं नामूलं मूलरहितं
न भविष्यतीत्युक्त आह । श्वेतकेतुः यद्येवं समूलमिदं शरीरं वटादिशुङ्गवत्तस्यास्य शरीरस्य क्व मूलं स्यादि
त्युक्तः आह वेदितव्यं पृष्ट आह पिता । तस्य क्व मूलं स्यादन्यत्रान्नादन्नं मूलमित्यभिप्रायः । कथमशितं ह्यन्न
मद्भिर्द्रवीकृतं जाठरेणाग्निना पच्यमानं रसभावेन परिणमते । रसाच्छोणितं शोणितान्मांसं मांसान्मेदो मेदसोऽस्थीनि
अस्थिभ्यो मज्जा मज्जायाः शुक्रं तथा योषिद्भुक्तं चान्नं रसादिक्रमेणैव परिणतं लोहितं भवति ताभ्यां शुक्र
शोणिताभ्यां अन्नकार्याभ्यां संयुक्ताभ्यामन्नेनैव प्रत्यहं भुज्यमानेन आपूर्यमाणाभ्यां कुड्यमिव मृत्पिण्डैः
प्रत्यहमुपचीयमानोऽन्नमूलो देहशुङ्गः परिनिष्पन्न इत्यर्थः । यत्तु देहशुङ्गस्य मूलमन्नं निर्दिष्टं तदपि देहवद्वि
नाशोत्पत्तिमत्त्वात् कस्माच्चिन्मूलादुत्पत्तिमच्छुङ्गमेवेति कृत्वाह । यथा देहशुङ्गो नामूलः एवमेव खलु सोम्यान्ने
न शुङ्गेन कार्येण भूतेनापो मूलमन्नस्य शुङ्गस्यान्विच्छ प्रतिपद्यस्व आपोऽपि विनाशोत्पत्तिमत्त्वाच्छुङ्गमेवेत्यद्भिः ॥५८
सोम्य शुङ्गेन कार्येण कारणं तेजो मूलमन्विच्छ । तेजसोऽपि विनाशोत्पत्तिमत्त्वाच्छुङ्गत्वमिति तेजसा सोम्य शुङ्गे
न सन्मूलमेकमेवाद्वितीयं परमार्थसत्यं । यस्मिन्सर्वमिदं वाचारम्भणं विकारो नामधेयमनृतं रज्ज्वामिव सर्पा
दिविकल्पजातमध्यस्तमविद्यया तदस्य जगतो मूलमतः सन्मूलाः सत्कारणाः हे सोम्येमाः स्थावरजङ्गम

लक्षणाःसर्वाःजोप्रजाःनकेवलंसन्मूलाएवेदानीमपिस्थितिकालेसदायतनाःसदाश्रयाएव।नहिमृ
दमनाश्रित्यघटादेःसत्वंस्थितिर्वास्तितस्मात्मृद्वत्सन्मूलत्वात्प्रजानांसदायतनाःप्रजाः।अंतेचसत्प्रतिष्ठाःस
देवप्रतिष्ठालयःसमाप्तिरवसानंपरिशेषोयासांताःसत्प्रतिष्ठाः।अथेदानीमप्शुंगद्वारेणसतोमू
लस्यानुगमःकर्तव्यइत्याह।यत्रयस्मिन्कालेएतन्नामपिपासतिपातुमिच्छतीतिपुरुषोभवति।अशिशि
षतीतिवदिदमपिगौणमेवनामभवति।द्रवीकृतंतस्याशितंतस्यान्नस्यनेत्र्यआपोन्नंशुंगंदेहंक्लेदयंत्यःशि
थिलीकुर्युरब्बाहुल्याद्यदितेजसानशोष्यंते।नितरांचतेजसाशोष्यमाणाःस्वकार्यदेहभावेनपरिणममानाः
अपांपातुमिच्छापुरुषस्यजायते।तदापुरुषःपिपासतिनाम।तदेतदाह।तेजएवतत्तदापीतमबादिशोषय
द्देहगतलोहितप्राणभावेननयतेपरिणामयति।तद्यथागोनायइत्यादिसमानमेव।तदत्तेजआचष्टेलोक
उदन्येति।उदकंनयतीत्युदन्यमुदन्येतीतिछांदसं।तत्रापिपूर्ववदपामप्येतदेवशारीराख्यंशुंगंनान्य
दित्येवमादिसमानमन्यत्सामर्थ्यात्तेजसोप्यौ।तदेवमप्शुंगमतोपशुंगेनदेहेनापोमूलंगम्यते।अद्भिःशुंगेन
तेजोमूलंगम्यते।तेजसाशुंगेनसन्मूलंगम्यते।पूर्ववदेवमितितेजोबन्नमयस्यदेहशुंगस्यवाचारंभणमात्र
स्यान्नादिपरंपरयापरमार्थसत्यंसन्मूलमभयमसंत्रासंनिरायासं।सन्मूलमन्विच्छेतिउक्तंगमयितितवाशि
शिषतिपिपासतीतिनामप्रसिद्धिद्वारेणयदन्यदिहास्मिन्प्रकरणेतेजोबन्नानांपुरुषेणोपयुज्यमानानां
कार्यकरणसंघातस्यदेहशुंगस्यस्वजात्यसांकर्येणोपचयकरत्वंवक्तव्यंप्राप्तंतदिहोक्तमेवद्रष्टव्यमितिपूर्वो
क्तंव्यपदिशति।यथानुखलुयेनप्रकारेणेमास्तेजोबन्नाख्यास्तिस्रोदेवताःपुरुषंप्राप्यत्रिवृत्त्रिवृदेकैकाभ
वतितत्पुरस्तादेवभवति।अन्नमशितंत्रेधाविधीयतइत्यादि।तत्रैवोक्तमन्नादीनामशितानांयेमध्य
माधातवस्तेसाक्षाद्धातुकंशरीरमुपचिन्वंतीत्युक्तं।मांसंभवति।लोहितंभवति।मज्जाभवति।येत्वणिष्ठा

धातचोमनः प्राणं वा वेदेहस्यांतःकरणसंघातमुपसंहरंतीत्युक्तं। तन्मनो भवति। प्रेस प्राणो भवति।
सा वाग्भवति। सोयं प्राणकरणसंघातो देहविनाशे देहांतरं जीवाधिष्ठितो येन क्रमेण पूर्वदेहमुत्सृज्य। यतो
गच्छति तदाह। अस्य सोम्य पुरुषस्य प्रयतो म्रीमाणस्य वाग्मनसि संपद्यते मनस्युपसंह्रियते। अथ
तदाहुर्ज्ञातयो न वदतीति। मनःपूर्वको हि वाग्व्यापारः यद्धि मनसा ध्यायति तद्वाचा वदतीति श्रुतेः। वाचु
पसंहृतायां मनसि मनो मननव्यापारेण केवलेन वर्त्तते मनोप्ययदोपसंह्रियते। तदा मनः प्राणे संप
न्नं भवति। सुषुप्तकाल इव। तदा पार्श्वस्था ज्ञातयो न विजानातीत्याहुः। प्राणश्च तदा देहे उच्छ्वासी स्वात्मन्यु
पसंहृतबाह्यकरणः। सर्ववर्गविद्यायां दर्शितः क्रमस्तथा दादीन्विक्षिपन्मर्मस्थानानि निकृंतन्निवोर्ध्वं क्र
मेणोपसंहृतस्तेजसि संपद्यते तदाहुर्ज्ञातयो न वदतीति। मृतो नेति वा विचिकित्संतो देहमालभ्योष्णः सो
लसमानात् छं वोपलसमानादेहेन च्छोडावृत्तीति। यदा तदा थोष्ण्यलिंगं तेजः कंपेनुपसंह्रियते।
तदा तत्तेजः परस्यां देवतायां प्रशाम्यति। तदेवं क्रमेणोपसंहृते स्वमूलं प्राप्तेष्वेव मनसि तत्स्तो जीवो हि
सुषुप्तकालवन्निमित्तोपसंहारादुपसंह्रियमाणः सन्सत्याभिसंधिपूर्वकं चेदुपसंह्रियते तु। स देवसं
पद्य न पुनर्देहांतराय सुषुप्ताद्विवोत्तिष्ठति। यथा लोके सत्यपदेशो वर्त्तमानः कथं विद्वान्सत्यं देहं प्राप्य
त्तघटितरज्जुना भङ्गः तस्मादेव मूलात्सुषुप्ताद्विवोत्थाय मृतः पुनर्देहजालमाविशति। यस्मान्मूलादु
त्थाय देहमाविशति जीवः। स यः सदाख्य एषोणिमा अणुभावो जगतो मूलमेतदात्म्यमेतदेतत्सदात्मा ॥५०॥
यस्य सर्वस्य तदेतदात्म तस्य भाव ऐतदात्म्यमेतेन सदाख्येनात्मनात्मवत्सर्वमिदं जगत् नान्यो
स्यात्मा संसारी। नान्यदतोस्ति द्रष्टृ नान्यदतोस्ति श्रोत्रित्यादिश्रुत्यंतराद्येन चात्मनात्मवत्सर्वं तदेतदेव

सदाख्यं कारणं सत्यं परमार्थसत् । अतः स एवात्मा जगतः प्रत्यक्स्वरूपं सतत्त्वं याथात्म्यम् । आत्मशब्दस्य निरुप-
पदस्य प्रत्यगात्मनि गवादिवन्निरूढत्वात् । अतस्तत्सत्त्वमसीति हे श्वेतकेतो इत्येवं प्रत्यायितः पुत्र आ-
हा भूय एव मा भगवान्विज्ञापयतु । यद्भवतोक्तं सत्संपद्यमाना अहन्यहनि सर्वाः प्रजाः सुषुप्ते सत्संपद्यन्ते इत्येत-
द्येन सत्संपद्य न विदुः सत्संपन्ना वयमिति तद्दृष्टान्तेन मां प्रत्याययत्वित्यर्थः । एवमुक्तस्तथास्तु सोम्येति
होवाच पिता । यत्तूक्तमहन्यहनि सत्संपद्य न विदुः सत्संपन्नाः स्म इति तत्कस्मादित्यत्र शृणु दृष्टान्तं य-
थालोके सोम्य मधुकृतो मधुकुर्वन्तीति मधुकृतो मधुकरमक्षिका मधु निस्तिष्ठन्ति मधुनि संपादयन्ति
तत्पराः सन्तः । कथम् । नानात्ययानां नानागतीनां नानादिक्कानां वृक्षाणां रसान्समवहारं समाहृत्य सम-
कत्वैकतामेकतां मधुत्वेन रसान्गमयन्ति । मधुत्वमापादयन्ति । ते रसा यथा मधुत्वेनैकतां गतास्तत्र मधुनि वि-
वेकं न लभन्ते । कथम् । अमुष्याहमाम्रस्य पनसस्य वा वृक्षस्य रसोऽस्मीति । यथा हि लोके बहूनां चेतनावतां स- स
मेतानां प्राणिनां विवेकलाभो भवति । अमुष्याहं पुत्रोऽमुष्याहं नप्तास्मीति । ते च लब्धविवेकाः सन्तो न संकीर्यन्ते
न तथेहानेकप्रकारवृक्षरसानामपि मधुराम्लतिक्तकटुकादीनां मधुत्वेनैकतां गतानां मधुरादिभावेन वि-
वे कोगृह्यत इत्यभिप्रायः । यथायं दृष्टान्त इत्येवमेव खलु सोम्येमाः सर्वाः प्रजा अहन्यहनि सति संपद्य सुषुप्तकाले मर-
णप्रलययोश्च न विदुर्न विजानीयुः सति संपद्यामह इति संपन्ना इति वा । यस्माच्चैवमात्मनः सद्रूपतामज्ञा-
त्वैव सत्संपद्यन्ते अतस्त इह लोके यत्कर्मनिमित्तां यां यां जातिं प्रतिपन्ना आसुः व्याघ्रादीनां व्याघ्रोऽहं सिंहो-
ऽहमित्येवं । तेन कर्मज्ञानवासनाङ्किताः सन्तः सत्प्रविष्टा अपि तद्भावेनैव पुनराभवन्ति । पुनः सतः
आगत्य व्याघ्रो वा सिंहो वा वृको वा वराहो वा कीटो वा पतङ्गो वा दंशो वा मशको वा यद्यत्पूर्वमिह लोके भवन्ति ।

स्व५ सरे४ वि२

बसूवुरित्यर्थः। स्तद्देव पुनरागत्य स्रवंति। युगसहस्रकोट्यंतरितापि संसारिणो जंतोर्या पुरा सावितावास
नासानन श्यतीत्यर्थः। यथा प्रभृति संसवा इत्यभ्युत्तरात् ताः प्रजा यस्मिन्प्रविश्य पुनराविर्भवं
ति। ये त्विता न्ये सस्यान्मालिसं धायमणुभावं सदात्मानं प्रविश्य पुनरावर्तते। स एषोयमणिमेत्यादि
व्याख्यातं। यथा लोके स्वकीये गृहे सुप्तउत्थाय ग्रामांतरं गतो जानाति स्वगृहादागतोस्मीति एवं सत
आगतोस्मीति च जंतूनां कस्मात् विज्ञानं न भवतीति भूय एव मा भगवान्विज्ञापयत्विति। तथा सोम्येति हो
वाच पिता॥ ॥अत्र दृष्टांतं। यथा सोम्येमाः नद्यो गंगाद्याः पुरस्तात्पूर्वां दिशं प्रति प्राच्यः प्रागंचनाः
स्यंदंते स्रवंति। पश्चात्प्रतीचीं दिशं प्रति सिंध्वाद्याः प्रतीचीमुखं वंति गच्छंति प्रतीच्यः ताः समुद्रादंभसो
निधेर्जलधरैराक्षिप्ताः पुनर्वृष्टिरूपेण पतिता गंगादिनदीरूपिण्यः पुनः संसमुद्रमंभोनिधिमेवापियंति
स समुद्र एव भवति तानद्यो यथा तत्र समुद्रे समुद्रात्मनेकतां गता न विदुः न विज्ञानंति। इयं गंगाहमस्मी
यं यमुनाहमस्मीति इयं महानहमस्मीति चैवमेव खलु सोम्येमाः सर्वाः प्रजा यस्मात्सति संपद्य न विदुः
तस्मात्सत आगम्य न विदुः सत आगच्छामहे। आगता इति वा। त इह व्याघ्रइत्यादि समानमन्यत्
लोके जले वीचीतरंगफेनबुद्बुदादयः उत्थिताः पुनस्तद्भावं गता विनष्टा इति। जीवास्तत्कारणा
त्मत्वं प्रत्यहं गच्छंतोपि मरणप्रलययोश्च न विनश्यंतीत्येतद्भूय एव मा भगवान्विज्ञापयतु दृष्टांते
न। तथा सोम्येति होवाच पिता॥ ॥अत्र दृष्टांतमस्य सोम्य महतोऽनेकशाखादियुक्तस्य वृक्षस्य॥६१॥
य एतस्मिन्वृक्षे निदर्शयन्नाह यद्यस्य कश्चिदस्य मूलेऽभ्याहन्यात्परश्वादिना। सकृद्घातमात्रेण न शुष्य
ति जीवन्नेव स्रवति। तदा तस्य रसः स्रवेत्तथा यो मध्येऽभ्याहन्याज्जीवन्स्रवेत्तथा योऽग्रेऽभ्याहन्याज्जी
वन्स्रवेत्स एष वृक्ष इदानीं जीवेनात्मनानुप्रभूतोनुव्याप्तः पेपीयमानोऽत्यर्थं पिबन्नुदकं भौमांश्च
जीवे

प्प

रणं सान्नमूलेभ्यर्दमानो हर्षं प्राप्नुवंस्तिष्ठति। तस्यास्य यद्येकां शाखां रोगग्रस्तामाहतां वा जी
वो जहात्यतं(?)पसंहरति शाखायां प्रविसृतमात्मांशं। अथ सा शुष्यति। वाग्मनः प्राणकरणग्रा
मानुप्रविष्टो हि जीव इति तदुपसंहारे ह्युपसंह्रियते। जीवेन च प्राणयुक्तेनाशितं पीतं च रसतां गतं
जीवच्छरीरं वृक्षं च वर्धयद्रसरूपेण जीवस्य सद्भावे लिङ्गं भवत्यशितपीताभ्यां हि देहे जीवस्तिष्ठ
ति। ते चाशितपीते जीवकर्मानुसारिणी इति तस्यैकाङ्गवैकल्यनिमित्तं कर्म यदोपस्थितं भवति
तदा जीव एकां शाखां जहाति शाखाया आत्मानमुपसंहरति। अथ तदा सा शाखा शुष्यति।
जीवस्थितिनिमित्तो रसो जीवकर्माक्षिप्तो जीवापसंहरणे न तिष्ठति। रसापगमे च शाखा शो
षमुपैति। तथा सर्वं वृक्षमेव यदायं जहाति तदा सर्वोऽपि वृक्षः शुष्यति। वृक्षस्य रसस्रवणशोष
णादिलिङ्गाज्जीववत्त्वं दृष्टान्तश्रुतेश्चेतनावन्तः स्थावरा इति बौद्धकाणादमतमचेतनाः स्थावरा
इत्येतदसारमिति दर्शितं भवति। यथास्मिन्वृक्षे दृष्टान्तो दर्शितः। जीवेन युक्तो वृक्षोऽशुष्कोऽरसपाना
दियुक्तो जीवतीत्युच्यते। तदपेतश्च म्रियत इत्युच्यते। एवमेव खलु सोम्य विद्धीति होवा
च। जीवापेतं जीववियुक्तं वाव किलेदं शरीरं म्रियते न जीवो म्रियत इति। कार्यशेषे च सुप्तोत्थितस्य
ममेदं कार्यशेषमपरिसमाप्तमिति स्मृत्वा समापनदर्शनात्। जातमात्राणां च जन्तूनां स्तन्याभिलाष
भयादिदर्शनाच्चातीतजन्मान्तरानुभूतस्तनपानदुःखानुभवस्मृतिर्गम्यते। अग्निहोत्रादीनां च वै
दिकानां कर्मणामर्थवत्त्वाच्च न जीवो म्रियत इति। स य एषोऽणिमेत्यादि समानं। कथं पुनरिदं मत्स्यं तस्मै
स्थूलं पृथिव्यादि नामरूपवज्जगदत्यन्तसूक्ष्मान्नामरूपरहितात्सतो जायत इत्येतद्दृष्टान्तेनास्य

एवमा भगवान्विज्ञापयत्विति तथा सोम्येति होवाच पिता। यद्येतत्त्वं प्रत्यक्षीकर्तुमिच्छस्यतोऽस्मान्महतो न्यग्रोधा
त्फलमेकमाहरेत्युक्तः स तथा चकार स इदं भगव इति तं फलमिति दत्तवांस्तं प्रत्याह फलं ॥ भिन्द्धीति
भिन्नमित्याहेतरस्तमाह पिता। किमत्र पश्यसि। उक्त आह। अण्व्यो ऽणुतरा इवेमा धाना वीजानि पश्या
मि भगव इति। आसां धानानामेकां धानां हे अंग वत्स भिन्द्धीत्युक्त आह। भिन्ना भगव इति। यदि भिन्ना धाना
तस्यां भिन्नायां किं पश्यसीत्युक्त आह। न किंचन पश्यामि भगव इति। तं पुत्रं होवाच पिता वटधानायां भिन्ना
यां यं वटवीजाणिमानं हे सोम्य एतं न निभालयसे न पश्यसि तथाप्येतस्यैव किल हे सोम्य एष म
हान्न्यग्रोधो वीजस्याणिम्नः सूक्ष्मस्यादृश्यमानस्य कार्यभूतः स्थूलः शाखास्कंधफलपलाशवा
न्तिष्ठत्युत्पन्नः सन्नुत्तिष्ठतीति वाक्यशेषो ऽध्याहार्यो ऽतः श्रद्धत्स्व सोम्य सत एवाणिम्नः स्थूलं नामरूपादि ह
मत्कार्यं जगदुत्पन्नमिति। यद्यपि न्यायागमाभ्यां निर्धारितोऽर्थस्तथैव स इत्यवगम्यते। तथाप्यत्यंतसूक्ष्मेष्वर्थे
षु बाह्यविषयासक्तमनसः स्वभावप्रवृत्तस्यासत्यां गुरुतरायां श्रद्धायां दुरवगमत्वं स्यादित्याह। श्रद्धत्स्व
स्वेति। श्रद्धायां तु सत्यां मनसः समाधानं बुभुत्सिते श्रद्धायां तु सत्यां मनसः समाधानं बुभुत्सितेऽर्थे तच्चेत्ततश्च
तदर्थावगतिरन्यत्र मनाअश्लेषमिथ्या दिश्यते। स य इत्यादि उक्तार्थं। यदि सत्सज्जगतो मूलं कस्मान्नोपलभ्य
त इत्येतद्दृष्टांतेन मा भगवान्भूय एव विज्ञापयत्विति। तथा सोम्येति होवाच पिता। विद्यमानमपि वस्तु नोप ॥६२॥
लभ्यते प्रकारांतरेणोपलभ्यत इति। शृण्वत्र दृष्टांतं। यद्येवमर्थं प्रत्यक्षीकर्तुमिच्छसि पिंडरूपलव
णमेतद्घटादावुदके ऽवधाय प्रक्षिप्याथ मा मां श्वः प्रातरुपसीदथा उपगच्छेथा इति। स ह पित्रोक्तमर्थं प्रत्य
क्षीकर्तुमिच्छसिं न तथा चकार। तं होवाच। परेद्युः प्रातः यल्लवणं दोषा रात्रावधाय उदके ऽवधा॰

निश्चितवान्स्वयं हेंगतदा हेरेतिन स्तल्लवणमाजिहीर्षुर्ह किलावमृश्योदके नैव विवेद न विज्ञातवान् यथा
तल्लवणं विद्यमानमेव सद्वस्तु लीनं संश्लिष्टमभूत् यथा विलीनं लवणं न वेत्थ तथापि तद्दक्षुषा स्पर्श
नेन च पिंडरूपं लवणमगृह्यमाणं विद्यत एवोपलभ्यते चोपायान्तरेणेत्येतत् सुतं प्रत्याययितुमिच्छन्नु
वाच अंगास्योदकस्यान्तादुपरि गृहीत्वाचामेत्युक्त्वा पुत्रं तथाकृतवन्तमुवाच कथमिमिति इतर आह लवणं
स्वादत इति । तथा । तथा मध्यादुदकस्य गृहीत्वाचामेति । कथमिति । लवणमिति यद्येवं तदाथां तादुद
काद्गृहीत्वाचामेति । कथमिति । लवणमिति । यद्येवं अभिप्रास्यैतत् परित्यज्यैतदुदकमाचम्याथ मो
पसीदथा इति । तद्धतथा चकार । लवणं परित्यज्य पितुः समीपमाजगामेत्यर्थः । इदं वचनं ब्रुवन् तल्
लवणं तस्मिन्नेवोदके यन्मया रात्रौ क्षिप्तं । तच्छश्वन्नित्यं संवर्तते । विद्यमानमेव सत्सम्यग्वर्तत इ
त्येवमुक्तवंतं ह वाच पिता । यथेदं लवणं दर्शनस्पर्शनाभ्यां पूर्वं गृहीत्वा तं । पुनरुदके विलीनं ता
भ्यामगृह्यमाणमपि लवणमिति दर्शनस्पर्शनाभ्यां विद्यत एवोपायान्तरेण जिह्वयोपलभ्यमा
नत्वात् एवमेवात्रैवास्मिन्नेव तेजोबन्नादिकार्ये शुंगदेहे वाव किलेत्याचार्योपदेशस्मरणदर्शनार्थी
सत्तेजोबन्नादिशुंगकारणं वटबीजाणिमवद्विद्यमानं न निभालयसे नोपलभसे । ननिभालयसे यथा
स्मिन्नेवोदके दर्शनस्पर्शनाभ्यामनुपलभ्यमानं लवणं विद्यमानमेव जिह्वयोपलब्धवानसि एवमत्रैव
किल विद्यमानं सज्जगन्मूलमुपायान्तरेण लवणाणिमवदुपलप्स्यस इति वाक्यशेषः । स य इत्यादि

वा

समानं यद्येवं लक्षणं पञ्चनामरूपाणिमदादिंद्रियैरनुपलभ्यमानमपि जगन्मूलं सदुपायांतरेणोपलब्धुं वा
कैं शक्यते। यदुपलब्धं स्यात् कृतार्थः स्यामनुपलब्धं सेवाकृतार्थः स्यामहं। तस्यैवोपलब्धौ क उपाय इत्येतद्वक्तव्य एव मा भ
गवान्विज्ञापयतु दृष्टांतेन। तथा सोम्येति होवाच। यथा लोके हे सोम्य पुरुषं। यं कंचिद्गंधारेभ्यो जनपदेभ्यो
ऽभिनद्धाक्षं बद्धहस्तं आनीय हृत्वा तस्करैस्तमभिनद्धाक्षमेव बद्धहस्तमरण्ये ततोप्यति
जने विगतजनेऽत्यंतविगतजने देशे विसृजेत्। स तत्र दिग्भ्रमोपेतो यथा प्राङ्वा प्रागंचनः प्राङ्मुखोऽधरो वा
विपर्यस्तः। तथोदङ्वाधराङ्वा प्रत्यङ्वा प्रध्मायीत उन्नादं कुर्यात्। तु विक्रोशेत् अभिनद्धाक्षोऽहं गंधारेभ्यस्तस्करेणा
हृ नीतोऽभिनद्धाक्ष एव विसृष्ट इत्येवं विक्रोशतस्तस्य यथाभिनद्धं यथा बंधनं प्रमुच्य मुक्त्वा कारुणिकः ध
कश्चिदेतां दिशमुत्तरतो गंधारा एतां दिशं व्रजेति प्रब्रूयात्। स एवं कारुणिकेन बंधनान्मोक्षितो
ग्रामाद्ग्रामांतरं पृच्छन् पंडित उपदेशवान्मेधावी परोपदिष्टग्रामप्रवेशमार्गावधारणसमर्थः स
न् गंधारानेवोपसंपद्यते। नेतरो मूढमतिर्देशांतरे वा। दत्तांतानुरूपं यथायं दृष्टांतो वर्णितः। स्वविषयेभ्यो
गंधारेभ्यः पुरुषस्तस्करैरभिनद्धाक्षोऽविवेको दिग्मूढोऽशनापिपासादिमान्व्याघ्रतस्कराद्यनेकभ
यानर्थव्रातयुतमरण्यं प्रवेशितो दुःखार्तो विक्रोशन्बंधनेभ्यो मुमुक्षुस्तिष्ठति स कथंचिदेव का ॥६३॥
रुणिकेन केनचिन्मोक्षितः स्वदेशानेव गंधारानेवापन्नो निर्वृतः सुखी स्यात्। एवमेव सतो जगदात्मा
नः स्वरूपात्तेजोऽबन्नादिमयं देहारण्यं। वातपित्तकफरुधिरमेदोमांसास्थिमज्जाशुक्रकृमिमूत्र
पुरीषवंति शीतोष्णाद्यनेकद्वंद्वदुःखवच्चेदं मोहपटाभिनद्धाक्षो भार्यापुत्रमित्रपशुबंध्वादिदृष्टादृष्टा

नेकविषयतृष्णापाशान्वितः पुण्यापुण्यादितस्करैः प्रवेशितो ऽहं मनुष्यः पुत्रो मम मैते बांधवाः सुख्यहं दुः
खी मूढः पंडितो धार्मिको बंधुमान्जातो मृतो जीर्णः पापी पुत्रो मे मृतो धनं नष्टं मे हा हतो ऽस्मि कथं जीविष्यामि
का मे गतिः किं मे त्राणमित्येवमनेकशतसहस्रानर्थजालवान्विक्रोशन्कथंचिदेव पुण्यातिशयात्पर
मकारुणिकं कंचिद्ब्रह्मविदं विमुक्तबंधनं ब्रह्मनिष्ठं पदा सादयति तेन च ब्रह्मविदा कारुण्याद्दर्शितसं
सारविषयदोषदर्शनमार्गो विरक्तः संसारविषयेभ्यो नासि त्वं संसार्यमुष्यपुत्रत्वादिधर्मवान्किं तर्हि सद्य
त्तत्त्वमसी । त्यविद्यामोहपटाभिनद्धान्मोक्षितो गंधारपुरुषवच्च स्वं सदात्मानमुपसंपद्य सुखी निर्वृतः
स्यादित्येतमेवार्थमाहाचार्यवान्पुरुषो वेदेति । तस्यास्यैवमाचार्यवतो मुक्ताविद्यास्ति न हन्तस्य तावदेव ता
वानेव कालश्चिरमित्युच्यते । यावन्न विमोक्ष्ये न विमोक्ष्यत इत्येतत्पुरुषव्यत्ययेन सामर्थ्यात् । येन कर्मणा शरी
चा रमारब्धं तस्योपभोगेन क्षयाद्देहपातो यावदित्यर्थः । अथ तदैव सत्संपत्स्ये संपत्स्यत इति पूर्ववत् । न हि
देहमोक्षस्य सत्संपत्तेश्च कालभेदो ऽस्ति येनाथशब्द आनंतर्यार्थः स्यात् । ननु यथा सद्विज्ञानानंतरमेव देहपा
तः सत्संपत्तिश्च न संभवति कर्मशेषवशात्तथा ऽप्रवृत्तफलानि प्राग्ज्ञानोत्पत्तेर्जन्मांतरसंचितान्यपिक
र्माणि संतीति तत्फलोपभोगार्थं पतिते ऽस्मिन् शरीरे शरीरांतरमारब्धव्यं । उत्पन्ने च ज्ञाने यावज्जीवं विहि
लि तानि प्रतिषिद्धानि वा कर्माणि करोत्येवेति तत्फलोपभोगार्थं चावश्यं शरीरांतरमारब्धव्यं । ततश्च कर्माणि ततस्त
च्छरीरांतरमिति ज्ञानानर्थक्यं कर्मणां फलवत्त्वात् । अथ ज्ञानवतः क्षीयंते कर्माणि तदा ज्ञानप्राप्तिसमका
लमेव ज्ञानस्य सत्संपत्तिहेतुत्वान्मोक्षः स्यादिति शरीरपातः स्यात्तथा चाचार्यवान्पुरुषो वेदेत्यनुपपत्तिर्ज्ञाना
न्मोक्षाभावप्रसंगश्च । देशांतरप्राप्त्युपायज्ञानवदनैकांतिकफलं वा ज्ञानस्य । न । कर्मणां प्रवृत्ता ऽप्रवृ
पि

त्फलत्वविरोधोपपत्तेः। यदुक्तम् अप्रवृत्तफलानां कर्मणां अवश्यफलत्वाद् ब्रह्मविदः शरीरपतिते शरीरांत
रमारभ्यम प्रवृत्तकर्मफलोपभोगार्थमित्येतदसत्। विदुषस्तस्य तावदेव चिरमिति श्रुतेः प्रामाण्यान्ननु पु
णोर्दे दुष्पयन कर्मणा सवति। यादिश्रुतेरपि प्रामाण्यमेव। सत्यमेवं। तथापि प्रवृत्तफलानाम् अप्रवृत्तफलानां
च कर्मणां विनाशोस्ति। कथं यानि प्रवृत्तफलानि कर्माणि येन विदुषः शरीरमारब्धं तेषामुपभोगेनैव क्षयो। यथा
रब्धवेगस्य लक्ष्यमुक्तेषोर्वेगक्षयादेव स्थितिर्न तु लक्ष्यवेधसमकालमेव प्रयोजनं नास्तीति तद्वदन्या
नि त्वप्रवृत्तफलानीह प्राग्ज्ञानोत्पत्तेरूर्ध्वं च कृतानि वा क्रियमाणानि वा ऽतीतजन्मांतरकृतानि वाऽप्रवृत्तफ
लानि ज्ञानेन दह्यंते। प्रायश्चित्तेनेव ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते तथेति स्मृतेः। क्षीयंते चास्य
कर्माणीति चाथर्वणे। तथा ब्रह्मविदो जीवितादिप्रयोजनाभावेपि प्रवृत्तफलानां कर्मणामवश्यमेव
फलोपभोगः स्यादिति युक्तं तस्य तावदेव चिरमिति युक्तमेवोक्तमिति यथोक्तदोषचोदनानुपपत्तिः। ज्ञानो
त्पत्तेरूर्ध्वं ब्रह्मविदः कर्माभावमवोचाम ब्रह्मसंस्थोमृतत्वमेतीत्यत्र तच्च स्मर्तुमर्हसि। स य इत्याद्युक्ता
र्थं। यथा आचार्यवान् विद्वान् येन क्रमेण सत्संपद्यते तं क्रमं दृष्टांतेन भूय एव मा भगवान् विज्ञापयत्विति। तथा
सोम्येति होवाचेति पिता॥ ॥पुरुषं हे सोम्योपतापिनं ज्वराद्युपतापवंतं ज्ञातयो बांधवाः परिवार्योपास
ते जानासि मां तव पिता ऽहं पुत्र भ्रातरं चेति पृच्छंतः। तस्य मुमूर्षोर्यावन्न वाङ्मनसि संपद्यते। मनः प्रा
णे प्राणस्तेजसि। तेजः परस्यां देवतायामिति तावज्जानाति। संसारिणो यो मरणक्रमः स एवायं वि ॥६४॥
दुषोपि सत्संपत्तिक्रम इत्येतदाह। परस्यां देवतायां तेजसि संपन्ने ऽथ न जानाति। अविद्वांस्तु सततत्था
त्प्रागभावितं व्याघ्रादिभावं देवमनुष्यादिभावं वा विशति। विद्वांस्तु शास्त्राचार्योपदेशजनितज्ञानदीपप्र

काशितं सङ्कल्पात्मानं प्रविश्य पुनरावर्तते तद्व्येष सत्संपत्तिक्रमो मे र्द्धन्ये न्ये तु मूर्द्धन्यन्या। यानाड्योऽक्रम्यादित्यद्वा
रेण सत्संपत्तिरित्याहुः। तदसद्देशकालनिमित्तफलाभिसंधानेन गमनदर्शनात्। न त्वेवं सदात्मैकत्वदर्शिनः सत्या
भिसंधस्य देशकालनिमित्तफलाभिसंधानं नाभिसंधिरुपपद्यते। विरोधात्। अविद्याकामकर्मणां च गमननिमित्तानां
सद्विज्ञानहुताशनविप्लुष्टत्वाद्गमनानुपपत्तिरेव। पर्याप्तकामस्य कृतात्मनस्त्विहैव सर्वे प्रविलीयन्त इत्या
द्यश्रुत्याद्याथर्वणे। ननु समुद्रदृष्टान्तस्तु तत्संपद्यत्या दिसमानं। यदि मरिष्यतो मुमुक्षुतश्चैव तुल्या
सत्संपत्तिस्तत्र विद्वान् संपन्नो नावर्तते। आवर्तते अविद्वानित्यत्र कारणं दृष्टान्तेन स्यात् एवमाह भगवान् विज्ञाप
यतु। तथा सोम्येति होवाच॥ ॥शृणु यथा सोम्य पुरुषं चौर्यकर्मणि संदिह्यमानं निग्रहाय परीक्षणाय च
पितामहस्तगृहीतं बद्धहस्तमानयंति राजपुरुषाः। किं कृतवानयमिति पृष्टाश्चाहुः अपहार्षीद्धनमस्यायं किं
प अपहरणमात्रेण बंधनमर्हति। अन्यथा दत्तेऽपि धने ग्रहणात् स्वं वादिस्तक्ताः पुनराहुः स्तेयमकार्षीत् चौर्येणाधनमप ऊः
त्रै हार्षीदिति तेष्वेवं वदत्सु इतरोऽपह्नुते नाहं तत्कर्तेति। ते चाहुः संदिह्यमानं स्तेयमकार्षीस्त्वमस्य धनस्येति
तस्मिंश्चापह्नुवत्याहुः परशुमस्मै तपतेति शोधयत्वात्मानमिति। स यदि तस्य स्तैन्यस्य कर्ता भवति। ब
हिश्चापह्नुते स एवंभूतस्तत एवानृतमन्यथाभूतं संतमन्यथात्मानं कुरुते। स तथानृताभिसंधोऽनृ
तेनात्मानमंतर्धाय व्यवहितं कृत्वा परशुं। पतप्तं मोहात्प्रतिगृह्णाति स दह्यतेऽथ हन्यते राजपुरुषैः स्वकृते
नानृताभिसंधिदोषेण। अथ यदि तस्य कर्मणोऽकर्ता भवति। तत एव सत्यमात्मानं कुरुते। स तया स्तैन्याकर्तृतया
मे त्मानमंतर्धाय परशुं तप्तं प्रतिगृह्णाति स सत्याभिसंधः सन्न दह्यते। सत्यव्यवधानात् अथ मुच्यते च मृषाभि
योक्तृभ्यः। तप्तपरशुहस्ततलसंयोगस्य तुल्यत्वेऽपि स्तेयकर्त्रकर्त्रोः अनृताभिसंधो दह्यते न तु सत्याभिसंध
स्य यथा सत्याभिसंधस्तप्तपरशुग्रहणकर्मणि सत्यव्यवहितहस्ततलत्वान्न दाह्यते न दह्यते चेत्येतदेवं सद्ब्र

लसत्याभिसंधीतरयोः न्मारीतरपादतकालेवतुल्यायांसम्पत्तौविद्वान्संपद्यत पुनर्न्याघ्राद्देवादिदेहग्रह
णायावर्त्तते। विद्वांस्तु विकारानृताभिसंधः पुनर्व्याघ्रादिभावं देवतादिरूपं वा। तद्भिसावं वा यथाकर्म यथा
श्रुतं प्रतिपद्यते। यदि मात्माभिसंध्यनात्माभिसंधिकृतमोक्षबंधनयश्चमूलं तुगतौ यदायतनायस्प्रतिष्ठाश्चसर्वाः
प्रजाः यदात्मकं च सर्वं। यच्चाजममृतमभयं शिवमद्वितीयं तत्सत्यं स आत्मा तव तत्त्वमसि हे श्वेतकेतो इत्युक्ता
र्थमसकृद्वाक्यं। कः पुनरसौ श्वेतकेतुस्त्वंशब्दार्थः। योऽहं श्वेतकेतुरुद्दालकस्य पुत्र इति वेदात्मानमादेशं
श्रुत्वा मत्वा विज्ञाय चाश्रुतममतमविज्ञातं विज्ञातुं पितरं पप्रच्छ कथं नु भगवः स आदेशो भवतीति। स एष
कृतः श्रोता मन्ता विज्ञाता तेजोबन्नमयं कार्यकरणसंघातं प्रविष्टा परैव देवता नामरूपव्याकरणाय आदर्शे
इव पुरुषः सूर्यादिरिव जलादौ प्रतिबिंबरूपेण। स आत्मानं कार्यकरणेभ्यः प्रविविक्तं सद्रूपं सर्वात्मानं
प्राक्पितुः श्रवणान्नविजज्ञावथेदानीं पित्रा प्रतिबोधितः तत्त्वमसीति दृष्टान्तैर्हेतुभिश्च तस्मात्पितुरस्य ह किलोक्तं
सदेवाहमस्मीति विजज्ञौ विज्ञातवान्। द्विर्वचनमध्यायपरिसमाप्त्यर्थम्॥ ॥ किं पुनरत्र षष्ठे वाक्यप्रमाणेन
जनितं फलमात्मनि। कर्तृत्वभोक्तृत्वयोरधिकृतत्वविज्ञाननिवृत्तिः तस्य फलं वयमवोचाम। तत्त्वमसीति वाक्यमर्थश्रो
तृमन्तुर्याधिकृतत्वमविज्ञातविज्ञानफलार्थं। प्राक्तस्माद्विज्ञानादहमेवं करिष्यामि अग्निहोत्रादीनि कर्माणि अ
हमत्राधिकृत एषां च कर्मणां फलमिहामुत्र च भोक्ष्ये कृते वा कर्मसुकृतकृत्योऽस्मीत्येवं कर्तृत्वभोक्तृ
ग्रा४ त्वयोरधिकृतोऽस्मि। मात्मानमियदिनमद्य तत्तस्य सदात्मभूतेगतोमूलमेकमेवाद्वितीयं तत्त्वमसीत्यनेन वा
क्येन प्रतिबुद्धस्य निवर्तते। विरोधात्। न ह्येकस्मिन्नद्वितीये आत्मन्ययमहमस्मीति विज्ञाते ममेदमन्यदनेन कर्तव्य ॥६५॥
मिदं कर्तास्य फलस्य भोक्ष्येऽहमिति वा भेदविज्ञानमुपपद्यते। तस्मात्सत्यस्यात्सत्याद्वितीयात्मविज्ञाने विकारानृ
तजीवात्मविज्ञानं निवर्तत इति युक्तं। ननु तत्त्वमसीत्यत्र त्वंशब्दवाच्योऽर्थः सद्बुद्धिराद्दिश्यते। यथादित्यमनआदि

सुवर्णादिबुद्धिः यथा च लोके प्रतिमादिषु विष्णवादिबुद्धिस्तद्वत् ननु सदेव त्वमिति । यदि सदेवं श्वेतकेतुः स्यात् कथ
मात्मानं न विजानीयात् । येन तस्मै तत्त्वमसीति उपदिश्यते । नादित्यादिवाक्यैर्बोधः क्षण्यादादित्यो ब्रह्मेत्यादि
दर्शितानां हि व्यवहारधानानां मनसा साक्षाद्ब्रह्मत्वं गम्यते । रूपादिमत्त्वाच्चादित्यादीनां कामं मनसोप्येतिन्नाद्वच्य मा३
प्रधानादेवा ब्रह्मत्वमिह तु सत एव देहत्रवेशं दर्शयित्वा तत्त्वमसीति निरंकुशं सदात्मत्वमुपदिशति । न
नुपराक्रमादिगुणः सिंहोसि त्वमितिवत्तत्त्वमसीति स्यान् न मृदादिवत्सदेकमबाधितायं सत्यमेवोदितेति स्वरूप
दर्शनात् न चोपचारविज्ञानात् तस्य तावदेव चिरमिति सत्संपत्तिरूपदिश्येत । मृषात्वादुपचारविज्ञानस्य । च मिथ्या
यम इति न चापि स्तुतिरुपास्यत्वाच्छ्वेतकेतुतो । नापि सश्वेतकेतुर्वोपदेशेन स्तूयेत । न हि राजादासस्त्व
मिति स्तुत्यस्य नापि सतः सर्वात्मन एकदेशो निरोधो युक्तस्त्वमसीति देशाधिपतिरिव ग्रामाध्यक्षस्त्वमिति ।
न चान्या गतिरिह सदात्मत्वोपदेशादर्थान्तरस्त्वासंसर्ववीति । ननु सदस्मीति बुद्धिमात्रमिह कर्त्तव्यतया
वाच्यते । न च ज्ञातं सदसीति ज्ञाप्यत इति वेदान् न चास्मिन् पक्षेपि अश्रुतमेकं तं स्तवतीत्याद्युपपन्नं । न सद
स्मीति बुद्धिविधिस्तुत्यर्थत्वान्नाचार्यवान्पुरुषो वेद तस्य तावदेव चिरमित्युपदेशाद्यदि हि सदस्मीति
बुद्धिमात्रं कर्त्तव्यतया विधीयते न तु तत्त्वं ज्ञातव्यं चास्य सद्रूपत्वमेव । तदाचार्यवान्वेदेति ज्ञानोपायोपदेशो वा
च्यस्या । त । यथाग्निहोत्रं जुहुयादित्येवमादि विधिवदर्थप्राप्तमेवाचार्यवत्त्वमिति तद्वदेवं तस्य तावदे
व चिरमिति क्षेपकरणं न युक्तं स्यात् सदात्मत्वे ऽविज्ञातेपि सद्बुद्धिमात्रकरणे मोक्षप्रसंगात् न च तत्त्वम
सीत्युक्ते नाहं सदिति प्रमाणवाक्यजनिता बुद्धिर्निवर्त्तयितुं शक्या नोपपन्नेति वा केनचिद्वक्तुं । सर्वेपि निष
धवाक्यानां तत्परतयैवालोकयात् । यथाग्निहोत्रादि विधिजनिताग्निहोत्रादिकर्त्तव्यताबुद्धिर्मीमांसकानां तथार्थ
प

त्वमनुपृष्टेन त्वं वा न कथितवान् कथयते वक्तुं। तदुभयमुक्तं सदस्मात्सन्नात्मानं कथं न जानीयादिति। नासौ दोषः। कार्य
करणदीर्घसंघातव्यतिरिक्तोऽस्ति जीवः कर्त्ता भोक्तेत्यपि सिद्धसाधनः प्राणिनां विज्ञाने विज्ञानादर्शनात्। किमुत
स्वसदात्मविज्ञानं। कथमेवं व्यतिरिक्तविज्ञाने सति तेषां कर्तृत्वादि विज्ञानं संभवति दृश्यते यतस्तस्यापि देहा
दिधात्मबुद्धित्वान्न स्यात्सदात्मनि ज्ञानं। तस्माद्विकारानृताधिकृतजीवात्मविज्ञाननिवर्तकमेवेदं वाक्यं तत्त्व
मसीति सिद्धमिति॥ ॥इति श्रीमद्गोविंदभगवत्पूज्यपादशिष्यस्य परमहंसपरिव्राजकाचार्यस्य श्रीमच्छं
करभगवतः कृतौ छांदोग्योपनिषद्विवरणे षष्ठः प्रपाठकः समाप्तः॥ ॥श्री॥ परमार्थतत्त्वोपदेशप्रधान
परः षष्ठोऽध्यायः सदात्मैकत्वनिर्णयपरतयैवोपयुक्तो न सतोऽर्वाग्विकारलक्षणानि तत्त्वानि निर्दिष्टा
नीत्यतस्तानि नामादीनि प्राणांतानि क्रमेणानिर्दिश्य पतद्द्वारेणापि भूमाख्यं निरतिशयं तत्त्वं
निर्देक्ष्यामीति शाखाचंद्रदर्शनवदिति मं सप्तमं प्रपाठकमारभ्यते। निर्दिष्टेषु हि सतोऽर्वाक्तनेषु सन्मा
त्रयनिर्दिष्टेन्यदप्यविज्ञातं स्यादित्याशंका कस्यचित्स्यात्सामान्यादिति तानि निर्दिदिक्षति यथा वा
सोपानारोहणवत्स्थूलादारभ्य सूक्ष्मं सूक्ष्मतरं च बुद्धिविषयं ज्ञापयित्वा तदतिरिक्ते स्वाराज्येऽभि
षेक्ष्यामीति नामादीनि निर्दिदिक्षति। अथवा नामाद्युत्तरोत्तरविज्ञाननिर्दिष्टानि तत्त्वान्यतितरां च तेषां
उत्कृष्टतमं भूमाख्यं तत्त्वमिति तत्स्तुत्यर्थं नामादीनां क्रमेणोपन्यासः। आख्यायिका परविद्यास्तुत्यर्था
कथं नारदो देवर्षिः कृतकर्तव्यः सर्वविद्योऽपि सन्ननात्मज्ञत्वाच्छुशोचैव। किमु वक्तव्यमन्योऽल्प ॥६४॥
विज्जंतुरकृतपुण्यातिशयोऽकृतार्थ इत्यथवा नान्यदात्मज्ञानान्निरतिशयश्रेयःसाधनमस्ती

(अथवा नारदो देवर्षिः) २

तयेतस्य दर्शीनार्थं सनत्कुमारनारदाख्यायिकारभ्यते। येन सर्वविज्ञानसाधनशक्तिसंपन्नस्यापि नारदस्य
देवर्षेः अकृतार्थत्वं वर्ततेंतरेणात्मज्ञानं येनोत्तमाभिजनविद्यावृत्तसाधनशक्तिसंपन्निमित्ताभिमा
नं हित्वा प्राकृतपुरुषवत्सनत्कुमारमुपससाद श्रेयःसाधनप्राप्तये तेन प्रख्यापितं भवति निरतिशयश्रे
यःप्राप्तिसाधनत्वमात्मविद्याया इत्यर्थः। हि। अधीहि भगवो भगवान्निति ह किलोपससाद। अधीहि भ
गव इति मंत्रः। सनत्कुमारं योगीश्वरं ब्रह्मिष्ठं नारद उपसन्नवान्। तं न्यायेन उपसन्नं होवाच। यद्वा आत्मविषये
किंचिद्वेत्थ तेन तत्त्वाख्यापनेन मा मामुपसीद अहं जाने। ततोऽहं सवतो विज्ञाप्ता ते तुभ्यं भूय एव वक्ष्यामि।
इत्युक्तवति सहोवाच नारदः। ऋग्वेदं भगवोऽध्येमि स्मरामि। यद्वेत्थेति विज्ञानस्य पृष्टत्वात्तथा यजुर्वेदं सा
मवेदमाथर्वणं चतुर्थं वेदं वेदशब्दस्य प्रकृतत्वादितिहासपुराणं पंचमं वेदं वेदानां पंचमं भारतं पंचमानां
वेदं व्याकरणमित्यर्थः। व्याकरणेन हि पदादिविभागतः ऋग्वेदादयो ज्ञायंते पित्र्यं श्राद्धकल्पं राशिं ग
णितं दैवमुत्पातज्ञानं निधिं महाकालादिनिधिशास्त्रं वाकोवाक्यं तर्कशास्त्रं एकायनं नी
तिशास्त्रं देवविद्यां निरुक्तं ब्रह्मण ऋग्यजुःसामाख्यस्य विद्यां ब्रह्मविद्यां शिक्षाकल्पछंदश्चि
तयोरूतविद्यां भूततंत्रं क्षत्रविद्यां धनुर्वेदं नक्षत्रविद्यां ज्योतिषं सर्पदेवजनविद्यां सर्पविद्यां गा
रुडं देवजनविद्यां गंधयुक्तिनृत्यगीतवाद्यशिल्पादिविज्ञानानि। एतत्सर्वं हे भगवोऽध्येमि। हे सोऽहं भगव
एवं सर्वज्ञोऽपि मंत्रविदेवास्मि शब्दार्थमात्रविज्ञानवानेवास्मीत्यर्थः। सर्वो हि शब्दोऽभिधानमात्र
मभिधानं च सर्वं मंत्रेष्वंतर्भवति मंत्रविदेवास्मि मंत्रविकर्मवित्स्यर्थो मंत्रेषु कर्माणीति हि कर्मविद्य
तिरात्मवित्तस्मात्मविन्नास्मानात्मवित्। न चाभाविर्तपि मंत्रैः प्रकाश्यत एव एवेति कथं च मंत्रविद्वे नात्मवित्तिथा

नास्ति घटस्य सदस्य विकारत्वान्नस्य विकारस्यालेष्यते। नन्वात्मा सत्राद्वैते नास्ति यीयते। नायतो वा

चोनिवर्त्तंते। यत्र नान्यत्पश्यतीत्यादि श्रुतेः। कथं तर्हि सेवाधस्तात्सत्यात्मेत्यादिनात्मा

ऽत्मानं प्रख्यापयति। नैष दोषः। देहवति प्रत्यगात्मनि सदविषये प्रयुज्यमानः शब्दो देहादीना ही.३

मात्मत्वे प्रत्याख्यायमाने यत्परिशिष्टं सदवाच्यमपि प्रत्याययति। यथा सराडीकायां दृश्यमा

नायां सेनायां छत्रध्वजपताकादिव्यवहिते ऽदृश्यमानेऽपि राजनि एष राजा दृश्यत इति स

र्वत्तिशब्दप्रयोगः। तत्र कोऽसौ राजेति राजविशेषनिरूपणायां दृश्यमानेतरप्रत्याख्यानेन्य

स्मिन्नदृश्यमाने राजनि राजप्रतीतिर्भवेत्तस्मात् सोऽहं मंत्रवित्कर्मविदेवास्मि। कर्मका

र्यं च सर्वो विकार इति विज्ञानं कारणमेवास्मि नात्मवित् न प्रकृतिस्वरूपविदित्यर्थः। तत एव क

माचार्यवान्पुरुषो वेदेति। यतो वाचो निवर्त्तंते इत्यादिश्रुतिभ्यः। श्रुतमागमज्ञानमस्त्येव

हि यस्मान्मे मम भगवद्दृशेभ्यो युष्मत्सदृशेभ्यस्तरत्यतिक्रामति शोकं मनस्तापं अकृता

र्थबुद्धितामात्मविदित्यतः सोऽहमनात्मवित्त्वात् हे भगवः शोचामि अकृतार्थबुद्ध्यासंतप्ये सर्वदा।

तं मां शोकसागरस्य पारं अंतं त्वं भगवांस्तारयत्वात्मज्ञानोडुपेन कृतार्थबुद्धिमापादय ह्रै

तु अभयं गमय। तमेवमुक्तवंतं होवाच। यद्वै किंचैतदध्यगीष्ठा अधीतवा ॥६७॥

नस्य ध्ययनेन तदर्थज्ञानमुपलक्ष्यते। ज्ञातवानसीत्येतन्नामैवैतत् वाचारंभणं विक

कारो नामधेयमिति श्रुतेः। नाम वा ऋग्वेदो यजुर्वेद इत्यादिना। नामैवैतन्नामोपास्स्व

ब्रह्मबुध्याय यथा प्रतिमां विष्णुबुध्योपास्ते तद्धैस यस्तन्नाम। मै २

अप्रत्यक्षपास्ते तस्य यत्फलं कं भवतीति तच्छृणु। यावन्नाम्नो गतं नाम्नो गोचरं। तत्र तस्मिन्नामविष
येऽस्य यथाकामचारो भवति। कामचारः पारतंत्र्यस्य स्वविषये भवति। यो नाम ब्रह्मेत्युपास्ते इत्युपसंहारः। किम
स्ति भगवो नाम्नो वा वस्तु भूयो ऽधिकतरं। यद्ब्रह्मदृष्ट्यर्हमन्यदस्तीत्यभिप्रायः। सनत्कुमार आह। नाम्नो
वाव भूयोऽस्तीति। पृष्ट आह। यद्यस्ति। तन्मे भगवान्ब्रवीत्विति॥ ॥ वाग्वाव नाम्नो भूयसी। वागिति इंद्रियं जिह्वा
मूलादिषु अष्टसु स्थानेषु स्थितं वर्णानामभिव्यंजकं। वर्णाश्च नाम इति नाम्नो वाग्भूयसी इत्युच्यते। कार्या
त्कारणं भूयो ऽधिकं दृष्टं लोके। यथा पुत्रात्पिता। तद्वत्कथं वा नाम्नो भूयसी त्याह। वाग्वा ऋग्वेदं [illegible] ६
विज्ञापयति अयमृग्वेद इति। तथा यजुर्वेदमित्यादि समानं। हृदयज्ञं हृदयप्रियं। तद्विपरीतमहृ
दयज्ञं। यद्यदि वाङ्नाभविष्यत्। वागभावे अध्ययनाभावो ऽध्ययनाभावे तदर्थश्रवणाभावः। तच्छ्र
सा वणाभावे धर्मादि न व्यज्ञास्यदिति। विषयन्तु विज्ञातं भवति विषयादित्यर्थः। तस्माद्वागेवैतदुच्चारणेन सर्वं वि
ज्ञापयत्यतो भूयसी वाङ्नाम्नः। वाचं ब्रह्मेत्युपास्व। समानमन्यत्॥ ॥ मनो मनस्यनवि
शिष्टमंतःकरणं वाचो भूयः। तद्धि मनस्यनव्यापारवद्वाचं वक्तव्ये प्रेरयति। तेन वाङ्मनस्यंतर्भवति।
यच्च यस्मिन्नंतर्भवति तत्तस्य व्यापकत्वात्ततो भूयो भवति। यथा वै लोके द्वे वामलके फले द्वे
वा कोले बदरफले द्वे वाक्षौ बिभीतकफले। मुष्टिरनुभवति। मुष्टिस्ते फले व्याप्नोति। मुष्टौ हि
ते अंतर्भवत एवं वाचं च नाम च आमलकादिवन्मनो ऽनुभवति। स यदा पुरुषो यस्मिन्काले मनसांतःक
रणेन मनस्यति मनस्यनं विवक्षा बुद्धिः कथं। मंत्रानधीयीयेत्युच्चारयेयमित्येवं विवक्षां कृत्वा अथा
धीते तथा कर्माणि कुर्वीयेति विवक्षांबुद्धिं कृत्वा अथ कुरुते। पुत्रांश्च पशूंश्चेच्छेयेत्यभीप्सति प्राप्तीच्छां

थै ति

कृत्वा तस्य फल। पायानुष्ठानेनापेक्षते। पुत्रादीन्प्राप्नोतीत्यर्थः। तथेमं लोकं मनुष्यो पायेनेच्छेदयमि
ति। तस्याप्युपायानुष्ठानेनापेक्षते। प्राणोमनो ध्यात्मा मनः कर्तृकं वर्तते त्वं वसति मनसि नान्यथेतिम
नो ध्यात्मा उच्यते। मनो हि लोकः सत्येव हि मनसि लोको भवति। तस्याप्युपायानुष्ठानं चेति मनो हि लो
कोऽस्मात्तस्मान्मनो हि ब्रह्म। यद्येतदेवं तस्मान्मन उपास्वेति। स यो मन इत्यादि समानं॥ ॥संकल्पो वाव
मनसो भूयान् संकल्पो पि मनस्यनवर्त्तः करणवृत्तिः कर्तव्याकर्तव्यविषयविभागेन समर्थनं। विभा
गेन हि समर्थिते विषये विप्रकीर्णा बुद्धिर्मनस्यं तल्लवति। कथं। यदा वै संकल्पयतेऽथ तेक तेयतादि। विष
यान्विसर्जतेदं कर्त्तुंयुक्तमिति। अथ मनस्यति मंत्रानधीयीयेत्यादि अथानंतरं वाचमीरयति मंत्राद्यु
च्चारणे। तां च वाचं नाम्नि नामोच्चारणनिमित्तं च विवक्षां कुर्वेरयति। नाम्नि नाम सामान्ये मंत्राः शब्दवि
शेषाः संत एकं भवंत्यंतर्भवंतीत्यर्थः। सामान्ये हि विशेषोंतर्भवति। मंत्रेषु कर्माण्येकं भवंति। मंत्रप्रका
शितानि कर्माणि क्रियंते। नामंत्रकमस्ति कर्म। यद्धि मंत्रप्रकाशनेन लब्धसत्ताकं सत्कर्म ब्राह्म
णेनेदं कर्मैतद्यमस्मै फलायेति विधीयते याप्युत्पत्तिर्ब्राह्मणेषु कर्मणां दृश्यते। सापि मंत्रेषु लब्धसत्ता
कानामेव कर्मणां स्वरूपस्पष्टीकरणं। न हि मंत्राप्रकाशितं कर्म किंचिद्ब्राह्मणे उत्पन्नं दृश्यते। त्रयी
शब्दस्य ऋग्यजुःसामाख्येष्वेव मंत्रेषु कर्माणि कवयो यान्यपश्यन्निति वाथर्वणे तस्माद्युक्तं मंत्रेषु कर्मा ॥६८॥
ण्येकं भवंतीति। तानि ह वा एतानि मनआदीनि संकल्पैकायनानि संकल्प एको यनं गमनं प्रलयो
येषां तानि संकल्पैकायनानि। संकल्पात्मकान्युत्पत्तौ। संकल्पे प्रतिष्ठितानि स्थितौ। समक्लृपतां स

अपि विदितं हि कर्म लोके प्रसिद्धं ४

कल्पंकृतवत्याविवहि द्यौश्च पृथिवी च द्यावापृथिव्यौ निश्चले लक्ष्येते।समकल्पेतां।वायुश्चाकाशंच
एतावपि संकल्पंकृतवंताविव।तथा समकल्पंता तामापश्च तेजश्च स्वेन रूपेण निश्चलानि लक्ष्यंते यत
एतेषां द्यावापृथिव्यादीनां संकॢप्त्यै संकॢप्तेः संकल्पनिमित्तं वर्षं संकल्पते समर्थीभवति
तथा वर्षस्य संकॢप्त्यै संकल्पनिमित्तमन्नं संकल्पते।वृष्टेर्हि नं सवत्यंनस्य संकॢप्त्यै प्राणाः संकल्पं
ते।अन्नमया हि प्राणाः अन्नोपष्टंभकाः।अन्नदामेति हि श्रुतिस्तेषां संकॢप्त्यै मंत्राः संकल्पंते प्राणव
न्तो मंत्रानधीते नाबलः।मंत्राणां हि संकॢप्त्यै कर्माण्यग्निहोत्रादीनि संकल्पंते।अनुष्ठीयमानानि
मंत्रप्रकाशितानि समर्थीभवंति फलाय।ततो लोकः फलं संकल्पते।कर्तृसमवायितया समर्थीभ
वतीत्यर्थः किं लोकस्य संकॢप्त्यै सर्वं जगत्संकल्पते स्वरूपावैकल्पाये।तदिदं सर्वं जगत्कार्यं स ग
न्तत्सर्वं संकल्पस्यैव मूलकमतो विशिष्टः स एषः संकल्पः अतः संकल्पमुपास्स्वेत्युक्त्वा फलमाह
तदुपासकस्य स यः संकल्पं ब्रह्मेति ब्रह्मबुद्ध्योपास्ते।कॢप्तान्वै धाता स्यमेते लोकाः फलमिति कॢ
प्तान्समर्थितान्संकल्पितान्सविद्वान्ध्रुवान्नित्यानत्यंतं ध्रुवापेक्षया ध्रुवश्च स्वयम्।लोके हि नोद्यध्रुवस्वेन
लोके ध्रुवं लब्धाप्तिर्यथार्थितेति ध्रुवः सन्प्रतिष्ठितानुपकरणसंपन्नानित्यर्थः।पशुपुत्रादिभिः प्रतितिष्ठ
ति।स्वर्गे नाशे स्वयं च प्रतितिष्ठत आत्मीयोपकरणसंपन्नो।अव्यथमानानमित्रादित्रासरहितान
व्यथमानश्च स्वयमभिसिध्यत्यभिप्राप्नोतीत्यर्थः।यावत्संकल्पस्य गतं संकल्पगोचरः तत्रास्य यथा

नि

कामचारोस्य यावन्मनः संकल्पस्य । ननु सर्वे वा संकल्पयस्यति तत्रस्यैव कामचारो भवति यः संकल्पं ब्रह्मेत्युपास्ते
इत्युपदिष्टं पूर्ववत् । चित्तं वाव संकल्पाद्भूयो चित्तं चेतयितृत्वं प्राप्तकालानुरूपबोधवत्त्वं च मनतीतानागतविष
फ ३ यप्रयोजननिरूपणसामर्थ्यं च । तत्संकल्पादपि भूयः । कथं । यदा वै प्राप्तव्यमिदमेवं प्राप्तमिति चितयते त
दादानाय वापोहाय वाथ संकल्पयते अथ मनस्यतीत्यादि पूर्ववत् । तानि संकल्पादीनि कर्मफलांतानि चित्तै
कायनानि चित्तात्मानि चित्तात्मकानि चित्ते प्रतिष्ठितानि चित्तस्थितीन्यपि पूर्ववत् । किं च चित्तस्य माहात्म्यं
यस्माच्चित्तं संकल्पादिमूलं । तस्माद्यद्यपि बहुविद्बहुशास्त्रादिपरिज्ञानवानचित्तो भवति । प्राप्तादि
वतपितृत्वसामर्थ्यविरहितो भवति । तं निपुणा लौकिका नायमस्ति विद्यमानोप्यसत्सम एवेत्येनमाहु
र्यच्चायं किंचिच्छास्त्रादि वेद श्रुतवान् तदप्यस्य व्यर्थमेवेति कथयंति । कस्माद्यद्ययं विद्वान्स्यादित्थमेवम
चित्तो न स्यात्तस्मादस्य श्रुतमप्यश्रुतमेवेत्याहुरित्यर्थः । अथाल्पविदपि यदि चित्तवान्भवति तस्मा एत
स्मै तद्गुणार्थग्रहणायैवान्येपि तापि शुश्रूषंते श्रोतुमिच्छंति । तस्माच्चित्तं ह्येवैषां संकल्पा ल्या ॥६४॥
दीनामेकायनमित्यादि पूर्ववत् । चित्तानुपचितान्बुद्धिमद्गुणैः स चित्तोपासको ध्रुवानित्यादिवोक्ता
र्थं । ध्यानं वाव चित्ताद्भूयो ध्यानं नाम शास्त्रोक्तदेवतादि आलंबनेषु चित्तस्याचलो भिन्नजातीयैरनंतरितः
प्रत्ययसंतान एकाग्रतेति यमाहुः दृश्यते च ध्यानस्य माहात्म्यं फलतः । कथं । यथा योगी ध्यायन्निश्च

ऽतो स्ववति ध्यानफलं लाति एवं ध्यायतीव निश्चलो दृश्यते पृथिवीयं ध्यायतीवांतरिक्षमित्यादि समानम
न्यद्देवाश्च मनुष्याश्च देवमनुष्या मनुष्या एव वा देवसमानं देवमनुष्याः शमादिगुणसंपन्ना मनुष्या देव
स्वरूपं न जहतीत्यर्थः । यस्मादेवं विशिष्टं ध्यानं तस्मादिह लोके मनुष्याणामेव धनैर्विद्यया गुणैर्वा
महत्त्वां महत्त्वं प्राप्नुवंति धनादिमहत्त्वहेतुं लभंत इत्यर्थः ध्यानापादांशा इवैव ध्यानस्यापादनमापा
दो ध्यानफललाभ इत्येतत्तस्यांशोऽवयवः कलाकाचिद्ध्यानफललाभकलावंत इत्यर्थः । ते भवंति
निश्चला इव लक्ष्यंते न क्षुद्रा इवाथ पुनर्ये ये पुनरल्पाः क्षुद्राः किंचिदपि धनादिमहत्त्वैकदेशमप्राप्ता
स्ते पूर्वोक्तविपरीताः कलहिनः कलहशीलाः पिशुनाः परदोषोद्भासकास्तथोपवादिनः परदोषं सामीप्ये
युक्तमेव वदितुं शीलं येषां ते उपवादिनश्च संवृत्ता अथ ये महत्त्वं प्राप्ता धनादिनिमित्तं तेऽन्यान्प्रति प्रभवंती
ति प्रभवो विद्याचार्यराजेश्वरास्ते ध्यानापादांशा इवेत्याद्युक्तार्थमतो दृश्यते ध्यानस्य महत्त्वं फलतो
ऽतो ध्यानमुपास्वेत्याद्युक्तार्थं ॥ ॥ विज्ञानं वाव ध्यानाद्भूयो विज्ञानं शास्त्रार्थविषयं ज्ञा
नं तस्य ध्यानकारणत्वात् ध्यानाद्भूयस्त्वं कथं तस्य भूयस्त्वमित्याह विज्ञानेन वा ऋग्वेदं विजानात्ययमृग्वेद
इति प्रमाणतया यस्यार्थज्ञानं ध्यानकारणं तथा यजुर्वेदमित्यादि । किं च पश्वादींश्च धर्माधर्मौ शास्त्रसिद्धौ
प्रसिद्धौ । साध्वसाधुनी लोकतः स्मार्ते वा दृष्टविषयं तत्सर्वं विज्ञानेनैव विजानातीत्यर्थः । तस्माद्युक्तं ध्या
नाद्विज्ञानस्य भूयस्त्वमतो विज्ञानमुपास्स्वेति । श्रृणूपासनफलं विज्ञानवतो विज्ञानेयुक्तांल्लोकांश्च ता विज्ञा

स्य

नवतालेकान्सानवतः श्चालिसियसिप्राप्नोति। विज्ञानं शास्त्रार्थविषयं। ज्ञानमन्यविषयं नैपुण्यं। तद्
द्विपुत्कान्लोकान्प्राप्नोतीत्यर्थः। यावद्विज्ञानस्य गतिरित्यादि पूर्ववत्॥ बलं वाव विज्ञानाद्भूयः। बलमित्यन्नो
पयोगजनितं मनसो विज्ञेये प्रतिभानसामर्थ्यं। मनन्नाद्यमादीनि नवेमा प्रतिस्तां नितोद्गति
ते। न हि रिपित्स्वोत्थानादि सामर्थ्यं विज्ञानवतां। यस्मात् च तमप्येकः प्राणी बलवानाकंपयते। यथा
हस्ती मत्तो मनुष्याणां शतं समुदितमपि। यस्मादेवमन्नाद्युपयोगनिमित्तं बलं तस्मात्स पुरुषो
यदा बली बलेन तद्वान्भवति। अथोत्थाता उत्थानस्य कर्तोत्तिष्ठंश्च गुरूणामाचार्याणां स्वपरिचरितापरि
चरणस्य शुश्रूषायाः कर्ता भवति। परिचरन्नुपसत्ता तेषां समीपगोऽन्तरङ्गः प्रियो भवतीत्य
र्थः। उपसीदंश्च सामीप्यं गच्छन्नेकाग्रतयाचार्यस्यान्यस्याप्युपदेष्टुर्गुरोर्द्रष्टा भवति। ततस्तदुक्त
श्रुत्वा श्रोता भवति। तत इदमेतदित्युक्तमेवमुपपद्यत इत्युपपत्तितो मन्ता भवति। ततः मन्वानो
बोद्धा भवति। एवमेवेदमिति। तत एवं निश्चित्य तदुक्तार्थस्य कर्तानुष्ठाता भवति। विज्ञानानुष्ठानफल
स्यानुभविता भवतीत्यर्थः। किंच बलस्य माहात्म्यं बलेन वै पृथिवी तिष्ठतीत्यादि पूर्ववत्॥ अन्नं वा ५७०।
व बलाद्भूयः। बलहेतुत्वात्। कथं बलस्य हेतुत्वमित्युच्यते। यस्मात् बलकारणमन्नं। तस्माद्य
द्यपि कश्चिद्दश रात्रीर्नाश्नीयात् सोऽन्नोपयोगनिमित्तस्य बलस्य हान्या म्रियते। न चेन्म्रियते।
यद्यप्युत जीवेद्दृश्यन्ते हि मासमप्यनश्नन्तो जीवन्तो। अथ जीवन्नप्यद्रष्टा भवति गुरोरपि तत एवाश्रो

त्रि

स्यात्। कदाचिद्दूर्वादीपरीतं सर्वं सर्वं च यदि यदा वर्षं न्यरु। अनश्नतो दर्शनादिक्रियास्वसमर्थः स
न्नन्नस्यायी आगमनमायन्नस्य प्राप्तिरित्यर्थः। सायस्य विद्धे सोन्नस्याऽयी आये द्रष्टेत्यद्रष्टो चत्यपेन अथा
न्नस्याये द्रष्टापि पाठ एवमेवं वैर्यं वा थोवा स्याद्विकायश्रावणाद्दृश्यते दृष्टेनोपयोगप्रयोगे दर्शनादिसामर्थ्यं
नतद्प्राप्तावन्नानुपास्वेति। फलं चान्नवतः प्रभूतान्नान्वेः सलोकान्पानवतः प्रभूतोदकान्यान्नपान
योनित्यसंबंधाल्लोकानभिसिध्यति समानमन्यत्। आपो वा अन्नाद्भूयस्योऽन्नकारणत्वात् यस्मादेवं त
स्माद्यदा यस्मिन्काले सुवृष्टिः सस्यहिता शोभना वृष्टिर्न भवति। तदा व्याधीयंते प्राणाः प्राणिनो दुःखि
नो भवंतीति किं निमित्तमित्याह। अन्नमस्मिन्संवत्सरे नः कनीयोऽल्पतरं भविष्यतीत्यथ पुनर्यदा सुवृष्टिर्भवति
तदानंदिनः सुखिनो हृष्टाः प्राणाः प्राणिनो भवंति। अन्नं बहु प्रभूतं भविष्यतीति। अप्संभवत्वादन्नस्य मूर्त्तौ
स्था न्नस्याप एवेमा मूर्त्तांमूर्त्तिभेदाकारपरिणता इति मूर्त्ता या पृथिवी यदंतरिक्षं इत्याद्या आप एवेमा मू
र्त्ता अतोऽपामुपास्वेति। फलं स यो ऽपो ब्रह्मेत्युपास्ते आप्नोति स सर्वान्कामान्काम्यान्तृप्तिमतां विष
यानित्यर्थः। अप्संभवत्वाच्चान्नस्य रसस्य अपामुपासनात्तृप्तिमांश्च भवति। समानमन्यत्। तेजो वा अद्भ्यो भू
यस्तेजो सोऽप्कारणत्वात्कथमप्कारणत्वमित्याह। यस्मादप्योनिर्तेजः तस्मात्तद्वै एतद्वै तद्वदेतत्ते
जो वायुमागृह्य स्वात्मना निश्चलीकृत्य वायुमाकाशमभितपति तप्त्वा आकाशमभिव्याप्नुवत्तपति यदा।

ग्र

तदाकुलौकिकी का निशावलि संतपति सामान्येन जगन्नितपति दिक्षान तो वार्षिक्य त्ति वेङ् त्ति प्रसिद्धंदि
लोके कारणमस्यु घतं दृश्यत: कार्यं न विषती त्ति विज्ञानं ते अएव तत्पूर्वमामानमुङ्क तं दर्शायिता
थानंतरं [illegible] प: सृजते। तोप्स्व द्वत्वाद्र्यो ऽद्ध्यस्तेज: किं वान्यत्तदेतत्तेज एव [illegible] नय [illegible] रूपेणा वर्षेदु
र्भवति [illegible] यं ऊर्ध्वो त्रियो र्ध्वमाति विंचकुदिस्तिर्यश्चा। तिर्यक्तिर्यग्गता। तिस्थसहोऽदास्तनय [illegible] न्नमाद्धा
द्वा श्चरति। तस्मात्तद्दर्शनो [illegible] लौकिकिकाविद्यापत्तितेस्तनयति वर्षिषिलिवै॥ [illegible] का कार्थं अत स्तेज
उपास्वेति। तस्य तेजस उपासपनाफलं तेजस्वी वै भवति। तेजोवत एव स लोकान्भास्वतः प्रकाशवतोपद
ततमस्का [illegible] काद्भानाप्नकृपहततमस्कान्तिसिध्य [illegible] र्थमन्यत॥ आत्राकाशो वाव
तेजो सो भूयान् [illegible] सहितस्य तेजः कारणत्वाद्वो [illegible]। वायुर्वी माग्ये तितेजसा महत्तौ वायुरितिप
त्रगिहनु तस्तेजसः। कारणंहि लोके कार्याद्भूयो दृष्टं यथा घटादिभ्यो मृत्तथाकाशो वायुसहितस्य ते
पा जसः कारणमिति। ततो भूयान् कथं। आकाशे वै सूर्याचंद्रमसौ [illegible] सौ तेजोरूपो विद्युन्नक्षत्राण्यग्नि हि
तेजोरूपाण्याकाशांत: [illegible] स्यांतर्वर्त्ति तद् [illegible] तरत। किंवा का [illegible] ना [illegible] पति। वा न्यमन्य आ ७१
कुतश्चेतर आकाशेन [illegible] अन्यः प्रतिशृणोति आकाशे रमते क्रीडत्यन्योन्यं स
र्वस्तथा न रमते वा काशे वंध्यादि वियोगे। आकाशे जायते। न मूर्त्तेनावष्टब्धे तथाकाशमभिलक्ष्यां

नसंबाधनं

कुरादिज्ञायते। नञतिलो ममाकाशमुपास्व। फलं शृणु य आकाशं ब्रह्मेत्युपास्ते आकाशवतो वै स लोकान्प्रकाशवतः प्रकाशाकाशयोर्नित्यसंबंधात्प्रका
शवतश्च लोकानसंबाधान् संबाधः। संबाधनं संबाधोऽन्योन्यपीडा तद्रहितानसंबाधानुरुगायवतो विस्तीर्णगतीन्विस्तीर्णप्रचा
रान्लोकानभिसिध्यति। यावदाकाशस्येत्याद्युक्तार्थम्॥ स्मरो वावाकाशाद्भूयः। स्मरणं स्मरोंतःकरणधर्मः। स आका
शाद्भूयानिति द्रष्टव्यं। लिंगव्यत्ययेन स्मर्तुः स्मरणे हि सत्याकाशादि सर्वमर्थवत् स्मरणवतो भोग्यत्वादसति तु स्मरणे सद
प्यसदेव। सत्त्वकार्याभावान्नापि सत्त्वं स्मृत्यभावे शक्यमाकाशादीनामवगंतुमित्यतः स्मरणस्याकाशाद्भूयस्त्वं दृश्यते हि लो
के स्मरणस्य भूयस्त्वं यस्मात्तस्माद्यद्यपि समुदिता बहव एकस्मिन्नासीरन्नुपविशेयुः। ते तत्रासीना अन्योन्यभाषितमपि न स्म
रंतश्चेत्स्युः। नैव ते कंचन शब्दं शृणुयुस्तथा न मन्वीरन्मंतव्यं चेन्न स्मरेयुस्तदा मन्वीरन् स्मरंतश्च यदा वा मन्वीरन्नतथा न विजानी
रन्यदा वा ते स्मरेयुः मंतव्यं विज्ञातव्यं श्रोतव्यं वाऽथ शृणुयुरथ मन्वीरन्नथ विजानीरन्। तथा स्मरेण वै मम पुत्रा एते इति पु
त्रान्विजानाति स्मरेण पशूंस्तोऽस्य स्या स्मरं ब्रह्मेत्युपास्वेत्युक्तार्थमन्यत्॥ आशा वाव स्मराद्भूयसी आशाप्राप्तस्याकांक्षा आ
तृष्णा काम इति यामाहुः पर्यायैः। सा च स्मराद्भूयसी। कथमाशया ह्यंतःकरणस्थया स्मरति स्मर्तव्यं। आशाविषयरूपं स्मर
न्सोऽस्मरोऽसवत्यत एवाशेद्धोऽयमाशयाभिवर्धितः स्मरस्ततः स्मरन्नृगादीन्मंत्रानधीते। अधीत्य च तदर्थं ब्राह्मणेवि
धीश्च श्रुत्वा कर्माणि कुरुते। तत्फलाशयैव च पुत्रांश्च पशूंश्च कर्मफलभूतानितीच्छते अभिवांछति। आशयैव तत्साधनान्य
नुतिष्ठंती। इमं च लोकमाशयैव स्मरं लोकसंग्रहहेतुभिरिच्छते ऽमुं च लोकं आशोद्भवस्मरं तत्साधनानुष्ठानेनेच्छते। त
आशारश्मिबद्धः स्मराकाशादि नामपर्यंतं जगच्चक्रीभूतं प्रति प्राणि अत आशायाः स्मरादपि भूयस्त्वमित्यत आ
शामुपास्व। स यस्त्वाशां ब्रह्मेत्युपास्ते शृणु तस्य फलं आशयास्य सदोपासितयास्योपासकस्य सर्वे कामाः समृध्यंति स

मद्भिंगळंति। अमोघाहास्या आशिषः प्रार्थनाः सर्वा भवंति। यत्प्रार्थितं सर्वं तदवश्यं भवतीत्यर्थः। यावदायागतमित्यादि रू-
र्वदेवतानामोपक्रममात्रांतं कार्यकारत्वेन निमित्तनैमित्तिकत्वेन चोत्तरोत्तरस्य पूर्वस्य तत्परावस्थितं स्मृति निमित्तसद्भावमाकोशा
रव्रानापारौ र्विपाशितं सर्वं सर्वतो विसमिव तं तु तिर्य स्मिन्प्राणे समर्पितं येन च स र्वतो व्यापिनो बहिर्गतेन स्त्रेण मणिगणा न
इव सूत्रेण ग्रथितं। विवृतं च स एष प्राणो वै आनुगाया त्रयान्। कथमस्य त्रयस्त्वमित्याह। दृष्टांतेन सर्पयंस्तद्रूपत्वं। यथा
विलोके रथचक्रस्याराः रथनाभौ समर्पिताः संप्रोताः संप्रवेशिता इत्येतदेवमस्मिंल्लिंगसंघातरूपे प्राणे प्रज्ञात्मनि
देहिके मुख्ये यस्मिन्परा देवता नामरूपव्याकरणाय यादृशो दोषपति विं वक्तुं विनाकुत्र विन्यैष्टाय स्कंध महाराजस्येच स-
र्वाधिकारी श्वरस्य। कस्मिन्न्वहमुत्क्रांत उत्क्रांतो भविष्यामि कस्मिन्वा प्रतिष्ठिते प्रतिष्ठास्यामीति स प्राणमसृजतेति श्रुतेः। यं
स्य चायं वा अनुगतस्सर्वं तत् यथा रथस्यारेषु नेमिरर्पिता नाभावरा अर्पिता एवमेवैता भूतमात्राः प्रज्ञामात्रास्वर्पिताः प्रज्ञामात्राः प्राणे
र्पिताः। स एष प्राण एव प्रज्ञात्मेति कौषीतकी नाम तदेवमस्मिन्प्राणे सर्वं यथोक्तं समर्पितमिति। अमतः स एष प्राणोऽपरतंत्रः
प्राणेन स्वतंत्रात्वैव प्रयाति। नान्यत् कृतं गमनादि क्रियास्वस्य सामर्थ्यमित्यर्थः। सर्वक्रियाकारकफलभेदजातं प्राण एव
न प्राणाद्बहिर्दिस्सृतमस्तीति प्रकरणार्थः। प्राणः प्राणं ददाति। यद्ददाति तत्स्वात्मस्तूतमेव। यस्मै ददाति तदपि प्राणायैवातः
पित्राद्याख्योऽपि प्राण एव। कथं पित्रादिशब्दानां प्रसिद्धार्थोत्सर्गेण प्राणविषयत्वमित्युच्यते। सति प्राणे पित्रादिषु पित्रादि-
शब्दप्रयोगात्तदुत्क्रांतौ च प्रयोगाभावात्। कथं तदित्याह। स यः कश्चित्पित्रादीनामन्यतमं यदितं त्वंकारमिव। तद्वद ७२॥
ननुरूपमिव किं विरुद्धवचनं त्वंकारादियुक्तं प्रत्याह। तदेनं पार्श्वस्था आहुर्धिकिनो धिक्कारस्त्वंघिगस्तु त्वामित्येवं। पितृहा वै त्वं
पितृहेत्यादि। अथैनानेवोत्क्रान्तप्राणांस्त्यक्तदेहनायान्यद्यपि शूलेन समासंसमस्य व्यतिषंदहेद्दिष्य न्यस्य संदेहे

श्री

एवमतिक्रूरमपि कर्म समासव्यासादिप्रकारेणोत्क्रांतप्राणं तं देहं संदहन्कर्मैव कुर्वाणं नैवैनं ब्रूयुः पितृहेत्यादि। तस्मादन्व
यव्यतिरेकाभ्यामवगम्यते एतानि नामान्यस्य पि प्राण एवेति। तस्मात्प्राणो ह्येवैतानि सर्वपित्रादीनि सर्वाणि भवति चलानि स्थि
राणि च। स वा एष प्राणविदेवं यथोक्तप्रकारेण पश्यन्फलतोऽनुभवन्नेवं मन्वान उपपत्तिभिश्चिंतयन्नेवं विजा
नन्नुपपत्तिभिः संयोज्यैवमेवेति निश्चयं कुर्वन्नित्यर्थः। मननविज्ञानाभ्यां हि संहतः शास्त्रार्थो निश्चितो दृष्टो भ
वेदत एवं पश्यन्नतिवादी भवति नामाद्याशान्तमतीत्य वदनशीलो भवतीत्यर्थः। तं चेद्ब्रूयुस्त्वं यद्येवमतिवादिनं सर्ववदा
सर्वैः शब्दैर्नामाद्याशान्तमतीत्य वर्तमानं प्राणमेवं वदत्येवं पश्यंतमतिवदनशीलमतिवादिनं ब्रह्मादिस्तंबपर्यं
न्तस्य हि जगतः प्राण आत्माहमिति ब्रुवाणं यदि ब्रूयुरतिवाद्यसीति वाढमतिवाद्यस्मीति ब्रूयात्। नापह्नुवीत
कस्माद्ध्यसौ यथोक्तं प्राणं सर्वेश्वरमयमहमस्मीत्यात्मत्वेनोपगतः॥ ॥ स एष नारदः सर्वातिशायं प्राणं
स्वमात्मानं सर्वात्मानं श्रुत्वा नातः परमस्तीत्युपरराम। न पूर्ववत्किमस्ति भगवः प्राणाद्भूय इति पप्रच्छ। यतस्त
सर्वविकारानृतब्रह्मज्ञानेन परितुष्टमकृतार्थं परमार्थसत्यातिवादिनमात्मानं मन्यमानं योग्यं शिष्यं मि
थ्याग्रहविशेषाद्विप्रच्यावयन्नाह भगवान्सनत्कुमारः। एष तु वा अतिवदति यमहं वक्ष्यामि न प्राणवि
त्तिवादी परमार्थतो नामाद्यपेक्षं तु तस्यातिवादित्वं यस्तु भूमाख्यं सर्वातिक्रांतं तत्त्वं परमार्थसत्यं वेद। सोऽति
वादीत्यत आह। एष तु वा अतिवदति। यः सत्येन परमार्थसत्यविज्ञानवत्तयाऽतिवदति। सोऽहं त्वां प्रपन्नो
भगवन्सत्येनातिवदानि। तथा मां नियुङ्क्ष्व भगवन्यथाहं सत्येनातिवदानीत्यभिप्रायो यद्येवं सत्येनैवा
तिवदितुमिच्छसि। सत्यमेव तु तावद्विजिज्ञासितव्यमित्युक्त आह नारदः। तथास्तु तर्हि सत्यं भगवो विजि

ज्ञासे विशेषेण। ज्ञातुमिच्छेयं चेत्तोहमिति। यदा वै सत्यं परमार्थतो विजानाति इदं परमार्थतः सत्यं इति। ततो
नृतं विकारजातं वाचारम्भणं हित्वा सर्वविकारावस्थं सदेवैकं सत्यमिति तदेवाथ वदति। यद्वदति। ननु विकारो
पि सत्यमेव नाम रूपे सत्यं ताभ्यामयं प्राणश्छन्नः प्राणा वै सत्यं तेषामेष सत्यमिति श्रुत्यंतरात् सत्यमुक्तं सत्य
स्य श्रुत्यंतरे वि कारस्य ननु परमार्थापेक्षमुक्तं। किं तु तत्। इंद्रियविषयाविषयत्वापेक्षं सच्च त्यच्चेति सत्यमित्युक्तं
तद्द्वारेण च परमार्थसत्यस्योपलब्धिर्विवक्षितेति प्राणा वै सत्यं तेषामेष सत्यमिति चोक्तं। मिरूपित द्रष्टमेव
रूपत्रयस्य प्राणविषयात् परमार्थसत्यविज्ञानात् निमानात्मकत्वाप्यनारंदिय सदेव सत्यं परमार्थतो स्मा
ख्यातं तद्विज्ञानं पयिष्यामीत्येष विशेषविवक्षितोर्थः नाविजानन् सत्यं वदतीति यस्त्व विजानन् वदति सोग्न्या
दिशब्देनाग्न्यादीन् परमार्थरूपान् मन्यमानो वदति न तु ते हि रूपत्रयव्यतिरेकेण परमार्थतः संति। तथा
तान्यपि रूपाणि सदपेक्षया नैव संतीत्यतो नापि विजानन् सत्यं वदति विज्ञानेनैव सत्यं वदति न चेत्सत्य
विज्ञानमविजिज्ञासितं [illegible]मप्रार्थितं ज्ञायत इत्याह विज्ञानं त्वेव विजिज्ञासितव्यमिति। यद्येवं विज्ञानं भ
गवो विजिज्ञास इति। एवं सत्यादीनां उत्तरोत्तरकारणं करोत्यंतानां पूर्वपूर्वहेतुत्वं व्याख्येयं। यदा वै मनुते अथ
मतिर्मननं तर्को मंतव्यविषय आदर आस्तिक्यबुद्धिः श्रद्धा निष्ठा गुरुशुश्रूषादिस्तत्परत्वं ब्रह्मविज्ञानाय १७३
दा वै करोति कृतिरिंद्रियसंयमश्चित्तैकाग्रताकरणं च। सत्यां हि तस्यां निष्ठादीनि यथोक्तानि संवृत्ति विज्ञाना
वसानानि। सापि कृतिर्यदा सुखं लभते सुखं निरतिशयं वक्ष्यमाणं लब्धव्यं मयेति मन्यते तदा सव्ती

(यत्नः कार्य इति प्राप्ते तत इदमुच्यते)

दृष्टत्वरादि लोके तस्मा ... कत्वं नाल्पे सुखमस्तीत्युक्तो भूमैव सुखं ५

यो यः । यथादृष्टफलसुखकृतिस्तथेहापि निःसुखलक्षणाकरोति । सवि प्रदपि फले लक्षणमुच्यते । तदुद्दिश्य प्रश्नत्रयं पप्रच्छे
उरथेदानीं कृत्यादिक्रमेणान्तरेषु सत्सु सत्यं स्वयमेव प्रतिभासते न तद्विज्ञानाय पृथग्यत्नः कार्य इति प्राप्ते तत इदमेव
उच्यते सुखं चेव विजिज्ञासितव्यमित्यादि । सुखं त्वेव भगवो विजिज्ञास इति । अस्मिन्सुखे स्तुताया कृत्योः वेदं मामह
न्निरतिशयं बहुभिति पर्यायाः । तत्सुखं । ततोऽर्वाक् सातिशयत्वाद् अल्पमतस्तस्मिन्नल्पे सुखं नास्त्यल्पस्याधिकतृष्णा
हेतुत्वात् तृष्णा च दुःखबीजं । न हि दुःखबीजं सुखं दृष्टादि दुःखबीजत्वात् सर्वाल्पत्वात् । किंलक्षणोसौ भूमेत्याह य
त्र यस्मिन्भूम्नि स तत्त्वे नान्यद्द्रष्टव्यमन्येन करणेन द्रष्टान्यो विभक्तो दृश्यात् पश्यति । तथा नान्यच्छृणोति । नामरू
पयोरेवांतर्भावाद्विषयभेदस्य तद्ग्राहकयोर्वाक्दर्शनश्रवणयोर्ग्रहणमन्येषां चोपलक्षणार्थत्वेन मननं त्वत्रो
क्तं द्रष्टव्यं नान्यन्मनुत इति । प्रायशो मननपूर्वकत्वाद्विज्ञानस्य । तथा नान्यद्विजानाति । एवंलक्षणो यः स भूमा ।
किमत्र प्रसिद्धान्यदर्शनाभावो भूम्न्युच्यते । नान्यत्पश्यतीत्यादिना । अथान्यन्न पश्यत्यात्मानं पश्यतीत्येतत्किं
तोयमन्यदर्शनाभावमात्रमित्युच्यते । तदद्वैतसंव्यवहारविलक्षणोऽस्मिन्नयं येनेति भवति । अथान्यदर्शनवि
शेषप्रतिषेधेनात्मानं पश्यतीत्युच्यते । तदेकस्मिन्नेव क्रियाकारकफलभेदोऽभ्युपगम्यते तौ सवे एवं को दोषः स्या
नन्वयमेव दोषः संसारानिवृत्तिः क्रियाकारकफलभेदो हि संसार इत्यात्मन्येकत्र एव क्रियाकारकफलभेदः संसारवि
लक्षण इति चेन्न । आत्मनो वै निर्विशेषत्वाद्वाच्याभ्युपगमे दर्शनादिक्रियाकारकफलभेदाभ्युपगमस्य त्वाद्वै
मात्रत्वादन्यदर्शनाभावे विशेषेऽपि यत्रान्यन्न पश्यतीति च विशेषणमनर्थकं स्यादिति चेद् दृश्यते हि लोके य
त्रान्योऽन्यं न पश्यतीत्युक्ते स्तंभादीनात्मानं च नान्येन पश्यतीति गम्यते एवमिहापीति चेन्न तत्त्वमसीत्येक

कत्वोपदेशादधिकरणाधिकर्त्तव्यभेदानुपपत्तिस्तथासदेकमेवाद्वितीयंसत्यमितिषष्ठेनिर्द्धारितत्वाच्चदृ
श्येनान्येनसंदृशे तिष्ठतिरूपमस्यविज्ञातारमरेकेनविजानीयादित्यादिश्रुतिभ्यः स्यान्मतनिदर्शनाद्यनुप
पत्तिः यत्रेतिविशेषणमनर्थकंप्राप्तमितिचेन्नाविद्याकृतभेदापेक्षत्वात् यथासत्त्वेकमेवाद्वितीयंचबुद्धिप्रकृता
मपेक्ष्यसदेकमेवाद्वितीयमितिसंख्याबाधनमप्युच्यते एवंभूम्न्येकस्मिन्नेवयत्रेतिविशेषणमविद्यावस्था
यामन्यदर्शनानुवादेनभूम्नस्तदभावलक्षणस्यविवक्षितत्वान्नान्यत्पश्यतीतिविशेषणं। तस्मात्संसा
रव्यवहारोभूम्निनास्तीतिसमुदायार्थः। अथयत्राविद्याविषयेऽन्योन्येनान्यत्पश्यतीतितदल्पमविद्या
कालभावीत्यर्थः। यथास्वप्नदृष्टंवस्तुप्राक्प्रबोधात्तत्कालभावीति तद्वत्तदेवतन्मर्त्यंविनाशिस्वप्नव
स्तुवदेवतद्विपरीतोभूमायस्तदमृतं। तच्छब्दोऽमृतत्वपरः। सतर्ह्येवंलक्षणोभूमाहेभगवन्कस्मि
ये न्प्रतिष्ठितइत्युक्तेनारदेनाह। सनत्कुमारः स्वेमहिम्नीति स्वे आत्मीयेमहिम्निमाहात्म्येविभूतौप्रतिष्ठि
तोभूमा। यदिप्रतिष्ठामिच्छसिक्वचिद्यदिवापरमार्थमेवपृच्छसि। नमहिम्न्यपिप्रतिष्ठितइतिब्रूमोऽप्रतिष्ठितो
भूमाक्वचिदपीत्यर्थः। यदिस्वमहिम्निप्रतिष्ठितोभूमाकथंतर्ह्यप्रतिष्ठउच्यते शृणुगोअश्वादिमहिमेत्याच ३६५
य तिप्रसिद्धं तदाश्रितस्तत्प्रतिष्ठश्चैत्रोभवति यथानाहमेवंस्वतोन्यंमहिमानमाश्रितोभूमाचैत्रवदितिब्र
स वी मीत्रहेतुत्वेनान्योऽन्यस्मिन्प्रतिष्ठितइतिव्यवहितेनसंबंधः किंत्वेवंब्रवीमिइतिहोवाचसएवेत्यादि।। कस्मात्पुन ७४।
क्वचिन्नप्रतिष्ठितइत्युच्यते। यस्मात्सएवभूमाधस्तान्नतद्व्यतिरेकेणान्यद्विद्यते। यस्मिन्प्रतिष्ठितःस्याद्यथोपरि
ष्टादित्यादिसमानं। सतिह्यन्यस्मिन्भूमाप्रतिष्ठितस्यान्नतुतदस्ति। सएवतुसर्वमतस्तस्मादप्रति
गावश्वोऽव्यगोऽश्वंहस्तदेवयद्दावः सर्व्वगावाश्वादिमहिमे ४ वैर अ७५
श्वा

सो न कस्मिन्प्रतिष्ठितो। यत्र नान्यत्पश्यतीति अधिकरणाधिकर्त्तव्यतानिर्देशात् स एवाधस्तादिति परोक्षनि
र्देशात्। ऽद्रष्टुर्जीवादन्योऽस्मा स्यादित्याशंका कस्यचिन्माभूदिति। अथातोऽनंतरमहंकारादेशोऽहंकारेणादि
श्यत इत्यहंकारादेशो ऽद्रष्टुरनन्यत्वदर्शनार्थं स्मैव निर्दिश्यते हंकारेणाहमेवाधस्तादित्यादिना। अहंका
रेण देहादिसंघातोप्यादिश्यते अविवेकिभिरित्यतस्तदाशंकामाभूदित्यथानंतरमात्मादेश आत्मनैव केवले
न सत्स्वरूपेण शुद्धेनादिश्यते। आत्मैव सर्वतः सर्वमित्येवमेकमजं सर्वतो व्योमवत्पूर्णमन्यशून्यं प्रपश्यन्स्वे
एष एवं विद्वान्मननविज्ञानाभ्यामात्मरतिरात्मन्येव रतीरमणं यस्य सोयमात्मरतिस्तथात्मक्रीडो। देह
मात्रसाधना रतिर्बाह्यसाधना क्रीडा। लोके स्त्रीभिः सखिभिश्च क्रीडतीति तद्दर्शनान्न तथा विदुषः। किं तर्ह्या
त्मविज्ञाननिमित्तमेवोभयं भवतीत्यर्थः। मिथुनं द्वंद्वजनितं सुखं तदपि द्वंद्वनिरपेक्षं यस्य विदुष आत्मा
त्मानंदः शब्दादिनिमित्त आनंदोऽविदुषां न तथा यस्य विदुषः सु किं तर्ह्यात्मनिमित्तमेव सर्वदा सर्वप्रका
रेणात्र देहजीवितभोगादिनिमित्तबाह्यवस्तुनिरपेक्ष इत्यर्थः। स एवंलक्षणो विद्वान्जीवन्नेव स्वाराज्येऽभि
षिक्तः पतितेऽपि देहे स्वराडेव भवति। यत एवं तस्य सर्वेषु लोकेषु कामचारो भवति। प्राणादिषु पूर्वेषु भूमिषु
तत्रास्येति तावन्मात्रपरिच्छिन्नं कामचारत्वमुक्तमन्यराजत्वं चार्थप्राप्तं सातिशयत्वाद्यथाप्राप्तस्वाराज्य
कामचारत्वानुवादेन तन्निवृत्तिरिहोच्यते स स्वराडित्यादिना। अथ पुनर्येऽन्यथाऽतो यथोक्तदर्शनाद
न्यथा वैपरीत्येन यथोक्तमेव वा सम्यङ्न विदुस्तेऽन्यराजानो भवंति। अन्यः परो राजा स्वामी ये

षांतेऽन्यराजानस्ते किं च क्षय्यलोकाः क्षय्यो लोको येषां ते क्षय्यलोकाः भेददर्शनस्याल्पविषयत्वादल्पं च तन्मर्त्यं
मित्यवोचाम। यस्माच्चैते तद्विपरीतदर्शिनस्तस्मात्क्षय्यलोकाः स्वदर्शनानुरूप्येणैव भवंति। अत एव तेषां सर्वे
षु लोकेष्वकामचारो भवति॥ ॥ तस्य ह वा एतस्येत्यादि स्वाराज्यं प्राप्तस्य प्रकृतस्य विदुष इत्यर्थः। प्राक्स
दात्मविज्ञानात्स्वात्मनोऽन्यस्मात्सतः प्राणादेर्नामांतस्योत्पत्तिप्रलयावभूतां सदात्मविज्ञाने तु सती
दानीं स्वात्मत एव संवृत्तौ। तथा सर्वोऽप्यन्योऽव्यवहार आत्मत एव विदुषः। किं च। तदेतस्मिन्नर्थे एष श्लोको
मंत्रोऽपि भवति। न पश्यः पश्यतीति पश्यो यथोक्तदर्शी विद्वानित्यर्थः मृत्युं मरणं। रोगं ज्वरादि। दुःखतां
दुःखभावं चापि न पश्यति। सर्वं ह सर्वमेव स पश्यः पश्यत्यात्मानमेव सर्वं। ततः सर्वमाप्नोति। सर्वशः
सर्वप्रकारैरिति। किं च स विद्वान्प्राक्सृष्टिप्रभेदादेकधैव भवत्येकधैव च सन्त्रिधादिभेदैरनंतभेदप्र
कारो भवति सृष्टिकाले। पुनः संहारकाले मूलमेव स्वं पारमार्थिकमेकधाभावं प्रतिपद्यते स्वतंत्र एवे
ति विद्याफलस्तुतये भूमानं स्तौति। अथेदानीं यथोक्ताया विद्यायाः सम्यगवभासकारणं सुखावसा
यकारणस्येवादर्शस्य विशुद्धिकारणं साधनमुपदिश्यते। आहारशुद्धावाहियत इत्याहारः शब्दा ! क्रि
द्यादि विषयविज्ञानं भोक्तुर्भोगायाह्रियते। तस्य विषयोपलब्धिलक्षणस्य विज्ञानस्य शुद्धिराहारशुद्धी
रागद्वेषमोहदोषैरसंसृष्टं विषयविज्ञानमित्यर्थः। तस्यामाहारशुद्धौ सत्यां तद्वतोऽन्तःकरणस्य सत्त्वस्य शु ॥७५॥
द्धिर्नैर्मल्यं भवति। सत्त्वशुद्धौ च सत्यां यथावगते भूमात्मनि ध्रुवाऽविच्छिन्ना स्मृतिरनुस्मरणं भवति।
तस्यां च लब्धायां स्मृतिलंभे सति सर्वेषामविद्याकृतानर्थपाशानां रूपाणामनेकजन्मांतरानुभवभावनाक

भूत

ठिनीकृतानां हृदयाश्रयाणां ग्रंथीनां विप्रमोक्षो विशेषेण प्रमोक्षणं विनाशो भवतीति। यत एतदुत्त
रोत्तरं यथोक्तम् आहारशुद्धिमूलं। तस्मात्सा कार्येत्यर्थः। सर्वं शास्त्रार्थमशेषत एवोक्त्वा आख्यायिकामुप
पसंहरति श्रुतिस्तस्मै मृदितकषायाय। वार्क्ष्यादिरिव कषायो रागद्वेषादिदोषः सत्त्वस्य रंजनारूप
त्वात्स ज्ञानवैराग्याभ्यासरूपक्षारेण क्षालितो मृदितो विनाशितो यस्य नारदस्य तस्मै योग्याय
मृदितकषायाय। तमसो ऽविद्यालक्षणात्पारं परमार्थतत्त्वं दर्शयति। दर्शितवानित्यर्थः। कोऽसौ भ
गवानुत्पत्तिं प्रलयं चैव भूतानामागतिं गतिं। वेत्ति विद्यामविद्यां च स वाच्यो भगवानित्येवंधर्मा स
नत्कुमारः स एव सनत्कुमारं देवं स्कंद इत्याचक्षते। कथयंतीति तद्विदः। द्विर्वचनमध्यायपरिसमाप्त्यर्थं।
॥ ॥इति श्रीमद्गोविंदभगवत्पूज्यपादशिष्यस्य परमहंसपरिव्राजकाचार्यस्य श्रीमच्छंकरभगवतः
कृतौ छांदोग्योपनिषद्विवरणे सप्तमः प्रपाठकः समाप्तः॥ ॥ॐतत्सत्॥ यद्यपि दिग्देशकालादि
भेदशून्यं ब्रह्म सदेकमेवाद्वितीयम् आत्मैवेदं सर्वमिति षष्ठसप्तमयोरधिगतं। तथापीह मंदबुद्धीनां
दिग्देशादिभेदवद्वस्त्विति एवं भाविता बुद्धिर्न शक्यते सहसा परमार्थविषया कर्तुमिति च न धिगम्य च ब्रह्म न
पुरुषार्थसिद्धिरि[illegible]ति तदधिगमाय हृदयपुंडरीकदेश उपदेष्टव्यो। यद्यपि सत्सम्यक्प्रत्ययैकविषयं ला ४
निर्गुणं चात्मतत्त्वं। तथापि मंदबुद्धीनां गुणवत्त्वस्येष्टत्वात्सत्यकामादिगुणवत्त्वं च वक्तव्यं। तथा ५ सह
यद्यपि ब्रह्मविदां स्त्र्यादिविषयेभ्यः स्वयमेवोपरमो भवति। तथाप्यनेकजन्मविषयसेवाभ्यासजनिता

व २ विषयविषयाकृष्टानसहस्राणि वर्षैर्यितुं न यन्नाकृष्य तदृतिब्रह्मचर्यादिसाधनविशेषो विधातव्यः। तथा यद्य
पि आत्मैकत्वविदां गत्वागमनं गंतव्यं तावदविद्यादिदोषवशाक्लिष्टे निमित्तक्षये गगनइव विद्युदुत्पन्ना इव
वायुर्दग्धेंधनइवाग्निः स्वात्मन्येव निवृत्तिः। तथापि गतिगमना दिवासितबुद्धीनां हृदयदेशगुणविशि
ष्टब्रह्मोपासने सकामानां मूर्धन्यया नाड्या गतिर्वक्तव्येत्यष्टमः प्रपाठक आरभ्यते दिग्देशगुणगतिफलभे
दशून्यं हि परमार्थसदद्वयं ब्रह्म मंदबुद्धीनामसदिव प्रतिभाति। मार्गस्थास्तावद्भवंतु ततः शनैः पर सन ५
मार्थसदपि ग्राहयिष्यामीति मन्यते श्रुतिः। अथानंतरं यदिदं वक्ष्यमाणं दहरमल्पं पुंडरीकं पुंडरीक
सदृशं वेश्मइव वेश्म द्वारपालाद्यादिमत्वादस्मिन्ब्रह्मपुरे ब्रह्मणः परस्य पुरं राज्ञोऽनेकप्रकृतिमद्यथा पु
रं तथेदमनेकेंद्रियमनोबुद्धिभिः स्वाम्यर्थकारिभिर्युक्तमिति ब्रह्मपुरं पुरइव वेश्म राज्ञो यथा। तथा तस्मि
न्ब्रह्मपुरे शरीरे दहरं वेश्म ब्रह्मणउपलब्ध्यधिष्ठानमित्यर्थः यथा विष्णोः सालग्रामोऽस्मिन्हि स्वविकारशुंगे
देहे नामरूपव्याकरणाय प्रविष्टं सदाख्यं ब्रह्म जीवेनात्मनेत्युक्तं। तस्मादस्मिन्हृदयपुंडरीके वेश्म
न्युपसंहृतकरणैर्बाह्यविषयविरक्तैर्विशेषतो ब्रह्मचर्यसत्यसाधनाभ्यां युक्तैर्वक्ष्यमाणगुणवध्यायमा
नैर्ब्रह्मोपास्यं लक्ष्यत इति प्रकरणार्थः। दहरोऽल्पतरोऽस्मिन्दहरे वेश्मनि वेश्मनोऽल्पत्वात्तदंतर्वर्तिनोऽल्प
त्वमंतराकाशाख्य आकाश एव ब्रह्म आकाशो वै नामेति हि वक्ष्यति आकाशइवाशरीरत्वात्सूक्ष्मत्वसर्वगत ॥७६॥
शा २ त्वसामान्याच्च तस्मिन्नाकाशे यदंतर्मध्ये तदन्वेष्टव्यं। तद्वाव तद्वाव विशेषेण जिज्ञासितव्यं गुरुपास्य श्र
वणाद्युपायैरन्विष्य साक्षात्करणीयं इत्यर्थः। तं चेदेवं वक्तवंतमाचार्यं यदि ब्रूयुरंतेवासिनः चोद

२ तस्मिन्हृदयपुंडरीके वेश्मनि

येयुः कथं यदिदमस्मिन्ब्रह्मपुरे परिच्छिन्नेन तत्हृदं दहरं पुंडरीकं वेश्म। ततोप्यंतरल्पतरश्च वाकाशः। पुंडरीके
एवं वेश्मनि तावत् किं स्यात्। किं ततोल्पतरे खे यद्भवेदित्याहुः। यद्दहरोस्मिन्नंतराकाशः। किं तदत्र विद्यते। न
किंचन विद्यत इत्यभिप्रायः। यदि नाम बदरमात्रं किमपि विद्यते। किं तस्यान्वेषणेन विजिज्ञासनेन वा फलं
विजिज्ञासितुः स्यात्। तेनाय तत्रान्वेष्टव्यं विजिज्ञासितव्यं वा। न तेन प्रयोजनमित्युक्तवंतः। स आचार्यो ब्रू
यादिति। [illegible] तर्वचनं। शृणुत तत्र यद्ब्रूथ। पुंडरीकांतःखस्याल्पत्वात्तत्स्थमल्पतरं स्यादिति। तदसन्न हि
खं पुंडरीकवेश्मगतं पुंडरीकादल्पतरं मयावाचं दहरोस्मिन्नंतराकाश इति। किं तर्हि। पुंडरीकमल्पं त
दनुविधायितत्स्थमंतःकरणं पुंडरीकाकाशपरिच्छिन्नं। तस्मिन्विशुद्धे संहृतकरणानां योगिनां स्व
च्छ इवादर्शे प्रतिबिंबरूपमादर्श इव स्वच्छे स्वच्छं विज्ञानज्योतिःस्वरूपावभासं तावन्मात्रं ब्रह्मोपलभ्य
त इति दहरोस्मिन्नंतराकाश इत्यवोचाम। अंतःकरणोपाधिनिमित्तं स्वतस्तु यावानयं प्रसिद्धः परिमाणतो
यमाकाशो भौतिकः। तावानेषोंतर्हृदय आकाशो यस्मिन्नन्वेष्टव्यं विजिज्ञासितव्यं चावोचाम। नाप्याका
शात्तु अल्पपरिमाणत्वं समभिप्रेत्य तावानित्युच्यते। किं तर्हि ब्रह्मणो नरूपस्य दृष्टांततरस्य स्यात्। सा
वाक् कथं पुनर्नाकाशमिव ब्रह्मेत्यवगम्यते। येनावृतं खं च दिवं महीं च। तस्माद्वा एतस्मादात्मन आकाशः
संभूतः। एतस्मिन्नु खल्वक्षरे गार्ग्याकाश ओतश्च प्रोतश्चेत्यादिश्रुतिभ्यः। किं चास्मिन्द्यावापृथिवी अंतरे ला
काशो वा धूमपानादिविशिष्टतरे व समाहिते सम्यगाहिते स्थिते। यथा वा अरा नाभाविव युक्ता हि। तथोभा
वग्निश्च वायुश्च सूर्यादि समानं। यच्चास्यात्मन आत्मीयत्वेन देहे वर्तते विद्यत इह लोके तथा यच्चात्मीयत्वेन

समा४

सु१ नु२

नविद्यते।नइहसविघ्नंनास्तीत्युच्यते।नचात्यंतमेवोक्तस्याहृदयाकाशोसमाधानोपपद्यतेसर्वेदेव
मुक्तवंतंब्रूयुःपुनरंतेवासिनो।स्मिंश्चेद्यथोक्तेवेद्यदिदंब्रह्मपुरोपलक्षितांतराकाशइदंवेत्यर्थः।इदंस
र्वंसमाहितं।सर्वाणिचभूतानिसर्वेचकामाः।कथमाचार्येणोक्ताःकामाअंतेवासिभिरुच्यंते।
नेषदोषाययच्चास्येहास्तियच्चनास्तीतिउक्ताएवह्याचार्येणकामाः।अपिचसर्वशब्देनवोक्ताएवका
माः।यदायस्मिन्कालेएतच्छरीरंजरावलीपलितादिलक्षणावयोहानिर्वाप्नोतिशस्त्रादिनावाद्व
न्कंप्रध्वंसतेविस्रंसतेविनश्यतिकिंततोतन्यदतिशिष्यतेयदाश्रितंहीदंदीपस्नेहादिवद्वदा
नाशोदेहनाशेपिदेहाश्रयमुत्तरोत्तरंपूर्वपूर्वंशेषनाशान्नश्यतीत्यभिप्रायएवंप्राप्तेनाशेकिंततो
यद्यथोक्तादतिरिष्यतेऽवतिष्ठतेनकिंचिनावतिष्ठतइत्यभिप्रायः।एवमेवमंतेवासिभिश्चोदितआचा
र्येश्र्यात्तन्मतिमपनयन्कथं।अस्यदेहस्यजरयैतद्यथोक्तमंतराकाशंब्रह्मयस्मिन्सर्वंसमाहितंन का।रा।
जीर्यति।देहवन्नविक्रियतइत्यर्थः।नचास्यवधेनशस्त्रादिघातेनएतद्धन्यते।यथाकाशंकिमुततोपि
सूक्ष्मतरमशब्दमस्पर्शंब्रह्मदेहेंद्रियादिदोषैर्नस्पृश्यतइत्यर्थः।कथंदेहादिदोषैर्नस्पृश्यतइत्येत
स्मिन्नवसरेवक्तव्यंप्राप्तं।तत्प्रकृतव्यासंगोमाभूदितिनोच्यते।इंद्रविरोचनाख्यायिकायामुपरिष्टा ॥७७॥
द्वक्ष्यामोयुक्तितएतत्सत्यमवितथंब्रह्मपुरंब्रह्मैवपुरंब्रह्मपुरंशारीराख्यंतुब्रह्मपुरंब्रह्मोपलक्षणा
र्थत्वात्तच्चानृतमेववाचारंभणंविकारोनामधेयमितिश्रुतेः।तद्विकारेऽनृतेपिदेहसंगेब्रह्मोपलब्धस्य
तदितिब्रह्मपुरमित्युक्तंव्यावहारिकं।सत्यंतुब्रह्मपुरमेतदेवब्रह्मपुरः।सर्वव्यवहारास्पदत्वादतोऽस्मिन्नु

डराकाशपरिलक्षितेसर्वेकाऽमायेबहिर्लिंबद्धिःप्रार्थ्यंतेऽतेस्मिन्नेवस्वात्मनिसमाहिता।अतस्तत्प्राप्त्यु
पायमेवानुतिष्ठेद्बाह्यविषयतृष्णांत्यजेदित्यभिप्रायः।एषआत्मासर्वतांस्वरूपंशृणुऽहततस्यल-
क्षणमेवंअपहतःपाप्माधर्माधर्माख्योयस्यसोऽयमपहतपाप्मातथाविजरोविगतजरोविमृत्युरु तद्
क्तंपूर्वमेवनवधेनास्यहन्यते।किमर्थंपुनरुच्यते।यद्यपिदेहसंबंधित्वाज्जरामृत्युभ्यांनसंबध्यते
ऽन्यथापिसंबंधस्तत्स्यादित्याशंकानिवृत्त्यर्थंविशोकोविगतशोकः।शोकोनामेष्टादिवियो
गनिमित्तोमानसःसंतापोविजिघत्सोविगताशनेच्छो।ऽपिपासोऽपानेच्छोनन्वपहतपाप्मत्वेन
जरादयःशोकांताःप्रतिषिद्धाएवभवंति।कारणप्रतिषेधाद्धर्माधर्मकार्याहितइति।जरादिप्रतिषेधेनवा
धर्माधर्मयोःकार्याभावेविद्यमानयोरप्यसत्समत्वमितिपृथक्प्रतिषेधोनर्थकःस्यात्सत्यमेवं।तथापिधर्मका
र्यानंदव्यतिरेकेणस्वाभाविकानंदोयथेश्वरेविज्ञानमानंदंब्रह्मेतिश्रुतेस्तथाऽधर्मकार्याजरादिव्यति
रेकेणापिजरादिदुःखस्वरूपंस्वाभाविकंस्यादित्याशंक्यते।अतोयुक्तस्तन्निवृत्तयेजरादीनांधर्मा
धर्मात्पृथक्प्रतिषेधो।जरादिग्रहणंसर्वदुःखोपलक्षणार्थम्।पापनिमित्तानांतुदुःखानामानंत्यात्प्रत्ये
कंतत्प्रतिषेधस्याशक्यत्वात्सर्वदुःखप्रतिषेधार्थंयुक्तमेवापहतपाप्मत्वादिवचनं।सत्याअवितथाःकामा
यस्यसोऽयंसत्यकामोवितथाहिसंसारिणांकामाः।ईश्वरस्यतद्विपरीताः।तथाकामहेतवःसंकल्पाअ
पिसत्यायस्यससत्यसंकल्पः।संकल्पाःकामाश्चशुद्धसत्त्वोपाधिनिमित्ताईश्वरस्यचित्रगुवन्नस्वतोनेतिने
तीत्युक्तत्वात्।यथोक्तलक्षणएषआत्माविज्ञेयोगुरुभ्यःशास्त्रतश्चआत्मसंवेद्यतयाचस्वाराज्यकामैर्नचेद्विज्ञायते

को दोषः स्यादिति। एवं तु दोषं दृष्टांतेन यथा ह्येवेह लोके प्रजा अन्वाविशंति अनुवर्तंते यथानुशासनं यथेह
प्रजा अन्यं स्वामिनं मन्यमाना स्वस्मात्स्वामिनो यथा यथानुशासनं तथा तथान्वाविशंति। किं यं यमंतं प्रत्यंतं ज
नपदं क्षेत्रभागं वाभि। कामा अर्थिन्यो स्वबुद्ध्यनुरूपं तं तमेव प्रत्यंतादिमुपजीवंत्येष दृष्टांतो अस्वा
ऽस्वातंत्र्यदोषप्रतिपुण्यफलोपभोगे। अथान्यो दृष्टांतस्तच्छेषं प्रति तद्यथेहेत्यादिस्तत्र यथेह लोके ता
सामेव स्वाम्यनुशासनानुवर्तिनीनां प्रजानां सेवादिजितो लोकः पराधीनोपभोगः क्षीयते। अंतवानस
वृति। अथेदानीं दार्ष्टांतिकमुपसंहरत्येवमेवामुत्राग्निहोत्रादिपुण्यजितो लोकः पराधीनोपभोगः क्षीय
त एव युक्तो दोषस्त्वयाभिहित इति वाच्यं दर्शयति तद्य इहेत्यादिना। तत्र तत्रेहास्मिंल्लोके ज्ञानकर्मणोरधिकृता
योग्याः संत आत्मानं यथोक्तलक्षणं शास्त्राचार्योपदिष्टमननुविद्य यथोपदेशमननुस्वसंवेद्यतामप्र
कृत्वा व्रजंति देहाद्देहमाश्रयंति ये तांश्च यथोक्तान्सत्यान्सत्यसंकल्पकार्यांश्च स्वात्मस्थान्कामान
ननुविद्य प्रजाते। येतेषां सर्वेषु लोकेष्वकामचारोऽस्वतंत्रता भवति यथा राजानुशासनानुवर्ति
नीनां प्रजानामित्यर्थः। अथ ये अन्य इह लोक आत्मानं शास्त्राचार्योपदेशमनुविद्य स्वात्मसंवेद्यता
मापाद्य व्रजंति। यथोक्तांश्च सत्यान्कामांस्तेषां सर्वेषु लोकेषु कामचारो भवति राज्ञ इव सार्वभौमस्ये ॥७८॥
हलोके॥ कथं सर्वेषु लोकेषु कामचारो भवतीत्युच्यते। य आत्मानं यथोक्तलक्षणं हृदि साक्षात्कृतै
वान्वक्ष्यमाणब्रह्मचर्यादिसाधनसंपन्नः संस्तथा। स्तांश्च सत्यान्कामान्स त्यक्तदेहो यदि पितृलो
ककामः पितॄंस्तरो जनयितारस्तेरवरुखहेतुत्वेन भोग्यत्वाक्लोकान्कांक्षते। तेषु कामो सस्यते॰

पितृभिः संबंधे योग्यस्य भवति। तस्य संकल्पमात्रादेव पितरः समुत्तिष्ठंत्यात्मसंबंधितामापद्यंते। विशुद्ध
सत्त्वतया सत्यसंकल्पत्वादीश्वरस्येव तेन पितृलोकेन संपन्नः। संपत्तिरिष्टप्राप्तिः तया समृद्धो महीयते पू
ज्यते वर्द्धते वा महिमानमनुभवति। समानमन्यत्। मातरो जनयित्र्यो ऽतीताः। सुखहेतुभूताः सामर्थ्या
न्न हि दुःखहेतुभूतास्तु ग्रामसूकरादिजान्ननिमित्ता स्तुमान्दषु विशुद्धसत्वस्य योगिनः इच्छासंबंधो वा
युक्तोयं यं तेत प्रदेशमभिकामो भवति। यं च कामं कामयते यथोक्तव्यतिरेकेणापि सोस्यां तः प्राप्तुमिष्टः
कामश्च संकल्पा[illegible]देव समुत्तिष्ठत्यस्य तेनेच्छाऽविघाततयाऽभिप्रेतार्थप्राप्त्या वसंपन्नो महीयत इत्युक्ता
र्थः॥ यथोक्ताश्च ध्यानसाधनानुष्ठानं प्रति साधनेकानामुत्साहजननार्थमनुक्रोशं चाह। कथमिदं र
त्ननुवर्त्तते यन्त्वात्मस्थाः शक्यं प्राप्या अपि त इमे सत्याः कामाः अनृतापिधानाः तेषामात्मस्थानां स्वाश्र
याणामेव सतामनृतं बाह्यविषयेषु स्त्र्यन्नपानाच्छादनादिषु तृष्णा तन्निमित्तं स्वेच्छाप्रचा
रत्वं [illegible] मिथ्याज्ञाननिमित्तत्वादनृतमित्युच्यते। तन्निमित्तं सत्यानां कामानामप्राप्तिस्यापिधान
मिवापिधानं। कथमनृतापिधाननिमित्तं तेषामलाभ इत्युच्यते। यो यो ह्यस्यैतस्मादस्य जंतोः पुत्रो
भ्राता वेष्ट इतोऽस्माल्लोकात्प्रैति प्रगच्छति म्रियते। तमिष्टं पुत्रं भ्रातरं वा स्वगृहे दयाकांक्षो विद्यमानमपी
ह पुनर्दर्शनायेच्छन्न लभते। ऽथ पुनर्ये चास्य विदुषो जंतोर्जीवा जीवंतीह पुत्रा भ्रातरो वाद्यो वा। यच्च
प्रेता मृताः इष्टाः संबंधिनो। यच्चान्यदिह लोके वस्त्रान्नपानादि वा वस्त्विच्छन्न लभते। तत्सर्वमत्र हृद

यथोक्तेन विधिना विंदंति लभंते अस्मिन्हार्दाका ... ऽपि यस्मादस्य । पं२

याकाशाख्ये ब्रह्मणि गत्वा यथोक्ताः सत्याः कामा वर्तंते ऽनृतापिधानाः कथमिव तदन्याय्यमित्युच्यते ।
तत्र यथा हिरण्यनिधिं हिरण्यमेव वसु न गृहणाय निधातारो निधीयत इति निधिः तं हिरण्यनिधिं निहि
तं भूमेरधस्तान्निःक्षिप्तं अक्षेत्रज्ञा निधिशास्त्रनिधिज्ञा एतमजानंतस्ते निरूपर्युपरि संचरंतोऽपि निधिं
न विंदेयुः शाक्यवेदनमप्येवमेवमा अविद्याख्याः सर्वा इमाः प्रजा यथोक्तं हृदयाकाशाख्यं ब्रह्मलोकं
ब्रह्मैव लोकस्तमहरहः प्रत्यहं गच्छंत्योऽपि सुषुप्तकालेन विंदंति न लभंते एषोऽहं ब्रह्मलोकसाव
मापंन्नोऽस्मि इत्यनृतेन हि यथोक्ते । न हि यस्मात्प्रत्यूढा हृदीतास्वरूपादविद्यादिदोषैर्बहिरपकृष्टा इ
त्यर्थोऽतः कष्टमिदं वर्तते जंतूनां यत्स्वायत्तमपि न सं लं संतैर्न लभ्यते इत्यभिप्रायः । स वा एष आत्माप
हतपाप्मेति प्रकृतो वैशब्देन तं संस्मारयत्येष विवक्षित आत्मा हृदि हृदयपुंडरीक आकाशशब्देनाभि
हितस्तस्यैतस्य हृदयस्यैतदेव निरुक्तं निर्वचनं नान्यत् हृद्ययमात्मा वर्तत इति यस्मात्तस्माद्धृदयं ।
हृदयनामनिर्वचनप्रसिद्ध्यापि स्वहृदय आत्मेत्यवगंतव्यं इत्यभिप्रायः । अहरहर्वै प्रत्यहमेवंवि
द्धृद्ययमात्मेति जानन्स्वर्गं लोकं हार्दं ब्रह्मेति प्रतिपद्यते । नन्वनेवंविदपि सुषुप्तकाले हार्दं ब्रह्म प्रति
पद्यत एव सुषुप्तकाले सता सोम्य तदा संपन्न इत्युक्तत्वात् बाढमेवं । तथाप्यस्ति विशेषो यथा [illegible] जानन्न ॥७४॥
जा[illegible]नंश्च सर्वो जंतुः सद्ब्रह्मैव । तथा[illegible]प्यस्ति विशेषो यथा ज्ञानात् पितत्त्वमसीति प्रतिबोधितो वि
द्वान्सदेव नान्योऽस्मीति जानन्सदेव सत्यमेव विद्वान्विद्वांश्च सुषुप्तेऽपि सत्संपद्यते । तथाप्येवं
ति

विदेवस्वर्गं लोकमेतीत्युच्यते। देहपाते विद्याफलस्यावश्यंभावित्वादित्येष विशेषः। सुषुप्तकाले स्वेनात्म
नासता संपन्नः सन्सम्यक्प्रसीदतीति। जाग्रत्स्वप्नयोर्विषयेंद्रियसंयोगजातं तं कालुष्यं जहातीति संप्र
सादशब्दो यद्यपि सर्वजंतूनां साधारणस्तथाप्येवं वि स्वर्गं लोकमेतीति प्रकृतत्वादेष संप्रसाद इति। संनि
हितवद्वत्न विशेषात्सोऽथेदं शरीरं हित्वास्माच्छरीरात्समुत्थाय शरीरात्मभावनां परित्यज्येत्यर्थो न
त्वासनात्स्वित्समुत्थायेति ह्युक्तं स्वेन रूपेणेति विशेषणात्। अन्यत्र सस्थत्वेन समुत्थाय स्वरूपं संपत्तव्यं। स्वरूपमे
व हि तन्न लभ्यं। प्रतिपत्तव्यं। येयं स्यात् परं परमात्मलक्षणं विज्ञप्तिस्वभावं ज्योतिः स्वरूपं संपद्यते स्वा
भाव्यमुपगम्येति। तत्स्वेनात्मीयेन रूपेणाभिनिष्पद्यते। प्रागेतस्याः स्वरूपसंपत्तेरविद्यया देहमेव
परं रूपमात्मत्वेनोपगत इति तदपेक्षयेदमुच्यते स्वेन रूपेणेति। यथैवाशरीरता ह्यात्मनः स्वं रूपं यत्स्वं परं
ज्योतिः स्वरूपमापद्यते। संप्रसाद एष आत्मेति होवाच। स ब्रूयादिति यः श्रुत्या नियुक्तोंतेवासिभ्यः। किं चै
तदमृतमविनाशि। अभयमा। यो वेत्स्मात्तदमृतं मिथ्युक्तं। अत एवास्मादन्येषु। इति यास्मावादत एव ब्रह्मेति।
तस्य ह वै एतस्य ब्रह्मणो नामाभिधानं किं तत्सत्यमिति। तत्सत्यं ह्यविततं थं ब्रह्म। तत्सत्यं स आत्मेति निरुक्तं।
अथ। किमर्थमिदं नाम पुनरुच्यते तदुपासनविधिस्तुत्यर्थं। तानि ह वा एतानि ब्रह्मणो नामाक्ष०। राणि त्री
ण्येतानि सतीयमिति। सकारस्तकारो यमिति च। ईकारस्तकारेणोच्चारणार्थोनुबंधो ह्रस्वेनैवाक्षरेण पुनः प्र
तिनिर्देशात्तेषां तत्र स्त्र यत्सकारस्तदमृतं सद्ब्रह्माश्रयं तवाचकत्वादमृत एव सकारस्तकारो तो निर्दिष्टः। अथ
यत्तकारस्तन्मर्त्यमित्यथय घमहरंते नाक्ष०रेण मर्त्यमयाश्चपूर्वेन सेअ हरेय। इति यमयतिनियमयति।

वशीकरोतीत्यात्मनेत्यर्थः। यद्यस्माद्यदनेनयमित्येतेनोभेयच्छतीति। तस्माद्यमेतद्वर्णं तेनयमा। लक्ष्यते। ब्रह्म
नामाक्षरस्यापीदममृतत्वादिधर्मवत्त्वंमहासामर्थ्यं किमुतनामवत इत्युपास्यत्वाय स्तूयते ब्रह्मनामनिर्व
चनेनैवंनामवतो वा एवंविदहरहर्वा एवंवित्स्वर्गं लोकमेतीत्युक्तार्थं। अथय आत्मा उक्तलक्षणो यः संप्रसाद
स्तस्यस्वरूपं वक्ष्यमाणैरुक्तैश्च गुणैः पुनस्तूयते ब्रह्मचर्यसाधनसंबंधार्थं स एष एवं यथोक्तलक्षण आत्मा
स सेतुरिव सेतुर्विधृतिर्विधरणस्तेन हि सर्वं जगद्वर्णाश्रमादिक्रियाकारकफलादिभेदनियमैः कर्तुरनुरूपं
विदधता विधृतं ध्रियमाणं हीश्वरेणेदं विश्वं विनश्येद्यतः। तस्मात्स सेतुर्विधृतिः। किमर्थं स सेतुरित्याह। ए
षां भूरादीनां लोकानां कर्तृकर्मफलाश्रयाणाम संभेदाय। विदारणाय। विनाशायेत्येतत्। किंविशिष्ट
श्चासौ सेतुरित्याह। नैतं सेतुमात्मानमहोरात्रे सर्वस्य जनिमतः परिच्छेदके सती नैनं तरतो। यथान्ये
संसारिणः कालेनाहोरात्रादिलक्षणेन परिच्छेद्या न तथायं कालपरिच्छेद्य इत्यभिप्रायो यस्मादर्वा
क्संवत्सरोऽहोभिः परिवर्तत इति श्रुत्यंतरात् तथा एवैनं न जरा तरति न प्राप्नोतीति तथा न मृत्युर्न शोको न सु
कृतं न दुष्कृतं। न सुकृतदुष्कृते धर्माधर्मौ प्राप्तिरत्र तरणाद्वेनाभिप्रेता नातिक्रमणं कारणं ह्यात्मा न श
क्यं हि कारणातिक्रमणं कर्तुं कार्येणाहोरात्रादिना सर्वेण कार्येण सतः कार्येण अन्येन ह्यन्यस्य प्राप्तिरतिक्रम
णं वा क्रियते। ननु तेनैव तस्य। न हि घटेन मृत्प्राप्यते अतिक्रम्यते वा। यद्यपि सर्वस्य आत्मापहतपाप्मे ॥८०॥
त्यादिना पाप्मप्रतिषेधे धर्मावुक्त एव तथापी हायं विशेषः। न तरतीति प्राप्तिविषयत्वं प्रतिषिध्यते। तत्र विशे
षेण जरादिभावमात्रमुक्तं। महोरात्रास्यामुक्ता अनुक्ताश्चान्ये सर्वे पाप्मानत्यंतेऽतो तस्मादात्मनः

श्री २

सेतोर्न्निवर्त्तते ऽप्राप्येवेत्यर्थो ऽपहतपाप्मा ह्येष ब्रह्मैव लोको ब्रह्मलोको ऽउक्तो॥ यस्माच्च पाप्मकार्यमांध्या
दिशरीरवतः स्यान्नत्वशरीरस्य। तस्माद्वा एतं सेतुं तीर्त्वा प्राप्यानंधो भवति हि देहवत्वे ऽन्धः सन्वं
पधोपि सन्नतथाविद्धः सन्देहवत्वे सदेहवियोगे सेतुं प्राप्याविद्धो भवति तथोपतापी रोगाद्युपतापवान्स
न्नैवानुपतापी भवति। किं च। यस्मादहोरात्रे न स्तः सेतौ तस्माद्वा एतं सेतुं तीर्त्वा प्राप्य नक्तमपि तमो
रूपा रात्रिरपि सर्वमहरेवाभिनिष्पद्यते। विज्ञानात्मज्योतिःस्वरूपमहरिवाहः सदैकरूपं विदुषः संपद्यत
इत्यर्थः। सकृद्विभातः सदा विभातः सदैकरूपः स्वेन रूपेण एष ब्रह्मलोकः तत्रैवं सत्येवैतं यथोक्तं ब्रह्म
लोकं ब्रह्मचर्येण स्त्रीविषयतृष्णात्यागेन शास्त्राचार्योपदेशमनुविंदंति स्वात्मसंवेद्यतामापादयंति
ण। तेषामेव ब्रह्मचर्यसाधनवतां ब्रह्मविदामेष ब्रह्मलोको नान्येषां स्त्रीविषयसंपर्कजाततृष्णा
नां ब्रह्मविदामपीत्यर्थः। तेषां सर्वेषु लोकेषु कामचारो भवतीत्युक्तार्थम्। तस्मात्परमेतत्साधनं ब्रह्मच
र्यं ब्रह्मविदामित्यभिप्रायः॥ ॥य आत्मा सेतुत्वादिगुणैरुक्तस्तस्य प्राप्तये ज्ञानसहकारिसाधनांतरं ब्र
ह्मचर्याख्यं विधातव्यमित्याह। यज्ञादिभिश्चेतरैःस्तो ऽतिकर्त्तव्यतार्थमथ यद्यज्ञ इति लोके आचक्षते
परमपुरुषार्थसाधनं कथयंति शिष्टास्तद्ब्रह्मचर्यमेव यज्ञस्यापि यत्फलं। तद्ब्रह्मचर्येण
लभते। तस्माद्यज्ञोपि ब्रह्मचर्यमेवेति प्रतिपत्तव्यं। कथं ब्रह्मचर्यं यज्ञ इत्याह। ब्रह्मचर्येणैव हि
यस्माद्यो ज्ञाता सतं ब्रह्मलोकं यज्ञस्यापि पारंपर्येण फलभूतं विंदते लभते। यो ज्ञातेत्यक्षरानु
वृत्तेर्यज्ञो ब्रह्मचर्यमेवाथ यदिष्टमित्याचक्षते। ब्रह्मचर्यमेव तत्कथं ब्रह्मचर्येणैव साधनेन तम॥

श्वरमिष्ट्वा पूजयित्वाथ वैषणामात्मविषयां कृत्वा तमात्मानमनुविंदते। एवमादिष्टमपि ब्रह्मचर्यमेव। अथ य
सत्त्रायणमित्याचक्षते ब्रह्मचर्यमेव तत्तथा सतः परस्मादात्मनस्त्राणं रक्षणं ब्रह्मचर्यमेव साध
नेनैव विंदते। तत्सत्त्रायणशब्दमपि ब्रह्मचर्यमेव तदथ यन्मौनमित्याचक्षते। ब्रह्मचर्यमेव तद्ब्रह्म
चर्येणैव साधनेनानुमतः सन्नात्मानं शास्त्राचार्याभ्यां मनु विदित्वा मनुते ध्यायति। तो मौनशब्दमपि
ब्रह्मचर्यमेवाथ यदनाशकायनमित्याचक्षते ब्रह्मचर्यमेव तद्यमात्मानं ब्रह्मचर्येणानुविंदते स एष ह्या
त्मा ब्रह्मचर्यसाधनवतो न नश्यति। तस्मादनाशकायनमपि ब्रह्मचर्यमेवाथ यदरण्यायनमित्याच
क्षते। ब्रह्मचर्यमेव तदरण्यशब्दयोरर्णवयोर्ब्रह्मचर्यवतोऽयनादरण्यायनं ब्रह्मचर्यं। योज्ञानाद्येज्ञए
ष्णादिष्टं सतस्त्राणात्सत्त्रायणं मननान्मौनं मैत्रानाद्यैर्नाशकायनमरण्ययोर्गमनादरण्यायनमित्या
द्यादिभिर्महद्भिः पुरुषार्थसाधने स्तुत्वा तत्त्वाद्ब्रह्मचर्यं परमं ज्ञानसहकारिकारणं साधनमित्युक्तो ब्रह्म
विद्यायत्ततोऽस्त्वेतीयमित्यर्थः। तत्र हि ब्रह्मलोके अरश्च ह वै प्रसिद्धौ ण्यश्चार्णवौ समुद्रौ समुद्रोपमे
वा सरसौ तृतीयस्यां भुवमंतरिक्षं चापेक्ष्य तृतीया द्यौस्तस्यां तृतीयस्यामितोऽस्माल्लोकाद्दरस्य गण्यमा
नायां विदित तत्त्रैव चैरमिरान्नं तन्मय ऐरो मंडस्तेन पूर्णमैरंमदीयं तदुपयोगिनां मदकरं हर्षोत्पादकं सर
स्तत्रैव चाश्वत्थो वृक्षः सोमसवनो नाम तः सोमोऽमृतं निःस्रवोऽमृतस्रव इति वा। तत्रैव च ब्रह्मलोके ब्रह्म ॥८१॥
चर्यसाधनरहितैर्ब्रह्मचर्यसाधनरहितैर्बज्ञोन्यो न्यैर्न जीयत इत्यपराजिता ति नाम पूः पुरी ब्रह्म
णो हिरण्यगर्भस्य। ब्रह्मणा च प्रभुणा विशेषेण मितं निर्मितं तत्र हिरण्मयं सौवर्णं प्रभुविमितं मं
डपमिति वाक्यशेषः तत्तत्र ब्रह्मलोके एतावर्णवौ यावरण्यावुक्तौ ब्रह्मचर्येण साधनेन नालं विं

मुतं ४

द्वितीये। तेषामेवैषयो व्याख्यातो ब्रह्मलोकस्तेषां च ब्रह्मचर्यसाधनवतां ब्रह्मविदां सर्वेषु लोकेषु कामचारो
भवति। नान्येषामब्रह्मचर्यपराणां बाह्यविषयासक्तबुद्धीनां कदाचिदपीत्यर्थः। ननु अत्र च मिंद्रस्त्वयं यमस्त्वं
वरुणइत्यादिस्तिर्यथा कश्चिद्रक्त्यते मतोऽर्हेद्रएवमित्यादि स्तिः। न ह्येते न स्त्र्यादिविषयतृष्णा निवृत्तिमात्रं सत्युर्यं
किं तर्हि ज्ञानस्य मोक्षसाधनत्वात्तरद्धेवेष्टा दित्तिस्तूयते इति केचिन्न स्त्र्यादिबाह्यविषयतृष्णापहृतचित्तानां
प्रत्यगात्मविवेकविज्ञानानुपपत्तेः। पराञ्चि खानि व्यतृणत्स्वयंभूस्तस्मात्पराङ्पश्यति नान्तरात्मन्नित्या
दिश्रुतिस्मृतिभ्यो ज्ञानसहकारिकारणं स्त्र्यादिविषयतृष्णादिनिवृत्तिसाधनं विधातव्यमेवेति पु
नरेवेतत्स्तूयते। ननु च यज्ञादिस्तिः स्तुवंतं ब्रह्मचर्यमिति यज्ञादीनां पुरुषार्थसाधनत्वं गम्यते। सत्यं गम्यते।
न त्विह ब्रह्मलोकं प्रति यज्ञादीनां साधनत्वमस्ति प्रत्ययः यज्ञादिभिर्ब्रह्मचर्यं स्तूयते। किं तर्हि तेषां प्रसिद्ध
पुरुषार्थसाधनत्वमपेक्ष्य यथेन्द्रादिस्तो राजानं तु यत्रेन्द्रादीनां व्या… पारास्तत्रैव राजेति। तद्वत्। यद
र्णवादयो ब्रह्मलोके कांःसंकल्पजाश्च पित्रादयो भोगास्ते किं पार्थिवा आप्याश्च यथेह लोके दृष्टरूपं तत्
तद्वर्णवदवृक्षः सुवर्णमंड… पाद्याघ्राते स्विन्मानसप्रत्ययमात्राणीति। किं चातो यदि पार्थिवा आप्याश्च स्युर्यो
…धाकाशे समाधानानुपपत्तिः। पुराणे च मनोमयानि ब्रह्मलोके शरीरादीनीति वाक्यं विरुध्येत। अ
ग्री… कमहिमिन्या… श्रुतयो न च समुद्राः सरितः सरांसि वाप्यः कूपाय यज्ञा वेदा मंत्रादयश्च मूर्त्तिम
तो ब्रह्माणमुपतिष्ठन्ते इति मानसे विरुध्येत पु… राणस्मृतिः। नमूर्तत्तिमित्त्वेप्रसिद्धरूपाणामेवतत्राम
नानुपपत्तेस्तस्मात्प्रसिद्धमूर्त्तिव्यतिरेकेण सागरादीनां मूर्त्यंतरं सागरादिस्वरूपात्तं ब्रह्मलोकं गत्वा

ल्पनीयंतत्त्वायांवकल्पनायांयथाप्रसिद्धाएवमानस्यआका[]रवत्योमूर्त्तयोयुक्ताःकल्पयितुंमा
नसदेहानुरूपसंबंधोपपत्तेः।इत्यादिमानस्यएवाकारवत्त्वः पुंस्त्र्याद्याकारमूर्त्तयःस्वप्ने।ननुअन्तार
पुरूमेसत्याःकामाइतिश्रुतिस्तथासतिविरुध्येत।नामानसप्रत्ययस्यसत्त्वोपपत्तेः।मानसाहिविषया:
स्त्रीपुरुषाद्याकाराःस्वप्नेहश्रूयंते।ननुजाग्रद्वासनारूपाःस्वप्नदृश्यानतुतत्रस्त्र्यादयोविद्यंतेऽल्प
मिदमुच्यतेजाग्रद्विषयाश्चविमानसप्रत्यय[]यालिनिर्वृत्ताएवसद्भावातिनिर्वृत्त[]तेजोबन्नमयत्वाज्जाग्र
द्विषयाणां।संकल्पमूलाहिलोकाइतिवोक्तंसमरूपतांबाधाबाधयोःयत्रसर्वश्रुतिषुप्रत्यगात्मनःउत्पत्तिः
प्रलयश्चतत्रैवस्थितिश्चयथावाअरानाताविद्या[]या[]दिनोच्यते।तस्मान्मानसानांबा[]ह्यानांचवि
ष्याणामितरेतरकार्यकारणचमि[]ष्यतएवबीजांकुर[]वद्घटपिंडवद्बाह्याएवमानसा।मानसाएवच[]
बाध्याः।नान्तत्वंतेषांकदाचिदपिस्वात्मनिसंभवति।ननुस्वप्नेदृष्टाःप्रतिबुद्धस्यान्नतासंवृतिविषया:।
[स]त्यमेवं।जाग्रद्बाधापेक्षं[]नुतदन्नतत्वंनस्वतस्तथास्वप्नबाधापेक्षंस्वजाग्रद्दृष्टविषयाणां[]तत्वंनस्वतः
विरोधाकारमात्रंतुसर्वेषांमिथ्याप्रत्ययनिमित्तिवाचारंभणंविकारोनामधेयमनृतंत्रीणिरूपाणीत्ये
पा वसत्यं।तान्येव[]कारविशेषतोन्नतंस्वतःसन्मात्ररूपतयासत्यं।प्राक्सदा[]त्मप्रतिबोधात्स्वविषयेपिस ॥८२॥
वैसत्यमेवस्वप्नदृश्यादिवेतिनकश्चिद्विरोधः।तस्मान्मानसाएवब्राह्मलौकिकाअरण्यादयःसंकल्पजा
श्चपित्रादयःकामाबाह्यविषयतो[]बुद्धिरहितत्वाच्छुद्धसत्वसंकल्पजन्याइतिनिरति[]शयसुखवः
स्याश्च[]ईश्वराणांसर्वेतीर्थः।सत्यसत्यात्मप्रति[]बोधेपिरज्ज्वामिव[]कल्पिताःसर्पादयःसदात्म

तेमिध

जाग्रद्रूपम४

प्रा

स्वरूपतामेव प्रतिपद्यंत इति सदात्मना संपत्स्याए एव भवंति। य एता हृदयपुंडरीकगतयथोक्तगुणविशिष्टब्रह्मोपलब्ध्यर्थादि
साधनसंपन्नस्य तत्त्वबाह्यविषयान्मृतस्य छं० सन्निपातस्तस्यैवमुत्क्रांत्यर्थमाह। अथ यागतिर्वक्तव्येति खंडआरंभः
स्य ते। अथ या एता वक्ष्यमाणा हृदयस्य पुंडरीकाकारस्य ब्रह्मोपासनस्थानस्य संबंधिन्यो नाड्यो हृद
यमांसपिंडात्सर्वतो विनिःसृता आदित्यमंडलादिव रश्मयः ताश्चैताः पिंगलस्य वर्णविशेषविशिष्टस्या
णिम्नः सूक्ष्मरसस्य पूर्णास्तदाकारा एव तिष्ठंति वर्तंत इत्यर्थः। तथा शुक्लस्य नीलस्य पीतस्य लोहितस्य च रस
स्य पूर्णा इति सर्वत्राध्याहार्यं। सौरेण तेजसा पित्ताख्येन पाकाभिनिर्वृत्तेन कफेनाल्पेन संपर्कात्पिंगलं भवति
सौरं तेजः पित्ताख्यं। तदेव च वातभूयस्त्वान्नीलं भवति। तदेव च कफभूयस्त्वाच्छुक्लं। कफेन समतया पीतं।
शोणितबाहुल्येन लोहितं वैद्यकाद्वा वर्णविशेषा अन्वेष्टव्याः। कथं भवंतीति। श्रुतिस्त्वाहादित्यसंबंधादेव तत्ते
जसो नाडीष्वनुगतस्यैते वर्णविशेषा इति। कथं। असौ वा आदित्यः पिंगल एष आदित्यः शुक्ल एष
नील एष पीत एष लोहित आदित्य एव। तस्याध्यात्मं नाडीभिः कथं संबंध इत्यत्र दृष्टांतमाह। तत्तत्र यथा लोके
महान्विस्तीर्णः पंथा महापथ आततो व्याप्त उभौ ग्रामौ गच्छति इमं च संनिहितममुं च विप्रकृष्टं दूरस्थमेवं यथा
दृष्टांतो महापथ उभौ ग्रामौ प्रविष्ट एवमेवैता आदित्यस्य रश्मय उभौ लोकावादित्यमंडलमिमं च पुरुषं गच्छं
त्युभयत्र प्रविष्टा यथा पथः। कथं। अमुष्मादादित्यमंडलात्प्रतायंते संतता भवंति। ता अध्यात्ममासु पिं
गलादिवर्णासु यथोक्तासु नाडीषु सृप्ता गताः प्रविष्टा इत्यर्थः। आभ्यो नाडीभ्यः प्रतायंते प्रवृत्ताः संतान
भूताः सत्यस्ते अमुष्मिन्नादित्ये सृप्ता इत्यर्थः। तत्रैवं सति यत्रैतस्मिन्काले अयं जीवः सुप्तः स

महा

ॐ

वति। स्वापस्य द्विःप्रकारत्वाद्विशेषणं समस्त इत्युपसंहृतसर्वकरणवृत्तिरित्येतत्ततो बाह्यविषयसंपर्कजनितका
लुष्याभावात्सम्यक्संप्रसन्नो भवति। अत एव स्वप्नं विषयाकाराभासं मानसं स्वप्नप्रत्ययं न विजानाति नानुभ
वतीत्यर्थः। यदैवं सुषुप्तो भवति आसु सौरैस्तेजःपूर्णासु यथोक्तासु नाडीषु तदा सृप्तः प्रविष्टो नाडीभि
र्द्वारभूताभिर्हृदयाकाशं गतो भवतीत्यर्थः। न ह्यन्यत्र सत्संपत्तेः स्वप्नादर्शनमस्तीति सामर्थ्यान्नाडी
ष्विति सप्तमी तृतीयया परिणम्यते। तं सता संपन्नं कश्चन न कश्चिदपि धर्माधर्मरूपः पाप्मा स्पृशतीति
स्वरूपावस्थितत्वात्तदात्मनो देहेन्द्रियविशिष्टं हि सुखदुःखकार्यप्रदानेन पाप्मा स्पृशतीति न तु सत्सं
पन्नं स्वरूपावस्थं कश्चिदपि पाप्मा स्प्रष्टुमुत्सहते ऽविषयत्वादन्यो ह्यन्यस्य विषयो भवति। न त्वनन्यत्वं
केनचित्कुतश्चिदपि सत्संपन्नस्य स्वरूपात्प्रच्यवनं त्वात्मनो जाग्रत्स्वप्नावस्थाप्रतिगमनं बाह्यविषयप्रति
बोधोऽविद्याकामकर्मबीजस्य ब्रह्मविद्याकृतादाहाददाहनिमित्तमित्यवोचाम। एष एव तदिहापि प्रत्ये
तव्यं। यदैवं सुषुप्तः सौरेण तेजसा नाड्यन्तर्गतेन सर्वतः संपन्नो व्याप्तो भवति। अतो विशेषेण चक्षुरादिना
डीद्वारैर्बाह्यविषयभोगाय प्रसृतानि करणान्यभिभूतान्यस्य तदा भवन्ति। तस्मादयं करणानां तिरोभावात्स्वात्मन्ये
वावस्थितः स्वप्नं न विजानातीत्युक्तं। तत्रैवं सत्यथ यत्र यस्मिन्काले ऽबलिमानं बलिम्नो भावो बलिमा तं देह ॥८३॥
स्य रोगादिनिमित्तं जरादिनिमित्तं वा कृशीभावमेतन्नयं नीतः प्रापितो देवदत्तो भवति। मुमूर्षुर्यदा भ
वतीत्यर्थस्तमभितः सर्वतो वेष्टयित्वा आसीना ज्ञातय आहुर्जानासि मां तव पुत्रं जानासि मां पितरं वे

ॐ १

स्यादि समुमूर्षुर्यावदस्माच्छरीरादुत्क्रान्तो निर्गतो भवति। तावदसावादित्यं जानाति। अथ यत्र यदैतदिति क्रियाविशेषणम्
अस्माच्छरीरादुत्क्रामत्यथ तदैतैरेव यथोक्तै रश्मिभिरूर्ध्वमाक्रमते यथाकर्मजितं लोकं प्रत्यविद्वान्। इतरस्तु विद्वा
न्यथोक्तसाधनसंपन्नः स ओमित्योंकारेणात्मानं ध्यायन्यथापूर्वं वा ह एवं उद्वा मीयते वा विद्वांश्चेदितरस्तिर्यङ्केयमि
त्यर्थः। प्रमीयते गच्छतीत्यर्थः। स विद्वानुत्क्रमिष्यन्यावत्क्षिप्येन्मनो यावता कालेन मनसः क्षेपः स्या
त्तावता कालेनादित्यं गच्छति प्राप्नोति। क्षिप्रं गच्छतीत्यर्थः। ननु तावतैव कालेनेति विवक्षितं। किमर्थमादि
त्यं गच्छतीत्युच्यते। एतद्वै खलु प्रसिद्धं ब्रह्मलोकस्य द्वारं य आदित्यस्तेन द्वारभूतेन ब्रह्मलोकं गच्छति
विद्वानतो विदुषां प्रपदनं। प्रपद्यते ब्रह्मलोकमनेन द्वारेणेति प्रपदनं। निरोधनं निरोधोस्मादादित्याद
विदुषां भवतीति निरोधः। सोऽपि तेजसा देह एव निरुद्धः सन्मूर्धन्यया नाड्या नोत्क्रामति तत्रैवेत्यर्थः। विष्व
ङ्ङन्या इति श्लोकस्तदेतस्मिन्नर्थे एष श्लोको मंत्रो भवति। शतं चैका च शतमेकोत्तरं नाड्यो हृदयस्य
मांसपिण्डस्य तस्य संबंधिन्यः प्रधाना नाड्यो नंताः नाडीनां तासामेका मूर्धानमभिनिःसृता निर्गता
तयोर्ध्वमायन्गच्छन्नमृतत्वममृतभावमेति। विष्वङ्ङन्या नानागतयस्तिर्यग्विसर्पिण्य ऊर्ध्वगाश्चान्या नाड्यो
भवन्ति। संसारगमनद्वारभूता नामृतत्वाय। किं तर्हि उत्क्रमण एवोत्क्रान्त्यर्थमेव भवन्तीत्यर्थः। द्विरभ्यासः प्रक
रणसमाप्त्यर्थः॥ ॥ अथ य एष संप्रसादोऽस्माच्छरीरात्समुत्थाय परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्प
द्यत एष संप्रसाद आत्मेति होवाचैतदमृतमभयमेतद्ब्रह्मेति। तत्र कोऽसौ संप्रसादः। कथं वा तस्याधि
गमः। यथासावस्माच्छरीरात्समुत्थाय परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यते। येन स्वरूपेणाभिनिष्पद्यते

१ ॥ यः॥ किंतस्यान्वेषणाद्विजिज्ञासनाच्च स्यादित्युच्यते स सर्वांश्च लोकानाप्नोति सर्वांश्च कामान्यस्तमात्मानं यथोक्तेन प्रकारेण शास्त्राचा
स किंलक्षण आत्मा। संप्रसादस्य स्वदेहसंबन्धिनि पररूपाणि। ततोऽयमन्यत् कथं स्वरूपमित्येतेऽर्थो वक्तव्या र्योपदेशेन
स्यफलं तत्र शेषग्रंथ आरभ्यते। आख्यायिका तु विद्यास्तुत्यर्था संप्रदायं न विधिप्रदर्शनार्था। विद्यास्तुत्यर्थीव। विजिघत्स
जसे वितं पानीयमिति विं यथ आत्मापहतपाप्मा विरजो विमृत्युर्विशोको विजिघत्सोऽपिपासः सत्यकाम : संवेधत्वा
सत्यसंकल्पो यस्योपासनायोपलब्ध्यर्थं हृदयपुण्डरीकमसिहितं। यस्मिन्कामाः समाहिताः सत्या अनृता पादपाः
पिधाना यदुपासनस्य स्वलाविब्रह्मचर्यसाधनमुक्तं ॽमुपासनपूर्वकृतकामप्रतिपत्तये च मूर्द्धन्या च गति
रभिहिता सोऽन्वेष्टव्यः शास्त्राचार्योपदेशैर्ज्ञातव्यः स विशेषेण ज्ञातुमेष्टव्यो विजिज्ञासितव्यः स्वसंवेद्यतामापा
यः॥ दयितव्यः। तस्यैतत्सर्वलोककामाप्तिः। सर्वात्मतापफलं भवतीति ह किल प्रजापतिरुवाचान्वेष्टव्यो विजिज्ञासित
व्य इति वैष नियमविधिर्न पूर्ववद्विधिरेवमन्वेष्टव्यो विजिज्ञासितव्य इत्यर्थः। दृष्टार्थत्वादन्वेषणविजिज्ञा
सनयोर्दृष्टार्थं च वदर्शयिष्यति नाहमत्र भोग्यं पश्यामीत्यनेनासत्यरूपेण देहादिधर्मैरवगम्यमानैरमा
नस्यात्मा नः स्वरूपाधिगमे विपरीताधिगमनिवृत्तिर्दृष्टं फलमिति नियमार्थतैवास्य विधेर्युक्ता न त्वग्निहोत्रादीनामिव
पूर्वविधित्वमस्तिसंभवति। तद्धोभय इत्याद्याख्यायिकाप्रयोजनमुक्तं तद्ध किल प्रजापतेर्वचनमुपश्रुत्य देवा
सुराश्च देवाश्चासुराश्च देवासुरा अनुपरंपरागतं स्वकर्णगोचरापन्नमनुबुबुधिरे अनुबुद्धवन्तः ते चैतत्प्र
जापतिवचो बुद्ध्वा किमकुर्वन्नित्युच्यते ते होचुरुक्तवन्तोऽन्योन्यं देवाश्च परिषद्यसुराश्च हन्त तद्यद्यनुम ८५॥
तिर्भवतां। प्रजापतिनोक्तं तमात्मानमन्विच्छामोऽन्वेषणं कुर्मो यमात्मानमन्विष्य सर्वांश्च लोकानाप्नोति
तीनाप्नोति सर्वांश्च कामानित्युक्त्वा इन्द्रो ह वै राजैव स्वयं देवानामितरान्देवांश्च भोगपरिच्छदं च सर्वं

श्रीम ग तथापुनरप्युपगतवंतौ
तौ २

स्थापयित्वा शरीरमात्रेणैव प्रजापतिं प्रत्यसिप्रव्राजप्रसंगवंतवंतौ तथा विरोचनोऽसुराणां विनयेन गु
रवोऽभिगंतव्या इत्येः तद्दर्शयति । त्रैलोक्यराज्याद्गुरुतराविद्येति । यतो देवासुरस । राज्ञो महांश्चौसंतौ ह
किलासंविदानाविवान्योन्यं संविदमकुर्वाणौ विद्यौ विद्याफलं प्रति अन्योन्यमीर्ष्यां दर्शयंतौ समित्पा
णी समित्भारहस्तौ प्रजापतिसकाशमाजग्मतुरागतवंतौ । तौ ह द्वात्रिंशतं वर्षाणि शुश्रूषापरौ त
त्वा ब्रह्मचर्यमूषतुः उषितवंतौ अभिप्रायज्ञः प्रजापतिस्ता हवाच । किं प्रयोजनमभिप्रेत्यव्छंतावास्तम्
षितवंतौ तौ ह वामितीच्छतौ तौ होचतुः य आत्मेत्यादि भगवतो वचो वेदयंते शिष्टा अतस्तमात्मानं ज्ञातुमि
च्छंतौ आवास्तं अवात्स्वेति । यद्यपि प्राक्प्रजापतेः समीपागमनादन्योन्यमीर्ष्यायुक्तावभूतां तथापि
विद्याप्राप्तिप्रयोजनगौरवात्त्यक्तरागद्वेषमोहेर्ष्यादिदोषावेव सन्तो लोषतुर्ब्रह्मचर्यं प्रजापतौ तेन
दर्शयत्यपि तमात्मविद्यागौरवं । तावेवं तपस्विनौ शुद्धकल्मषौ योग्यावुपलक्ष्य प्रजापतिरुवाच ह ।
य एषोऽक्षिणि पुरुषो निवृत्तचक्षुर्भिर्दृष्टकषायैर्दृश्यते । योगिभिर्दृष्ट एष आत्मापहतपाप्मादिगुणो
यमवोचं पुरा । यद्विज्ञानात्सर्वलोककामावाप्तिरेतदमृतं त्वभयमत एवास्यमत एव ब्रह्मेति प्र
तममि त्यथैतत्प्रजापतिनोक्तमक्षिणि पुरुषो दृश्यत इति वचः श्रुत्वा छायारूपं पुरुषं जगृहतुः । गृही
त्वा वदृढीकरणाय प्रजापतिं पृष्टवंतौ अथ योऽयं हे भगवोऽप्सु परिख्यायते परिसमन्ताज्ज्ञायते । यश्चायमा
दर्शे आत्मनः प्रतिबिंबाकारोऽपरिख्यायते । एवमादौ । कतम एष एषां सर्वैः हीरूक्तः । किं वैक एव स
र्वेष्विति एवं पृष्टः प्रजापतिरुवाचैष उ एव यश्चक्षुषि द्रष्टा मयोक्तस्तद्यतन्मनसि कृत्वैषु सर्वेषु तेषु मध्येषु प
रिख्यायत इति होवाच । ननु कथं युक्तं शिष्ययोर्विपरीतग्रहणमवज्ञात्वा प्रजापतेर्विगतदोषस्याचार्यस्य

स तो नानुज्ञातं कथं।आत्मन्यध्यारोपितपांडित्यमहत्वबोद्धृत्वौ हीन्द्रविरोचनौ तथैव च प्रथितौ लोके।तौ
यदि प्रजापतिना मूढौ युवां विपरीतग्राहिणाविति उक्तौ स्यातां।ततस्तयोश्चित्ते दुःखं स्यात्तज्जनिताच्च चित्ता
वसादात्पुनः प्रश्नश्रवणग्रहणावधारणं प्रत्युत्साहविघातः स्यादतो रक्षणीयौ शिष्याविति मन्य
ते प्रजापतिर्गृहीतां तां तावत्तदुदशरावदृष्टांतेनापनेष्यामीति।ननु न युक्तमेष उ एवेत्यनृतं वक्तुं।न चा
नृतमुक्तं।कथमात्मनोक्तो ह्यक्षिपुरुषो मनसि सन्निहिततरः त्रिष्वपि गृहीतच्छायात्मनः सर्वेषां वास्यैतरः।
सर्वांतर इति श्रुतेस्तमेवावोचदेष उ एवेत्यतो नानृतमुक्तं प्रजापतिना।तथा च तयोर्विपरीतग्रहणं निवे
त्यर्थत्वात्।उदशरावे उदकपूर्णे शरावादौ आत्मानमवेक्ष्य यथात्मानं तदयं यत्तत्रात्मानं पश्यंतौ न विजानीथ
स्तन्मे मम प्रब्रूतमाचक्षीयाथामित्युक्तौ तौ ह तथैवोदशरावेऽवेक्षांचक्राते ऽवेक्षणं चक्रतुस्तथाकृतवंतौ
तौ ह प्रजापतिरुवाच।किं पश्यथ इति।ननु तन्मे प्रब्रूतमित्युक्तास्यामुदशरावेऽवेक्षणं कृत्वा प्रजायत
येन न निवेदितमिदमावाभ्यां न विदितमित्यनिवेदिते वाज्ञानहेतौ ह प्रजापतिरुवाच।किं पश्यथ इति तत्र
कोऽभिप्राय इत्युच्यते।नैव तयोरिदमावयोरविदितमित्याशयौ कथं कालत्रयेऽपि छायात्मन्यात्मप्रत्ययो निश्च
श्चित एवासीत्।यन्न वक्ष्यति तौ ह शान्तहृदयौ प्रवव्रजतुरिति।न चानिश्चिते सिद्धेतार्थे प्रश्नो नाम हृदयस
त्वमुपपद्यते तेन नो वक्तुरिदमावाभ्यां न विदितमिति।विपरीतग्राहिणौ च तौ शिष्यावनुपेक्षणीयाविति स्व ॥८५॥
यमेव पप्रच्छ किं पश्यथ इति।विपरीतनिश्चयापनयाय च वक्ष्यति साध्वलंकृतावित्येवमादि।तौ होचतुः।
यथैवायं भगवो लोमनखादिमंतौ स्व एवमेवेदं लोमनखादिसहितमावयोः प्रतिरूपमुदशरावे पश्या
व इति।तौ ह पुनः प्रजापतिरुवाच च्छायात्म निश्चयापनयाय साध्वलंकृतौ यथा स्वगृहे सुवसनौ महार्हवस्त्रा

तं

परिधानौ परिस्कृतौ छिंन्नलोमनखौ च सन्तावुदशरावे पुनरीक्षेयाथामिती तु वनादि देवायदृष्टं तन्मे
ब्रूतमिति। कथं पुनरनेन साध्वलंकारादिकृतोदशरावेक्षणेन तयोः छायात्मग्रहोपनीतः स्यात्सा
ध्वलंकारसुवसनादीनामागंतूनां छायाकरत्वमुदशरावे यथा शरीरसंबद्धानामेवं शरीरस्यापि
छायाकरत्वं पूर्वं बद्धत्वेनेति [illegible] गम्यते शरीरैकदेशानां लोमनखादीनां नियत्वेनाभिप्रेतानां
मखंडितानां छायाकरत्वं पूर्वमासीत्। छिंन्नेषु पुनर्नैव लोमनखच्छाया दृश्यते अतो रोमनखादिवच्छ
रीरस्याप्यागमापायित्वं सिद्धमित्युदशरावादौ दृश्यमानस्य तन्निमित्तस्य देहस्यानात्मत्वं सिद्धमुद
शरावादौ छायाकरत्वालंकारादिव~~दिवदि नात्मत्वकथनेन छि~~ केवलमेवैतद्दर्शनयावात्तं
विदात्मीयत्वाभिमतं सुखदुःखरागद्वेषमोहादि च कादाचित्कत्वान्नखलोमादिवदना
त्मेति प्रत्येतव्यमेवमत्रापि मिथ्यादेहादेरानात्मत्वकथनेन मिथ्यात्मग्रहापनयनिमित्ते साध्वलंकारादि
दृष्टांते प्रजापतिनोक्तेऽपि तथाकृतवतोरपि छायात्मविपरीतग्रहो नापजगाम यस्मात्तस्मात्स्व
दोषेणैव केनचित्प्रतिबद्धविवेकविज्ञानाविंद्रविरोचनावभूतामिति गम्यते। तौ पूर्ववदेव दृढनिश्च
योपपन्नौ। विपरीतग्रहस्तितौ यथैव प्रतिपन्नौ यथैवेदमिति। हर्षवद्यथा साध्वलंकारादिविशि
ष्टौ वावां स्वःस्वभ एवमेवमौ छायात्मानाविति सुतरां विपरीतनिश्चितौ बभूवतुः। यस्मात्मनो
उद्दर्णं यथाऽऽत्मापहतपाप्मात्युक्तः पुनस्तद्दिदृक्षोषमन्विष्यमाणयोर्यज्ञोक्तिरिति सुरुषो ह इत्यव

नइतिसाक्षादात्मनि निर्दिष्टेतद्विपरीतग्रहापनयायोदशरावः साध्वलंकारदृष्टांतेप्यत्तिहितआत्मस्वरू
पाबोधाद्विपरीतग्रहो नापगतोऽतः स्वदोषेण केनचित्प्रतिबद्धविवेकविज्ञानसामर्थ्यादिति मत्वा
यथाभिप्रेतमेवात्मानं मनसि निधाय एष आत्मेति होवाचैतदमृतमभयमेतद्ब्रह्मेति प्रजापतिः पूर्वव
न्नानुतदभिप्रेतमात्मानं य आत्मेत्यादिवाक्यमलक्षणश्रवणेनादिपुरुषश्रुत्याचोदशरावाद्युपप्रत्यावसं
स्कृतो तावन्मध्ययनं सर्वं पुनः पुनस्स्मरतोः प्रतिबंधक्षयात्स्वयमेवात्मविषये विवेकोभविष्यतीतिमन्वा
नः पुनरलंबयोर्दृष्टांतयोश्चित्तदैन्यौ च स्वोसत्त्विं परिजिहीर्षन्कृतार्थबुद्धितया गच्छंतावप्युपेक्षि
तवान्प्रजापतिः। तौ हेंद्रविरोचनौ शांतहृदयौ तुष्टहृदयौ कृतार्थबुद्धी इत्यर्थः। ननुत्रामएवनाम
श्चेतयोर्जातो विपरीतग्रहो विगतो सविषयत्वेराशेषो सौगासक्तयोर्यथोक्तविस्मरणं स्यादित्याशंका
अप्रत्युक्तुं प्रपञ्चयन्वचनेन सप्रवव्रजतुः गतवंतौ तौ एवं यथोगंतं तयोरिंद्रविरोचनयोर्विरोचनस्तु स्वप
रिजिहीर्षुस्तौ दूरंगच्छंतौ वन्वीक्ष्य य आत्मापहतपाप्मेत्यादिवचनवदेतद्रूपेन ययोःअपच
गोचरत्वमेष्यतीप्यतीतिमत्वो वाच प्रजापतिः अनुपलभ्य यथोक्तलक्षणमात्मानमननुवि
द्य स्वात्मानं प्रत्यक्षं कृत्वा विपरीतनिश्चयावेव सन्तौ इंद्रविरोचनावेतौ व्रजतो गच्छतो यौ तौ अतो ॥८६॥
यतरे देवा वा असुरा किं विशेषितेनैतदुपनिषदः आत्मविद्यां याग्रहीयाता आत्मविद्यास्येयमु
पनिषद्येषां देवानामसुराणां वा त एतदुपनिषद एवंविज्ञाना एतन्निश्चयास्सविष्यतीत्यर्थः। तेषि
प्रवव्रजतुः गमयंतोऽएवं तयोर्गतयोः

पराभविष्यंतीति श्रेयोमार्गात्खरास्तेता वहि स्वस्ता विनश्यास विष्यंतीत्यर्थः। स च गच्छंग च्छतोः सुरासुरराजयोर्यो
ऽसुरराजः स ह शांतहृदय एव सन्विरोचनोऽसुरांजगाम। गत्वा च तेभ्योऽसुरेभ्यः शरीरात्मबुद्धिर्योपनिषत्ता
मेतामुपनिषदं प्रोवाचोक्तवान्देहमात्रमेवात्मा पित्रोक्त इति। तस्मादात्मैव देह इह लोके महय्यः पूजनीयः स्तथा
परिचर्यः परिचरणीयः। तथात्मानमेवेह लोके देहं महयन्परिचरंश्चोभौ लोकाववाप्नोतीमं चामुं चेह
लोकपरलोकयोरेव सर्वलोकाः कामाश्चांतर्भवंतीति राज्ञोऽभिप्रायः। तस्मात्तत्संप्रदायोऽद्यापत्यनुव
र्ततमतीह लोकेऽददानमविभागशीलमश्रद्दधानं सत्कार्येषु श्रद्धारहितं। यथाशक्त्ययजमा
नमयजनस्वभावमाहुरासुरः खल्वयं यत एवं स्वभावो बतेति खिद्यमाना आप्ताः शिष्टा असुरा
णां हि यस्मादश्रद्दधानता लक्षणैषोपनिषत्तयोपनिषदा संस्कृताः संतः प्रेतस्य शरीरं कुणपं
भिक्षयार्घ्यं गंधमाल्यान्नादिलक्षणयावसानेन वस्त्रादिनाच्छादनादिप्रकारेणालंकारादिक
रणेन ध्वजपताकादिकरणेनेत्येवं संस्कुर्वंत्येतेन कुणपसंस्कारेणामुं प्रेत्य प्रतिपत्तव्यं लोकं
जेष्यंतो मन्यंते॥ अथ ह किलेंद्रोऽप्राप्यैव देवान्दैव्याऽत्कौर्यादिसंपदा युक्तत्वाद्गुरोर्वचनं पुनः पु
नः स्मरन्नेवागच्छन्नेतद्वक्ष्यमाणं भयं स्वात्मग्रहणनिमित्तं ददर्श दृष्टवानुदशरावेक्षणवहनसं
तेन प्रजापतिना यदर्थो न्यायस्तत्कस्तरेकदेशो मघवतः प्रयत्नात्तुबुध्योयेन छायात्मग्रहणे दोषं
ददर्श। कथं। यथैव खल्वयमस्मिन्शरीरे साध्वलंकृते छायात्मापि साध्वलंकृतो भवति। नै

सुवसनेयः सुवसनः परिष्कृतः परिष्कृतो। यथा नखलोमादिच्छेदे तावयवापगमे छायात्मापि परिष्कृतो
भवति न खलु लोमादिरहितो भवति। एवमेवायं छायात्मास्मिञ्छरीरे नखलोमादिसहिते तदवयवलस्यैतस्य
नाद्धेच्छेदोपगमे भोस भवति स्रामे स्रामः किं चैकनेत्रस्य स्यांधं चेन गतं चाक्षुश्छिन्ननासिकावायस्य सदा स्र
वति स स्रामः परिवृक्णस्य छिन्नहस्तः छिन्नपादो वा। स्रामपरिवृक्णो वा देहे छायात्मापि तथा भवति। तथा
थास्य देहस्य नाशमन्वेष नश्यतीत्यतो नाहमत्रास्मिञ्छायात्मदर्शने देहात्मदर्शने वा भोग्यं फलं पश्यामी
त्येवं दोषं देहे छायात्मदर्शने। अथ वस्य समित्पाणिर्ब्रह्मचर्यं वस्तुं पुनरेयाय। तं ह प्रजापतिरुवाच। म
घवन्यच्छान्तहृदयः प्राव्राजीः प्रगतवानसि विरोचनेन सार्धं किमिच्छन्पुनरागम इति। विजानन्नपि पु
नः प्रश्नं छंदांसि प्रायालिप्यच्छयोपदेष्यते न मोपसीदेति यद्वत् तथा वस्त्वासि प्रायीयं प्रकटमकरोद्यथैव खल्व
यमित्याद्येवमेवेति सान्वमोदत्प्रजापतिः। ननु लौकुल्येहि पुरुषश्च वपोदेह छायामिंद्रोयम्हीदामेति। न्दे
हमेव तु विरोचनस्तत्किं निमित्तं। तत्र मन्यते। यथेंद्रस्योद्वारा वा दि प्रजापतिवचनं स्मरतो देवानप्राप्य
तस्यैवाचार्योक्तबुध्या छायात्मग्रहणं तत्र दोषदर्शनं वान्हवैन्नतथा विरोचनस्य देहएवात्मदर्शनं। ना
पि तत्र दोषदर्शने बलं स्वातद्धदेवति धार्यग्रहणसामर्थ्यप्रतिबंधदोषाल्पत्वबहुत्वापेक्षमिंद्रविरोचनयोः
छायात्मदेहयोर्ग्रहणमिंद्रोत्पदोषत्वाद्दृश्यत इति श्रुत्यर्थमेव श्रद्दधानतयाज्ञाहेतरस्थीयां छाया ॥८७॥
निमित्तं देहे हित्वात्मत्यर्थं लक्षोपलक्षणायावत छायात्मप्रजापतिनोक्तो यमिति दोषस्तस्य तौ स्यात् यथा
क्लिन्नौ ग्लानौ वयोरादर्श दृश्यमानयोर्वासः सोयं पर्यन्नीतं तन्महार्हमिति छायात्मनि निमित्तं वासए

वोच्यते। न छाया। तद्वदिरोचनाभिप्रायः। स्वचित्तगुणदोषवशाद्धि तत्त्वार्थावधारणं तुल्येपि श्रवणे ख्यापि
तं साम्यतरस्तदंघ्र मितिद्रुकारमात्रश्रवणा तुल्यंतरे निमित्तान्यपितदनुगुणान्येवसहकारीणि भवंति। एवमेवैषम
घवन्सम्यक्कृतयावगतेन छाया मेत्यवाच प्रजापतिर्युष्मयोक्त आत्मा प्रकृत एतमेवात्मानं तु ते भूयः पूर्वोक्तं व्याख्या
तमपि पुनरप्यनुव्याख्यास्यामि यस्मात्सकृतश्रुतिं दोषरहितानामवधारणविषयप्रामाण्यमपि नाय हीर
तः केनचिद्दोषेण प्रतिबद्धग्रहणसामर्थ्यस्त्वमतस्तत्क्षपणाय वसापराणि द्वात्रिंशतं वर्षाणीत्युक्त्वा काल
क्षोपितवंते क्षपितदोषाय तस्मै होवाच॥ ॥य एषोक्षिणि पुरुषो दृश्यत इत्याद्युक्तलक्षण आत्मा पहतपाप्मादिलक्षणो य एषोक्षिणीत्यादिना व्याख्या
त एषसः। कोसौ यः स्वप्ने महीयमानश्चरतीति। पूज्यमानश्चरत्यनेकविधान्स्वप्नभोगाननुभवतीत्य
र्थः। एष आत्मेति होवाचेत्यादि समानं। सहेंद्र एवमुक्तः शांतहृदयः प्रवव्राज। स हाप्राप्यैव देवानु
पूर्ववदेतद्भयं ददर्श। कथं। तद्यदीदं शरीरमंधं भवति। स्वप्नात्माप्यनंधः स भवति। यदि स्रा
ममिदं शरीरमस्रामश्रुतः स भवति। नैवैष स्वप्नात्मास्य देहस्य दोषेण दुष्यति। न वधेनास्य हन्यते। छा
यात्मवन्न चास्य स्रामेण स्रामः स्वप्नात्मा भवति। यदध्यात्मो बोधागममात्रेणोपन्यस्तं नास्य जरायेति छा
यात्मेत्यादि। तदिह न्यायेनोपपादयितुमुपन्यस्तं। न तावदयं छायात्मावदेहदोषयुक्तः। किंतु घ्नंति त्वेवै
नं एवं तावदिदमर्थं घ्नंतीवैनं केचनेति द्रष्टव्यं। न तु घ्नंत्येवेत्युत्तरेषुस र्वेषु विद्रावयंतीव दर्शनान्न स्य वधेन ह
न्यत इति विशेषणाच्च घ्नंति त्वेवेतिवन्नैवं प्रजापतिं प्रमाभीकुर्वतो नं तवा वदितापादनानुपपन्नेरेत।

द्रष्टुत म्रियेत तत्प्रजापतिर्वैव नैनं कथं कौ मृषा कुर्यादिंद्रस्तं प्रमाणीकुर्वन्न तु छायापुरुषे प्रजापतिनोक्ते स्यैव शरीरस्य नाशा
मन्वेषणेन श्यतीति दोषमस्याश्चथे तापि स्यान्नैवं कस्माद्य एषोऽक्षिणि पुरुषो दृश्यत इति न छायात्मा प्रजापतिनो
क्त इति मन्यते कथं प्रजापतिः प्रमाणीकृत्य पुनः श्रवणाय समित्पाणिर्गच्छेज्जगाम। यातस्मान्न छा
छायात्म म घवान्कथं। अपहतपाप्मादिलक्षणो दृष्टे यदि छायात्मा प्रजापतिनोक्त इति मन्यते तदा कथं प्रजापतिं
प्रमाणीकृत्य पुनः श्रवणाय समित्पाणिर्गच्छेज्जगाम यातस्माच्छायात्मा प्रजापतिनोक्त इति मन्यते। तथा च व्या ना
ख्यातं दृष्टाक्षिणि दृश्यत इति। तथा विध्वापयंतीव विद्रावयंतीव। तथा च पुत्रादिमरणनिमित्तमप्रियवे
त्तेव भवति। अप्रियस्य चयमपि रोदितीव न त्वप्रियं वेत्त्येव कथं वेत्तेवोच्यते। न अश्रुतालयत्ववचना
नुपपत्तेः। ध्यायतीवेति वक्ष्यत्यंतरात्। ननु प्रत्यक्षविरोध इति चेन्न शरीराभिमानप्रत्ययवद्धंति संसवान्निवृत्त
व तोऽप्रियवेत्तेवेति। नाहमत्र भोग्यं पश्यामीति च ज्ञात्मज्ञानेऽपीष्टं फलं नोपलभ इत्यभिप्रायः। एवमेवैष
त्वाभिप्रायेण तिवाक्यशेषः आत्मनो मृत्ताभयगुणवत्तस्याभिप्रेतत्वादविरुद्धमपि न्यायतो मया
यथा व्याख्याताव धारयति। तस्माद्स्यापि प्रतिबंधकरणमस्तीति मन्वानस्तत्रैव न्यवसाप्यसापराणि
द्वात्रिंशतं वर्षाणि ब्रह्मचर्यमित्यादि देश प्रजापतिस्तथोषितवते क्षपितकल्मषायाह।। पूर्ववदेतं त्वेव त ॥८८॥
स्याप्यकृत्वात घ्रैते स्वप्नइत्यादि व्याख्यातं। वाक्यमक्षिणियो दृष्टास्य चन्द्रेयमहीयमानश्चरति। सएषस्व
प्तः समस्तः संप्रसन्नः स्वप्नं न विजानाति। एष आत्मेति होवाचैतदमृतमभयमेतद्ब्रह्मेति स्वाभिप्रेतमेव म

प्रवांस्तत्रापि दोषं ददर्श। कथं। नाह नैव सुषुप्तो यः। माखल्वयं संप्रति सम्यगिदानीमात्मानं जानाति नैव जानाति। कथं। अयम
हमस्मीति। नो एवेमानि भूतानि चेति। यथा जाग्रत स्वप्नयोरतो विनाशमेव विनाशमिव चेति। पूर्ववदेव। अपीतोपिगतो
भवति। विनष्ट इव भवतीत्यभिप्रायः। ज्ञाने हि सति ज्ञातुः सद्भावो गम्यते। नासति ज्ञाने न च सुषुप्तस्य ज्ञानं दृश्यते।
अतो विनष्ट इवेत्यभिप्रायः। ननु विनाशमेवात्मनो मन्यते स्मृतासत्यवचनस्य प्रामाण्यमिच्छन्। पूर्ववदेवमेवेत्युवा
योमयोक्तश्चिसिः पर्यायेऽस्तमने ऽतन्नो एवान्यत्रैतस्मादात्मनोऽन्यं कंचन किं तर्हि एतमेव भूयो व्याख्यास्यामि। स्वल्प स्त
पदोषस्त्वावशिष्टस्तत्क्षपणाय वसापरापि अन्यानि पञ्च वर्षाणि इत्युक्तः स तथा चकार। तस्मै मृदितकषायादिदोषा
यस्थानत्रयसंबंधरहितमात्मनः स्वरूपमपहतपाप्मादिलक्षणं मघवते तस्मै होवाच तान्येकशतं वर्षाणि संपेदुः। सं
पंनानि बभूवुर्यदा कुलेके शिष्टा एकशतं हवै वर्षाणि मघवान्प्रजापतौ ब्रह्मचर्यमुवासेति। तदेतद्वात्रिंशतमि
त्यादिना दर्शितमित्याख्यायिकातोपस्तुत्यर्थमुच्यते। एवं किंचैतद्दुर्लभत्वादपि गुरुतरमिंद्रेणापि महता यत्नेनैकोत्तर
वर्षशतकृतायासेन प्राप्तमात्मज्ञानमतो नातः परं पुरुषार्थोंतरमस्तीत्यात्मज्ञानं स्तौति। मघवन्मर्त्यं वै शरीरमात्त
मीदं शरीरं यन्मन्यसे स्थाप्याधारादिलक्षणः संप्रसादलक्षण आत्मा मयोक्तो विनाशमेवापीतो भवतीति। शृणु
तत्र कारणं। यदिदं शरीरं वै यत्पश्यसि तदेतन्मर्त्यं विनाशि तद्यात्तं मृत्युना ग्रस्तं सततमेव कदाचिदेवम्रियत इति म
र्त्यमित्युक्तेन तथा संत्रासो भवति। यथायस्तमेव सदा व्याघ्रमेव मृत्युक्ते इति वैराग्यार्थं विशेषणमुच्यते आत्तं मृत्युने
कृत्स्नेनामद् वत्साश्मा तिमानतो विरक्तः सन्निवर्तत इति। शरीरमित्यत्र सहेंद्रियमनोभिरुच्यते तच्छरीरमस्य सं
दस्य त्रिस्थानतया गम्यमानस्याऽमृतस्य मरणादिदेहेंद्रियमनोधर्मवर्जितस्येत्येतदमृतस्येत्यनेनैवाशरीरत्वे सिद्धे

जीवरूपेण प्रविश्य सदेवाधिष्ठितं तिष्ठत्यस्मिन्निति वाधिष्ठानं २

इदं पुनः शरीरस्येति वचनं वाय्वादिवत्सावयवस्य मूर्तिमत्वे मा भूदिति तस्यामृतस्याशरीरस्यात्मनो भोगाधिष्ठानमात्मनो
वा सतः ईक्षितुस्तेजोबन्नादिक्रमेण संपन्नमधिष्ठानं यस्येदमीदृशं नित्यमेव मृत्युग्रस्तं धर्माधर्मज-
नितत्वात्प्रियाप्रियवदधिष्ठानं । तदधिष्ठितस्तद्वान्सशरीरो भवति । अशरीरस्य स्वाभाविकस्यात्मनस्तदे-
वाहं शरीरं शरीरमेवाहमित्यविवेकात्मभावः सशरीरत्वं सशरीरः सन्नात्तो ग्रस्तः प्रियाप्रियाभ्यां
प्रसिद्धमेतत्तस्य चैवं सशरीरस्य सतः प्रियाप्रियो बाह्यविषयसंयोगवियोगनिमित्तयो बाह्यविष-
यसंयोगवियोगौ ममेति मन्यमानस्यापहतिर्विनाश उच्छेदः संततिरूपयो र्नास्तीति । तं पुनर्देहाभिमाना-
दशरीरस्वरूपविज्ञानेन निवर्तिताविवेकज्ञानमशरीरं संतं प्रियाप्रिये न स्पृशतः । स्पृशिः
प्रत्येकं संबध्यत इति प्रियं न स्पृशत्यप्रियं न स्पृशतीति वाक्यद्वयं भवति नञोऽध्याहृत्य धार्मिकैः सह
संभाषेतेतिवद्धर्माधर्मकार्ये हि ते शरीरवतस्तस्य रूपमिति । तत्र धर्माधर्मयोरसंभवात्तत्कार्यभा-
वो दूरत एवेत्यतो न प्रियाप्रिये स्पृशतः । ननु यदि प्रियमप्यशरीरं न स्पृशतीति यन्मघवतोक्तं सुषुप्त-
स्थो विनाशमेवापीतो भवतीति तदेवैवं प्राप्तं । नैष दोषः । धर्माधर्मकार्ययोः शरीरसंबन्धिनोः प्रि-
याप्रिययोः प्रतिषेधस्य विवक्षितत्वादशरीरं न प्रियाप्रिये स्पृशत इत्यादिश्रुत्यागमापायिनोर्हि स्प- ॥८७॥
र्शो दृष्टो । यथा शीतस्पर्श उष्णस्पर्श इति । न त्वग्नेरुष्णप्रकाशयोः स्वभावभूतयोरग्निनास्पर्श
इति । सवितुर्वोष्णप्रकाशावत्स्वरूपभूतस्यानंदस्य प्रियस्यापि नेह प्रतिषेधो विज्ञानमानंदं आनंदो ब्र-

ल्लेत्यादिश्रुतिभ्यः। इहापि तस्मैव सुखमित्युक्तत्वान्न तु स्वप्नः प्रियस्यैकत्वेऽसंवेद्यत्वात्स्वरूपेणैव वानि
त्यसंवेद्यत्वान्नि विशेषतेति। नेंद्रस्य तदिष्टं। नाहखल्वयं संप्रत्यात्मानं जानाति अयमहमस्मीति नो
एवेमानि भूतानि विनाशमेवापीतो भवति। नाहमत्र भोग्यं पश्यामीत्युक्तत्वात् तदिंद्रस्येष्टं। यद्भूतानि
चात्मानं च जानाति। न याप्रियं किंचिद्वेत्ति स च सर्वांश्च लोकानाप्नोति सर्वांश्च कामानन्येन ज्ञानेन। स च
यमेव तदिष्टमिंद्रस्य। इमानि भूतानि मत्तोऽन्यानि लोकांश्च कामांश्च सर्वे मत्तोऽन्येऽहमेषां स्वामी
ति न त्वेतदिंद्रस्य हितं हितं चेंद्रस्य प्रजापतिना वक्तव्यं। त्वोम वद शरीरात्मतया सर्वभूतलोकका
माप्त्योपगमेन याप्तिस्तद्धितमिंद्राय वक्ष्यामीति प्रजापतिनाभिप्रेतं। ननु राज्ञो राज्याप्तिवदन्य
त्वेन तत्रैवं स्मृतिकः केन विज्ञानीयाद्यस्मै कथमिमानि भूतान्ययमहमस्मीति। नन्वस्मिन्पक्षे स्त्रीसि
र्वीयानैषी वा स यदि पितृलोककामः स एकधा भवति त्रिधा भवतीत्याद्यैश्वर्यश्रुतयोऽनुपपन्नाः। न सर्वात्म
नः सर्वफलसंबंधोपपत्तेरविरोधात् मृद इव सर्वघटशरावकुंडाद्याप्तिर्न तु सर्वात्मत्वे सुखदुःखसंबंधो स्यदु
पि स्यादिति चेन्न दुःखस्याप्यात्मत्वोपगमादविरोधात् आत्मन्यविद्याकल्पनानिमित्तानि दुःखानि
रज्ज्वामिव सर्पादीनि कल्पनानिमित्तानि। सा चाविद्याऽशरीरात्मैकत्वस्वरूपदर्शनेन दुःखनिमि
त्तोच्छिन्नेति दुःखसंबंधाशंका न संभवति। शुद्धसत्वसंकल्पनिमित्तानां तु कामानामीश्वरदेहसं
बंधः। सर्वभूतेषु मानसानां पर एव सर्वसत्वेष्वपि छिद्रद्वारेण सोक्तेति सर्वाविद्याकृतसंव्यवहारा॥
णां पर एवात्मास्पदो नान्योऽस्तीति वेदांतसिद्धांतः। य एषोऽक्षिणि पुरुषो दृश्यत इति छायापुरुष एव

प्रजापतिनोक्तः स्वप्नसुषुप्तयोश्चान्य एव न परोपहतपाप्मादिलक्षणो विरोधादिति केचिन्मन्यंते। छायाद्यात्मनां
चोपदेशोऽप्रयोजनमाचक्षते। अत्रावेनोच्यमाने किल दुर्विज्ञेयत्वात्परस्यात्मनोऽत्यंतबाह्यविषयासक्तचेतसां
ऽत्यंतसूक्ष्मवस्तुश्रवणे व्यामोहो मा भूदिति। यथा किल द्वितीयायां सूक्ष्मं चंद्रमसं दिदर्शयिषुर्वृक्षं कंचि
त्प्रत्यक्षमादौ दर्शयति पश्यामुमेष चंद्र इति तां ततोऽन्यं ततोऽप्यन्यं गिरिमूर्धानं च चंद्रमसः समीपस्थमेष चंद्र इ
ति ततोऽसौ चंद्रं पश्यति। एवमेतदप्येषोऽक्षिणीत्याद्युक्तं प्रजापतिना त्रिभिः पर्यायैर्न पर इति। चतुर्थे तु पर्या
ये देहान्मर्त्यात्समुत्थायाशरीरतामापन्नो ज्योतिःस्वरूपं यस्मिन्नुत्तमपुरुषे स्त्र्यादिभिर्जक्षत्क्रीडन्रममा
णो भवति। स उत्तमः पुरुषः पर उक्त इति चाहुः। सत्यं रमणीया तावदियं व्याख्या श्रोतुं न त्वर्थोऽस्य ग्रंथस्यैवं
संभवति कथं। अक्षिणि पुरुषो दृश्यत इत्युपन्यस्यान्विष्यात्स्यां छायात्मनि गृहीते तयोस्तद्विपरीतग्रहणं
मत्यात्तदपनयायोदशरावोपन्यासः किं पश्यथ इति च प्रश्नः साध्वलंकारोपदेशश्चानर्थकः स्यात्। यदि
छायात्मैव प्रजापतिना क्षिणि दृश्यत इत्युपदिष्टः। किं च यदि स्वयमुपदिष्ट इति गृहस्याप्यपन
यकारणं वक्तव्यं स्यात् स्वप्नसुषुप्तात्मग्रहणयोरपि तदपनयो कारणं वक्तव्यं इति। रूपान्नवोक्तं तेन मन्या
महे नाक्षिणि छायात्मा प्रजापतिनोपदिष्टः किं वान्य एवाक्षिणि द्रष्टा चेद् दृश्यत इत्युपदिष्टः स्यात्तत इदं यु
क्तमेतं त्वेव त इत्युक्ता स्वप्नेऽपि द्रष्टुरेवोपदेशात्स्वप्ने न द्रष्टोपदिष्ट इति चेन्नापि रोदितीवाप्रियवेत्तेवेत्यु ॥९०॥
पदेशान्न च द्रष्टुरन्यः कश्चित्स्वप्ने न हीयमानश्च यस्य त्वत्रायं पुरुषः स्वयंज्योतिरिति न्यायतः अत्यंतर
सिद्धत्वाद्यद्यपि स्वप्ने स धीर्भवतीति। तथापि न धीः स्वप्नभोगोपलब्धिं प्रति करणत्वं भजते। किं चैत
ह्यपि पटवितत्रवजोदासनाम्नया दृश्ये च धीर्भवति तिनद्रष्टुः स्वयंज्योतिष्ट्वबाधा स्यात् किं चान्यच्चाग

ग्र

स्वप्नयोर्भूतानि स्वात्मानं यज्जानातीमानि भूतानि अयमहमस्मीति। प्राप्तोस्यां प्रतिषेधो युक्तः स्या
न्नाह खल्वयमित्यादिस्तथा चेतनस्यैवाविद्याविभिन्ननिमित्तयोः सशरीरत्वे सति प्रियाप्रिययोरपहति
र्नास्तीत्युक्ता तस्यैव शरीरस्य सतो विद्यायां सत्यां सशरीरत्वे प्राप्तयोः प्रतिषेधो युक्तो शरीरं वाव
संतं प्रियाप्रिये न स्पृशत इति। एकस्यैवात्मा स्वप्नवृत्तांतयोर्महामत्स्यवदसंगः संचरतीति श्रुत्यं
तरसिद्धा। यच्चोक्तं संप्रसादः शरीरात्समुत्थायापययस्मिन् स्त्र्यादिभी रममाणो भवति। सोन्यः संप्रसादा
दक्षिकरणं निर्दिष्टनुत्तमः पुरुष इति। तदप्यसच्चतुर्थेपि पर्याये एवं तं भूय एव त इति वचनाद्युदितात्। तोन्यो
स्ति प्रेतः स्यात् पूर्ववदेतं चैव त इति न श्रयान्मृषा प्रजापतिः किं वान्यत्तेजोबन्नादीनां स्रष्टुः स
वि तः स्वयं कारदेहस्तुंगे प्रवेशं दर्शयित्वा प्रविश्याय पुनस्तत्त्वमसीत्येकपदेशोल्लवि षष्ठषदि संप्रसादादन्या
दुत्तमः पुरुषो भवेत्तथा त्वम्भ्यहमेवेत्यादि-श्रयात्मैवेदं सर्वमिति नापसंभवतस्येषच्यदित्सोमा जीवा
दन्योस्ति विषयन्तान्यदतोस्ति द्रष्टृ इत्यादिश्रुत्यंतराच्च। सर्वश्रुतिषु च परस्मिन्नात्मशब्द प्रयो
गो नात्मविषयप्रत्ययगामाये सर्वज्ञं वेनां परमात्मानं स्वं तस्मादेकरवात्मा प्राकरणी सिद्धो। न चा
त्मनः संसारित्वमविद्याध्यस्तत्वादात्मनि संसारस्य। न हि रज्जुशुक्तिकागगनादिषु सर्पयौ
२ ला रजतमलादीनि मिथ्याज्ञानाध्यस्तानि तेषां भवितुं ति अयेतैः सशरीरस्य प्रियाप्रिययोरपहतिर्नास्ती न
॥ति व्याख्यातं। यच्चोक्तिमप्रियवत्त्वे वेत्ति। नाप्रियवेत्त्वेवेति सिद्धमेवं यसतिसर्वपर्यायेष्वेतद
मृषा प्रसक्तं तस्मिं ... आदित्रीरं तासक्तिप्रसीदित्युपदेशः।

मृतमसत्यमेतद्ब्रह्मेति प्रजापतेर्वचनं। यद्विप्रजापतिश्च सर्वरूपायाः श्रुतेर्वचनं सत्यमेव सर्वे त्र।
नवतत्कुतर्कबुद्ध्यामृषा कर्तुंयुक्तं। ततोगुरुतरस्य प्रमाणां तरस्यानुपपत्तेः। ननु प्रसंहोदुःखा
घप्रियवेदत्वमध्यसिद्धायत्वस्यत इति चेन्न जरादिरहितोजीर्णोहंजातोऽहंमायुष्मान्गौरः कृ
शोमृतइत्यादिप्रत्ययज्ञानुलववत्तदुपपत्तेः। सर्वमप्येतत्सत्यमिति चेदस्सेवैतदेवं। दुःखवगमंयेन
देवराजोयुद्धशरावाप्दिदत्रिंताः। विनाद्यायुक्तिरपिमुमोदैवात्रविनाशमेवापीतोसवतीति। तथा
विरोचनोमहाप्राज्ञःप्राजापत्योपि देहमात्रात्मदर्शनोबभूव। तथेंदुस्यात्मविनाशसयसाधनंग
रएवदेनात्रिकान्यमज्ञंस्तथा। सांख्याद्रष्टारंदेहादिव्यतिरिक्तंमवगम्यापित्यक्तागमप्रमाणत्वा
न्मृत्कविषयएवान्यत्वदर्शनेतस्थुः। ततोऽन्येकारणादादिदर्शनाः कषायस्तैरक्तंमिवद्वारादि
लिर्वस्त्रंनवलिरात्मगुणयोर्युक्तमात्मद्रव्यंविशोधयितुंप्रवृत्तास्तथाथा कर्मिणो बाह्यविषयापहृत
चेतसोवेदप्रमाणाअपिपरमार्थसत्यमात्मैकत्वंविनाशमिवेंद्रवन्मन्यमानाघटीयंत्रवदारो
हावरोहप्रकारैरनिशंबंभ्रमंति। किमन्येक्षुद्रजंतवोविवेकहीनाः स्वभावतएवबहिर्विषयापहृ ॥थ९१॥
तचेतसः। तस्मादिदंत्यक्तसर्वबौषणैरनन्यशरणैः परमहंसपरिव्राजकैरत्याश्रमिभिर्वेदां
तविज्ञानपरैरेवरेवनवेद्नीयंपूज्यतमैरेवं। प्राजापत्यंचेमंसंप्रदायमनुसा। रद्भिरुपनिब
से२

द्धं प्रकरणचतुष्टयेन। तस्मात्तु द्वाःसंख्याप्यापितएवनान्यइति॥ ॥तत्राशरीरस्यसंप्रसादस्याविद्यया
शरीरेणाविशेषतांसशरीरतामेवसंप्राप्तस्यशरीरात्समुत्थायस्वेनरूपेणयथाभिनिष्पत्तिस्तथा
वक्तव्येति।दृष्टांतउच्यतेअशरीरोवायुरविद्यमानंशिरःपाण्यादिमच्छरीरमस्येत्यशरीरःकिंचाभ्रंवि
द्युत्स्तनयित्नुरित्येतानिचाशरीराणितत्रैवसतिवर्षादिप्रयोजनावसानेयथा।मुष्मादितिभूमिष्ठा
श्रुतिर्द्युलोकसंबंधिनमाकाशदेशंव्यपदिशति।एतानियथोक्तान्याकाशसमानरूपतामा
पन्नानिस्वेनवाय्वादिरूपेणागृह्यमाणान्याकाशाख्यतांगतानि।यथासंप्रसादोविद्या।वस्था
यांशरीरात्मत्वमेवापन्नस्तानितथाएतान्यमुष्माद्युलोकसंबंधिनआकाशदेशात्समुत्थि
तिवर्षणादिप्रयोजनासिनिवृत्तयेकथं।शिशिरापायेसवितृपरंज्योतिःप्रकृष्टंग्रैष्मिकमुपसंप
द्यसावित्रमभितापंप्राप्येत्यर्थः।आदित्याभितापेनपृथग्भावमापादिताःसंतःस्वेनस्वेनरूपेण
पुरोवातादिवायुरूपेणस्तिमितभावंहित्वाभ्रमपिभूमिपर्वतहस्त्यादिरूपेणविद्युदपिस्वेनज्यो
स्वे४ तिर्लतादिचपलरूपेणस्तनयित्नुरपिस्वेनगर्जिताशनिरूपेणेत्येवंप्रावृडागमेस्वेनस्वेनरूपे
णाभिनिष्पद्यंतेयथायंदृष्टांतोवाय्वादीनामाकाशादिसाम्यगमनवदविद्ययासंसारावस्थायां
सशरीरसाम्यमापन्नोहममुष्यपुत्रोजातोजीर्णोमरिष्यइतिएवंप्रकारंप्रजापतिनैवंमघवा
न्यथोक्तक्रमेणनाशरीरत्वंदेहेंद्रियादिधर्मातत्त्वमसीतिप्रतिबोधितःसन्सएषसंप्रसादोजीवो
न१

ऽस्माच्छरीरादाकाशादिव वायवादयः समुत्थाय देहादिवैलक्षण्यमात्मनो रूपमवगम्य देहात्मभा
वनां हित्वा इत्येतत् स्वेन रूपेण सदात्मनैवाभिनिष्पद्यत इति व्याख्यातं पुरस्तात् । येन स्वेन रूपेण
संप्रसादोऽभिनिष्पद्यते प्राक् प्रतिबोधात्तद्भ्रांतिनिमित्तात्सर्पत्ववंतीयथा रज्जुः पश्चात्कृतप्रका
शा रज्ज्वात्मना स्वेन रूपेणाभिनिष्पद्यते । एवं स उत्तमः पुरुषः उत्तमश्चासौ पुरुषश्चेत्युत्तम
पुरुषः । स एवोत्तमपुरुषोऽक्षिस्वप्नपुरुषौ व्यक्ताव्यक्तौ चक्षुश्च स्वप्नसुषुप्तः समस्तः संप्रसन्नोऽशरी
रश्च । स्वेन रूपेणैषामेष स्वेन रूपेणावस्थितः क्रमादीदृशोऽस्य कृता व्याकृतौ विपक्ष्योत्तमः पुरु
षः कृतनिर्वचनोऽस्य यं गीतासु । स संप्रसादः स्वेन रूपेण तत्र स्वात्मनि स्थितः । तत्रास्वात्मस्थः सन्
पर्येति । क्वचिदिन्द्रात्मना जक्षद्भक्षयन् हसन् वा उच्चावचान्भोगानीप्सितान्कांश्चिन्मनोमात्रेण
संकल्पमात्रादेवोत्थितैर्ब्रह्मलोकादिके क्रीडन् स्त्र्यादिभी रममाणश्च मनसैव नोपजनं स्त्री
पुंसयोरन्योन्योपगमेन जायत इत्युपजनमात्मभावेन वा समीपे जायत इत्युपजनमिदं शरी
रं । तन्न स्मरन् । स्मरणे हि दुःखमेव स्यात् दुःखात्मकत्वात्तस्य । नन्वनुभूतं चेन्न स्मरेत् सर्वज्ञत्वं ५.२।
मुक्तस्य नन्वनुभूतं चेन्नैष दोषो येन मिथ्याज्ञानादिना जनितं तत् कैव मिथ्याज्ञानादि विषये
क्वचिदितरस्मै मतस्तन्नानुभूतमेवेति न तदस्मरणे सर्वज्ञत्वहानिर्न हि उन्मत्तेन ग्रहग्रहीतेन

वायदनुसृतं तदुन्माद्युपगमे । शरीरसंबंधस्यात्यथे हापि संसारिलिंगं विद्यादोषवद्बुद्धिर्यदनुसृत्यते तत्सर्वो आ
नमशरीरं न स्पृशति । अविद्यानिमित्तत्वात् । ये तु विगलितदोषैर्मर्दितकषाये मनसि सत्याः कामा अनृतेन
नापिधाना अनुसर्यंते । विद्यास्तित्वं सत्याकाशवमुक्तेन स्वात्मसत्तेन संबध्यंते इत्यात्मज्ञानसत्कृतये नि
दृश्यंते ऽतः साक्षादेतद्दिव्यं न श्चिय एते ब्रह्मलोके इति । यत्र क्व च न सवंतोपि ब्रह्मलोके च हिते लोके सवंती
ति सर्वात्मत्वाद्ब्रह्मलक्षण उच्यंते । ननु कथमेकः आत्मा यत्र पश्यति नान्यच्छृणोति नान्यद्विजानातीति
भूमा कामांश्च ब्रह्मलौकिकान्पश्यन्रमत इति च विरुद्धं । यथोक्तो यस्मिन्नेव ब्रह्मणि पश्यति स तस्मिन्ने
व ब्रह्मणे न पश्यति चेति । नैष दोषः अन्यत्र परिहृतत्वाद्द्रष्टुर्दृष्टेरविपरिलोपात्स्य श्रुतेर्न्नेव स्वस्वतो द्र
ष्टुरन्यत्वेन कामानामसत्वान्न पश्यतीति तथाचापि सुषुप्ते ऽउक्तं मुक्तस्यापि सर्वैकत्वात्समानो द्वि
तीयाभावः । केन कं पश्येदिति वोक्तमेव । अशरीरस्वरूपी पहतपाप्मादिफलक्षणः स कथमेषु
ष्टिणि दृश्यत इत्युक्तः प्रजापतिना । तत्र यथासावक्षिणि साक्षाद्दृश्यते तद्वक्तव्यं इतीदमारभ्यते । त
त्र को हेतुरक्षि । लिंगत्वेन स्यात् । स दृष्टांतः यथा प्रयोग्यः प्रयोग्यपरो वा स शब्दः । प्रयुज्यत इति प्र
योग्यो अश्वो बलीवर्दो वा यथा लोके आचरण्यने । नेति आचरणो रथो ऽनो वा तस्मिन्नाचरणे युक्त
आकर्षणायैवमस्मिन्छरीरे रथस्थानीये प्राणः पंचवृत्तिरिंद्रियमनोबुद्धिसंयुक्तः प्रज्ञा
नाविद्याज्ञानक्रियाशक्तिद्वयसंमूर्छितात्मा युक्तः स्वकर्मफलोपभोगनिमित्तं युक्तः कार्य

न्तु अहं मुक्तं ततः क्रान्तो भविष्यामि कस्मिन्वा प्रतिष्ठिते प्रतिष्ठास्यामीति स्थिरेण राज्ञ इव सर्वाधिकारी
पौरजनव्यापारेष्वधिकृतस्तस्यैव बलमात्रैकदेशस्थं चक्षुरिन्द्रियं रूपोपलब्धिद्वारं हृतं। अथ यत्र
कृष्णसारोपलक्षितमाकाशं देहच्छिद्रं अनु विषक्तं अनुषक्तमनुगतं। तं तत्र सप्त्र कृतो शरीर आत्मा
तु पश्यच्चक्षुषि तत्व इति वा चाक्षुषस्तस्य दर्शनाय रूपोपलब्धये चक्षुः करणं यस्यतद्देहादिभिः संहतत्वात्परस्य
द्रष्टुरर्थं। सोऽयं चक्षुषि दर्शनेन लिङ्गेन दृश्यते परोऽसंहतोऽशरीरोऽक्षिणि दृश्यत इति प्रजापतिनोक्तं सर्वे
न्द्रियद्वारोपलब्धिः। तत्रार्थे सर्वविषयोपलब्धा हि स एवेति। स्फुटोपलब्धिहेतुत्वाच्चक्षिणीति विशेषवचनं सर्व
श्रुतिप्रत्यक्षमदर्शमिति ततस्सत्यं भवतीति च श्रुतिः। तथा प्रियोऽस्मिन्देह एवेदं कथमिदं सुगंधि दुर्गंधि वा जिघ्राणी
त्यस्य गंधं विजानीयामिति। स आत्मा तस्य गंधाय गंधविज्ञानाय घ्राणमथ यो वेदेदं वचनमत्तिव्याहराणीति
वदिष्यामीति स आत्मा तिव्याहरणक्रियासिद्धये करणं वागिंद्रियमथ यो वेदेदं शृणवानीति स आत्मा
श्रवणाय श्रोत्रमथ यो वेदेदं मन्वानीति मननव्यापारमिंद्रियासंप्रयुक्तं केवलं मन्वानीति वेद स आ
मा [illegible] गंधाय गंधविज्ञानाय घ्राणमथ यो वेदेदं वचनमसि व्याहराणीति वदिष्यामीति स आत्मा सिव्याहि
रण क्रियासिद्धये यो वेद स आत्मेयं वं सर्वत्र प्रयोगाद्वेदनमस्य स्वरूपमित्यवगम्यते यथा यः पुरस्तात्प्रकाशय १।३।।
ति स आदित्यो यो दक्षिणतो यः पश्चाद्य उत्तरतो यश्चोर्ध्वं प्रकाशयति स आदित्य इत्युक्ते प्रकाशः स्वरूपमिति गि
सम्यते दर्शनादिक्रियानिर्वृत्तौ नित्यचक्षुरादिकरणानि वास्यात्मनः सामर्थ्यादवगम्यते। आत्मनः सत्तामा
र्थ नि

मदिवदो [illegible] यथा हृतादिस र्वोपलब्धिकरणं चैवं ३ नपि हृता [illegible] मात्र [illegible] नित्यः यस्मादेवं [illegible]
त्य २ पातिनो [illegible] शतः [illegible] तमा ६

त्वचज्ञानकर्तृत्वं न तु आप्तत्वात् यथा सवितुः सत्तामात्रेण एव प्रकाशनकर्तृत्वं न तु व्यापृतत्वं तथा इति तद्वन्मनो
स्यात्मनो दैवमप्राकृतमितरैः करणैः असाधारणं चक्षुः अव्यवहितं पश्यत्यनेनेति । वर्तमानकालविषयाणि चेन्द्रियाण्यतो
दैवं तीतानागतानि मनस्तु त्रिकालविषयोपलब्धिकरणं इति दैवं चक्षुः उच्यते स वै मुक्तः स्वरूपापन्नः विद्या । अ
तदेहेन्द्रियमनोवियुक्तः सर्वात्मभावं प्राप्तः सन् व्योमवद्विशुद्धः सर्वेश्वरो मनउपाधिः सन् तेनेश्वरे
णमनसैतान्कामान् विन्दप्रकाशवज्जित्यप्रततेनदर्शनेन पश्यन् रमते कान्कामानिति विशिनष्टि य एते ब्रह्म
णि लोके ब्रह्मलोके हिरण्यनिधिं वद्धा विषयासंगान्तैर्मानमध्यत्वे पि दिवानुपासते । तदुपासनाद्धे ते
षां सर्वे च लोका आप्ताः प्राप्ताः सर्वे च कामाः यदर्थं हीन्द्र एकशतं वर्षाणि प्रजापतौ ब्रह्मचर्यमुवास । तत्फ
लं प्राप्तं देवैरित्यभिप्रायः । तदेकं देवानां ममैतावत्यानां नामिदानीं मनुष्याणामल्पजीवितत्वानि
हतरप्रत्यक्षत्वात् संभवतीति प्राप्त इन्द्रः उच्यते स सर्वांश्च लोकानाप्नोति सर्वांश्च कामानिदानीतनोपि को सौ
सर्व इत्यासैवा उच्यते यस्तमात्मानमनुविद्य विजानातीति ह सामान्येन किल प्रजापतिरुवाच । अतः सर्वे
षामात्मज्ञानं तत्फलप्राप्तिश्चोक्तं भवतीत्येवसङ्गत्यर्थो द्विर्वचनं प्रकरणसमाप्त्यर्थं ॥ ॥ श्यामाच्छबलं प्र छ
पद्ये इत्यादि मन्त्राम्नायः पावनो जपार्थश्च ध्यानार्थो वा श्यामो गम्भीरो वर्णः श्याम इव श्यामो ह
र्दि ब्रह्म [illegible] तस्य वेद्यः प्रसिद्धस्तेनैव स्वरूपेणान्तर्यो शरीरो व्योमवत्सर्वगत आत्मा ब्रह्मेत्यवगन्तव्यं तज्ज्ञा
त्मा ब्रह्मेति तमसमरणधर्मा ऽतो ऽयं मन्त्रः । प्रजापतिश्चतुर्मुखस्तस्य सभां वेश्म प्रपद्ये गच्छामि तं
[illegible]
[illegible] आचार्यः [illegible] पत्रांतरे ज्ञातव्यः । २

प्रपद्ये गच्छेयं। किंच। यथा। यशोहं यशो नामात्माहं भवामि ब्राह्मणानां ब्राह्मणा एव हि विशेषतस्तमुपासते
तत्तेषां यशो भवामि तथा राज्ञां विशां च ते ह्यधिकृता एवेति तेषामप्यात्मा भवामि यशोहमनुप्रापत्सि
सह। हं यशसां यशा आत्मा नादं हेंद्रियमनोबुद्धिलक्षणानामात्मा यशः किमर्थमहमेवं प्रपद्य इत्युच्यते श्वेतं
वर्णं लोहितं पक्वबदरसमं रोहितं। तथा दत्कं दंतरहितं अदत्कं सत् भक्षयितृ तेजोबलवीर्यविज्ञानधर्माणाम
हंतु विनाशयितृ स्त्रीव्यंजनं। यदेवं लक्षणं एतं लिंदु पिच्छिलं मा अभिगां मा अभिगच्छेयं
द्विर्वचनमत्यंतानर्थहेतुत्वप्रदर्शनार्थं। तद्धैतदात्मज्ञानं सोपकरणमोमित्येतदक्षरमित्याद्यैः सहोपास
नैरुक्तं ब्रह्मा हिरण्यगर्भः परमेश्वरो वा तद्द्वारेण प्रजापतये कश्य
पाय उवाच असावपि मनवे स्वपुत्राय मनुः प्रजाभ्य इत्येवं श्रुत्यर्थसंप्रदायपरंपरयागतमुपनिषद्विज्ञानम
द्यापि विद्वत्सु अवगम्यते। यथेह षष्ठाद्यध्यायत्रये प्रकाशितात्मविद्यासफलावगम्यते। तथा कर्मणां न कर्म
णार्थ इति प्राप्तेन अनर्थकत्वाप्राप्तिपरिहारार्थं वेदकर्मणो विद्वद्भिरनुष्ठीयमानस्य विशिष्टफलवत्त्वेनो
पदर्शयते आचार्यकुलाद्वेदमधीत्य सहार्थतोध्ययनं कृत्वा यथाविधानं। यथास्मृत्युक्तैर्नियमैर्यु
क्तः सन्नित्यर्थः। सर्वस्यापि विधेः स्मृत्युक्तस्योपकुर्वाणकं प्रतिकर्तव्यत्वेगुरुशुश्रूषायाः प्राधान्य
दे दर्शनाह। गुरोः कर्म यत्कर्तव्यं तत्कृत्वा कर्मशून्यो योतिशिष्टः कालस्तेन कालेन वेदमधीयीतेत्यर्थः
एवं हि नियमवताधीतो वेदः कर्मज्ञानफलप्राप्तये भवति नान्यथेत्यभिप्रायो भिसमावृत्य धर्म

इति छांदोग्योपनिषद्भाष्यं समाप्तं

Iti chhandogyopunishdrashya samaptam